Others / Journals

मेधा

सं श्रुतेन गमेमहि

१९६२ - १९६३

शासकीय दू. श्री वै. संस्कृत महाविद्यालय, रायपुर, मध्यप्रदेश
द्वारा प्रकाशित

With compliments.........
.........The Editor.

Acc. 614

मेधा

शासकीय दू. श्री वै. संस्कृत महाविद्यालय, रायपुर

की

शोध-पत्रिका

ग्रंथसंख्या-२ जुलाई १९६२ - अप्रैल १९६३ भाग-१ तथा २

संपादक - डॉ. श्रीनाथ हसूरकर

Bharatiya Vidya Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
733

शासकीय दू. श्री वै. संस्कृत महाविद्यालय, रायपुर, मध्यप्रदेश
द्वारा प्रकाशित

शासकीय दू. श्री वैं. संस्कृत महाविद्यालय, रायपुर की ओरसे
डॉ. श्रीनाथ हसूरकर द्वारा प्रकाशित ।

एवं

श्री. पां. ना. वनहट्टी
व्यवस्थापक, नारायण मुद्रणालय, नागपुर द्वारा मुद्रित ।

Bhawan's Sri Sankaracharya ... Sanskrit ... Vidyapeeth
733

मेधा

शासकीय दू. श्री वै. संस्कृतमहाविद्यालय, रायपुर,

की

शोध-पत्रिका

ंथसंख्या-२ जुलाई १९६२-१९६३ भाग-१ तथा २

विषयानुक्रमणिका

	विषय	लेखक	पृष्ठांक
१	चतुर्दशनिरुक्तानां तत्कर्तॄणाञ्च स्वरूपविवेचनम् ।	प्रा. केशवप्रसाद मिश्र	७
२	स्याद्वादमञ्जरी-विधूननम् ।	प्रा. राजेन्द्र चौधरी	२३
३	साहित्यतत्त्वविमर्शः ।	प्रा. रेवाप्रसाद द्विवेदी	५२
४	पाणिनीयोपसर्गगतिः ।	प्रा. कृष्णशास्त्री कानिटकर	८५
५	काव्यपुरुष ।	प्रा. रामनिहाल शर्मा	११९
6	The Undefinability of Contrariety —as propounded by Shreeharṣa.	Dr. S. S. Hasurkar	145
7	Democratic De-centralization in Madhya—Pradesh.	Prof. Sinha	154

मेधां सायं मेधां प्रातर्मेधां मध्यन्दिनं परि ।
मेधां सूर्यस्य रश्मिभिर्वचसा वेशयामहे ॥

(मेधा–सूक्त, ६ काण्ड, अथर्ववेद)

मेधा

१९६२ — १९६३

चतुर्दशनिरुक्तानां तत्कर्तॄणाञ्च स्वरूपविवेचनम्

श्रीकेशवप्रसादमिश्र

गालवनिरुक्तम् ।

अस्य नाम्नो निरुक्तिः—गलोरपत्यं गालवः । पाणिनिसूत्रेष्वस्य मतं दृश्यते । इको ह्रस्वोऽङ्यो गालवस्य ६–३–६१ पा० । इगन्तस्याङ्यन्तस्य ह्रस्वो वा स्यादुत्तरपदे । तृतीयादिषु भाषितपुंस्कं पुंवत् गालवस्य ७–१–७४ पा० । प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वास्याट्टादावचि । अड् गार्ग्यगालवयोः ७–३–९९ पा० । हलादेः पितः सार्वधातुकस्यापृक्तस्य अट् स्यात्, गार्ग्यगालवयोर्मतेन । नोदात्त स्वरितोदयमगार्ग्यकाश्यपगालवानाम् ८–४–६७ पा० । उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात्-गार्ग्यादि मते तु स्यादेव ।

परिचयः—भागवते ८–१३–१५ ।

गालवो दीप्तिमान् रामो द्रोणपुत्रः कृपस्तथा ।
ऋष्यशृङ्गः पितास्माकं भगवान्बादरायणः ।।

एतेऽष्टम मन्वन्तरे सप्तर्षयो भविष्यन्ति, येषु गालवोऽप्येको भविष्यति ।

ब्रह्माण्डे ४–१–१० ।

अनागताश्च सप्तैव स्मृतास्त्विह महर्षयः ।
कौशिको गालवश्चैव जामदग्न्यश्च भार्गवः ।

अनेनेदं ज्ञायते, कौशिको गालवोऽष्टमे मन्वन्तरे सप्तर्षिष्वेको भविष्यति । वायुपुराणे १००। १० ब्रह्माण्डपुराणवत्पाठः ।

ब्रह्माण्डे ३-६६-७२ विश्वामित्रसुतास्तु वै ।

श्यामायना हिरण्याक्षाः सांकृता गालवाः स्मृताः ॥

इत्थं प्रतीयते विश्वामित्रसुता एव गालवास्स्मृताः ।

ऐतरेयारण्यके ५-३-३ नेदमेकस्मिन्नहनि समापयेदिति ह स्माह जातूकर्ण्यः, समापयेदिति गालवः । अर्थात् इदं महाव्रताध्ययनं यस्मिन् दिने प्रक्रान्तं तस्मिन्नेव दिने समाप्तं न कुर्यादिति जातूकर्ण्यस्य मतम् । गालवस्य तु कुर्यात्तस्मिन्नेव दिन इति मतम् ।

बृहद्देवतायां १-२४ ।

नवभ्य इति नैरुक्ताः पुराणाः कवयश्च ये ।

मधुकः श्वेतकेतुश्च गालवश्चैव मन्यते ॥

अयमाशयः, पुराणः कविर्गालवो वदति यत् नवभ्यः कर्मभ्यो नाम जायते ।

तत्रैव ५-३९ ।

शौनकादिभिराचार्यैर्देवता बहुधेरिता ।

इडस्पति शाकपूणिः पर्जन्याग्नी तु गालवः ॥

प्रसुष्टुतिः । इति ऋचि गालवमतेन पर्जन्याग्नी स्तुताविति ॥

तत्रैव ६-४३ ।

पौष्णौ वेति प्रगाथौ द्वौ मन्यते शाकटायनः ।

ऐन्द्रमेवाथ पूर्वं तु गालवः पौष्णमुत्तरम् ॥

प्रैति द्वौ प्रगाथौ पौष्णौ, इति शाकटायनो ब्रवीति । पूर्वमैन्द्रमुत्तरं पौष्णमिति गालवो वदति ।

तत्रैव ७-३८ ।

सावित्रमेके मन्यन्ते महो अग्ने स्तवं परम् ।

आचार्याः शौनको यास्को गालवश्चोत्तमामृचम् ।

अन्तिमामेवर्चं सवितृ देवताकां गालवो मन्यते ।

शैशिरीय शिक्षायाम्—

मुद्गलो गालवो गार्ग्यः शाकल्यशैशिरी तथा ।

पञ्च शौनक शिष्यास्ते शाखाभेदप्रवर्तकाः ॥

परमयं पाठो नातीव समीचीनः, शौनकस्थाने शाकल्यनाम भविष्यति । महाभारते शान्तिपर्वणि ३४२ । १०३-१०४ ।

पाञ्चालेन क्रमः प्राप्तः तस्माद् भूतात्सनातनात् ।

बाभ्रव्यगोत्रः स बभौ प्रथमं क्रमपारगः ॥

नारायणाद्वरं लब्ध्वा प्राप्य योगमनुत्तमम् ।

क्रमं प्रणीय शिक्षाञ्च प्रणयित्वा स गालवः ॥

बाभ्रव्यगोत्रीयः पाञ्चालो गालवः क्रमप्रणेता तथा शिक्षाप्रणेता चासीत् ।

सभापर्वणि—

सभायां ऋषयस्तस्यां पाण्डवैः सह आसते । १५ ।

पवित्रपाणिः सावर्णो भालुकिर्गालवस्तथा ॥

पाण्डवैस्सहास्य स्थितिर्वर्तते ।

बृहदारण्यकोपनिषदि २-५-२२ गालवो विदार्भिकौण्डिन्यात्—अयं विदर्भिकौण्डिन्यस्य शिष्यः । मत्स्यपुराणे—सावर्णेर्मन्वन्तरे गालवस्सप्तर्षिष्वेको भविष्यति यथा—

अश्वत्थामा शरद्वाँश्च कौशिको गालवस्तथा ।

शतानन्दः काश्यपश्च रामश्च ऋषयः स्मृताः ॥ ९ । ३२ ॥

तत्रैव १९५-२२ ।

अयं भृगुवंशे गोत्रकारस्तथा पञ्चप्रवरेषु पठितः ।

तत्रैव १९६-३१ ।

अङ्गिरसां गोत्रे अयं प्रवरेषु पठ्यते यथा-

गालवश्च अनेहश्च सर्वेषां प्रवरो मतः ।

विष्णुपुराणे ३-२-१७ ।

दीप्तिमान् गालवो रामः कृपो द्रौणिस्तथापरः ।

मत्पुत्रश्च तथा व्यास ऋष्यशृङ्गश्च सप्तमः ॥

एतेऽष्टमे सावर्णेर्मन्वन्तरे ऋषयो भविष्यन्ति येषु गालवोऽस्ति ।

भागवते १०-८४-४ ।

रामः सशिष्यो भगवान् वसिष्ठो गालवो भृगुः ।

एते कृष्णरामदिदृक्षया मुनयः समाययुः, येषु गालवो वर्तते ।

वायुपुराणे ६१।२५ शुक्लयजुर्वेदीय वाजसनेयि शाखासु गालव शाखाप्येका ।

तत्रैव ९१-१०० विश्वामित्रस्य पुत्राः ......

शालावत्या हिरण्याक्षास्त्यङ्कृता गालवाः स्मृताः ।

ऋक् प्रातिशाख्ये—बाभ्रव्यः ।

इति प्र बाभ्रव्य उवाच च क्रमं

क्रमप्रवक्ता प्रथमं शशंस च ॥ ११ । ६५

ब्रह्माण्ड पुराणे ३.६३. ८५-८९ त्रय्यारुणेः पुत्रः सत्यव्रत नामाभूत् । पिता पुत्रमत्यजत् । सत्यव्रतस्तु पितुर्दूरमवसत् । विश्वामित्रस्तु दारान् तस्य विषये न्यस्य तपश्चचार ।

तस्य पत्नी गले बद्ध्वा मध्यमं पुत्रमौरसम् ।

शिष्टानां भरणार्थाय व्यक्रीणात् गोशतेन वै ॥ ८६ ॥

तं तु बद्धं गले दृष्ट्वा विक्रयार्थं नरोत्तमः ।

महर्षिपुत्रं धर्मात्मा मोक्षयामास सुव्रतः ॥ ८७ ॥

सत्यव्रतो महाबुद्धिर्भरणं तस्य चाकरोत् ।
विश्वामित्रस्य तुष्टयर्थमनुकम्पार्थमेव च ।। ८८ ।।
सोऽभवद्गालवो नाम गले बद्धो महातपाः ।
महर्षिः कौशिकस्तात तेन वीरेण मोक्षितः ।। ८९ ।।

अर्थात् यस्मादयं गले बद्धोऽभूत् ततोऽयं गालवोऽभूत् इति गालव शब्दस्य व्युत्पत्तिः ।

वायुपुराणेऽपि ८८–९० अयमेवार्थ एभिरेव श्लोकैः प्रदर्शितः । विश्वामित्रः स्वदारान् सत्यव्रतसमीपे सन्न्यस्य तपश्चचार । विश्वामित्रपत्नी शिष्टभरणाय स्वकीयमौरसं पुत्रं गले बद्ध्वा गोशतेन विक्रेतुं कृतनिश्चयासीत् । तां पत्नीं तथाविधां पुत्रविक्रीणन्तीं दृष्ट्वा पुत्रं मोक्षयामास– स एव गले बद्धः सन् गालव इति नाम्नाभवत् ।

निरुक्तम् –अस्य निरुक्तस्य केवलमेकमेव प्रमाणं यास्कीयनिरुक्त उपलभ्यते । यास्कनिरुक्ते ४।३ शितिमांसतो मेदस्त इति गालवः । शिताम शब्दनिर्वचनप्रसङ्गे यास्कमतेन दोः शिताम भवति । बाहू शिताम शब्देनोच्येते । दोः द्रवतेः । योनिः शिताम इति शाकपूणिः । श्यामतो यकृत्त इति तैटीकिः । गालवमतेन शितिमांसतः श्वेतान्मांसात्, तदेवमेदोलक्षणं भवति, शितिमांस एव शिताम भवति । शितिः श्यतेः । मांसं माननं वा, मानसं वा, मनोऽस्मिन् सीदतीति वा । मेदः मेद्यतेः ।।

तैटीकिनिरुक्तम्

चतुर्थेऽध्याये तृतीयखण्डे "शिताम" इत्यनवगतशब्दनिर्वचनप्रसङ्गे यास्कः "दोः शिताम भवति । द्रोः द्रवतेः" यास्क मते बाहुरेव शिताम भवति । योनिः शितामेति शाकपूणिः । "श्यामतो यकृत्त इति तैटीकिः" तैटीकिराचार्यो मन्यते यत् श्यामतः कथनेन यदुक्तम्भवति तदेवोक्तं शितामतः शब्देन भवति । शब्दसरूपतात्र विद्यते । यकृत् हि श्याममुच्यते । "श्यामं श्यायतेः" तत्सम्पर्कादुत्पद्यते । "यकृत् यथा कथा च कृत्यते" मृदुत्वात् तत् येन केनापि प्रकारेण अनायासेनैव कृत्यते छिद्यते । अतो यकृत्त एवावदानं मन्यते तैटीकिः । यकृदेव शिताम शब्देनोच्यते । पञ्चमेऽध्याये २७ तमे खण्डे बीरिट पदनिर्वचने "बीरिटं तैटीकिरन्तरिक्षमेवमाह । पूर्वं वयतेरुत्तरमिरतेर्वयांसीरन्त्यस्मिन्भांसि वा । तैटीकिरस्य बीरिट शब्दस्य व्युत्पत्तिं धातुद्वयेन वक्ति । विः इरिटम्, पूर्वं पदं वयतेः (वेञ् धातोः) इरिटमित्युत्तर पदं इरतेः गत्यर्थस्य भवति तद् बीरिटम् =वयांसि इरन्ति अस्मिन् अन्तरिक्षे तद् बीरिटमन्तरिक्षम्, अथवा भांसि इरन्त्यस्मिन् इति बीरिटम् । यास्कोऽपि स्वमतं नात्र स्थापयामास, तैटीकि मतमेव शब्दस्यास्य निर्वचने प्रमाणीचकार । इत्थं निरुक्ते शिताम, बीरिटम्, इति कठिनपदनिर्वचनेऽस्य मतिरासीदिति तस्य निरुक्तं महत्वपूर्णमासीत्तदधुना नाप्यते ।

यास्क निरुक्तम्

अस्य नाम्नो निरुक्तिः । यस्कस्यापत्यं पुमान् यास्कः । यस्कादिभ्यो गोत्रे पा. ग. २.४.६३ इत्यनेन अपत्यप्रत्ययस्यलुक् न । बहुत्वाभावात् । शिवादिभ्योऽण् पा. ४.१.११२ इत्यनेनाणि, वृद्धौ यास्कः ।

अस्य परिचयः– काठकसंहितायाम् १३।१२। "तामेतां यस्का गैरिक्षिता विदुराग्नेन्द्रीमालभेत पुरोधाकाम आग्नेयो वै ब्राह्मण ऐन्द्रो राजन्यो ब्रह्म चैव क्षत्रञ्च सयुजौ करोति" ।

एतेनांशेन ज्ञायते यत् यस्का गैरिक्षिता आसन्। गिरिक्षित एव यस्क आसीत्। यस्क इत्यस्य गोत्रे बहुत्वे यस्का इति रूपं भवति, अपत्ये यास्क इति सिद्धिर्भवति। शतपथब्राह्मणे-बृहदारण्यकोपनिषदि २-५-२१ भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्च । अर्थात् भारद्वाजस्य गुरुर्यास्क आसीदित्यवगम्यते। द्वितीये वंशे तत्रैव ४ - ३ - २७ भारद्वाजो। भारद्वाजाच्चासुरायणाच्च यास्काच्च एतेनापि तदेव यत् भारद्वाजस्य गुरुर्यास्क आसीत्।

पिङ्गलछन्दःसूत्रे—" उरो बृहती यास्कस्य " ३-३०. अयमाशयः, द्वितीयः पादो जागतः शेषा गायत्राः पादा भवन्ति तदान्यङ्कुसारिणी नाम्नी बृहती भवति। सैव न्यङ्कुसारिणी यास्कमते उरोबृहती भवति। अनेन ज्ञायते यत् सच्छन्दशास्त्रज्ञ आसीत्।

हिरण्यकेशिश्रौतसूत्रे २१-३-७। यास्कः, अथ वीतहव्याः यास्क वाधूल मौनमौक रजातवाहास्तेषां त्र्यार्षेयो भार्गव वैतहव्यसावेदसेति, सवेदोवत्, वीतहव्यवत्, भृगुवदिति । अर्थात् अयं भृगुगोत्रे प्रवरगणनायां वीतहव्यमध्ये पठितः, तथा त्र्यार्षेयः प्रवरोऽस्य वर्तते। इत्यनेनाय भृगुगोत्रे जातः।

आपस्तम्बश्रौतसूत्रे २४-६-१ । आपस्तम्बेनापि ह्ययं भृगुषु पठितः। यास्क वाधूल मौन मौकाः।

आश्वलायनश्रौतसूत्रे—१२-१०-१० यास्क-वाधौल-मौनमौक शार्कराक्षिसर्ष्टिसावर्णिशालङ्कायनजैमिनिदेवन्त्यायनानां भार्गववैतहव्यसावेदसेति " त्र्यार्षेयः प्रवरो भृगुषु च पठितः।

ऋक्प्रातिशाख्ये १७-४२. न दाशतय्येकपदा काचिदस्तीति वै यास्कः, उवटः, स्वभाष्ये—दशतये भवा दाशतयी काचिदेकपदा नास्तीति वै यास्कआचार्यो मन्यते। अनेन ज्ञायते यदयं शौनकादपि प्राक्तनीनः।

मत्स्यपुराणे--यस्को वा वीतिहव्यो वा मथितस्तु तथा दमः ××× रामोदश्च तथैतेषां आर्षेयाः प्रवराः स्मृताः। १९५। ३६-३९। इत्थं भृगुगोत्रे अस्य आर्षेयः प्रवरो भवति।

ब्रह्माण्डे—**वत्सा विदा आर्ष्टिषेणा यस्का वैन्याश्च शौनकाः।**
मित्रेयुः सप्तमा ह्येते पक्षा ज्ञेयास्तु भार्गवाः। ३-१-१००

महाभारते—**यास्को मामृषिरव्यग्रोनैकयज्ञेषु गीतवान्।**
शिपिविष्ट इति ह्यस्मात् गुह्यनामधरोह्यहम्। ३३०-७

स्तुत्वा मां शिपिविष्टेति यास्क ऋषिरुदारधीः।
मत्प्रसादादधो नष्टं निरुक्तमधिजग्मिवान्॥ ८॥

इत्यनेन ज्ञायते यत् यास्क ऋषिः मां शिपिविष्ट इति नाम्ना अस्तौत् अव्यग्रः, उदारधीरयं मत्प्रसादात् (भगवतः प्रसादात्) अधोनष्टं निरुक्तं प्राप्तवान्। यदिदं निरुक्तमधुनोपलभ्यते, तदस्यैव यास्कस्य कृतिरिति निर्णीता।

बृहद्देवतायां प्रथमेऽध्याये—

चतुर्भ्य इति तत्राहुर्यास्कगार्ग्यरथीतराः ।
आशिषोऽथार्थ वैरूप्यात् वाचः कर्मण एव च ॥ १-२६

अर्थो गार्ग्य प्रकरणे द्रष्टव्यः ।

द्वितीयेऽध्याये

पदमेकं समादाय द्विधा कृत्वा निरुक्तवान् ।
पूरुषादः पदं यास्को वृक्षे वृक्षे इति त्वृचि ॥ २-१११

वृक्षे वृक्षे इति ऋचि ७-७-१९ यास्क एकं पूरुषादः पदं समादाय द्विधा कृत्वा निरुक्तवान् ।

बह्वीनां संनिपातस्तु यस्मिन्मन्त्रे प्रदृश्यते ।
आचार्यौ यास्कशाण्डिल्यौ वैश्वदेवं तदाहतुः ॥ २-१३२

यस्मिन्मन्त्रे बह्वीनां देवतानां संनिपातो भवेत् । यास्कशाण्डिल्यौ तद् वैश्वदेवमाहतुः ।

अम्ब्येक्रा च दृषद्वत्यां चित्र इच्च सरस्वती ।
इयं शुष्मेभिरित्येतं मेने यास्कस्तु सप्तमम् ॥ २-१३७ ।

अर्थात् सरस्वती इत्येतस्य पदस्य नदीवन्निगमाः षड् भवन्ति इति शौनकः कथयति, यास्कस्तु इयं शुष्मेभिरित्यत्र सप्तमं निगमं वदति ।

तृतीये—

मरुतां साहचर्यात्तु सूक्तेऽस्मिन्नाग्नि मारुते । ७५ ।
मन्यते मध्यमं चैव यास्कोऽग्निं न तु पार्थिवम् । ७६ ।

आग्निमारुते सूक्ते मरुतां साहचर्यात् यास्कः अग्निं मध्यमं मनुते न तु पार्थिवम् ।

पराश्चतस्रो यत्रेति इन्द्रोलूखलयोः स्तुतिः ।
मन्येते यास्ककात्थक्याविन्द्रस्येति तु भागुरिः ॥ ३-१००

अर्थस्तु कात्थक्य निरुक्ते द्रष्टव्यः ।

अर्धर्चो देवदेवत्य एषो इत्याश्विने परे ।
आदित्यं मन्यते यास्को हविषेति सह स्तुतम् ॥ ३-११२

त्वमग्ने इति अर्धर्चः सोमदेवत्यः, यास्कः हविषेति सह स्तुतमादित्यं मन्यते ।

चतुर्थेऽध्याये—

अथाग्नेये अग्निमित्युत्तरे यं पञ्चैन्द्राणि प्र तदैन्दव्यृगत्र ।
युवं तमिन्द्रा पर्वतौ सहस्तुतौ त्विन्द्रं मेन इह यास्कः प्रधानम् ॥ ४. ३-४

प्र तद् ऐन्दवी ऋचि युवं इन्द्रा पर्वतौ सह स्तुतौ मन्येथे । यास्कस्तु प्रधानमिन्द्रमेव मेने ।

पञ्चमेऽध्याये—वायुः शुनः सूर्य एवात्र सीरः शुनासीरौ वायुसूर्यौ वदन्ति ।
शुनासीरं यास्क इन्द्रं तु मेने सूर्येन्द्रौ तौ मन्यते शाकपूणिः । ५-८

अर्थात् आचार्याः निरुक्तकृतः शुनासीरौ वायुसूर्यौ वदन्ति। परं यास्क एतेन पदेन इन्द्रं मनुते। शाकपूणिः सूर्येन्द्रौ मनुते।

यास्कस्तु पूषणं मेने स्तुतमिन्द्रं तु शौनकः।
वैश्वानरं भागुरिस्तु मारुत्येष समाश्विनी ॥ ५-४०

प्रसुष्टुतिः इति ऋचि यास्कः पूषणं मेने, शौनकः इन्द्रं, भागुरिः वैश्वानरं मन्यते।

षष्ठेऽध्याये—ऋचं यास्कस्तृचं त्वेतं मन्यते वैश्वदेवतम्।
आदित्यदैवतं सूक्तं त्यान्वित्यत्र परं तु यत् ॥ ६-८७।

दाताम इति ऋचि भागुरिर्देवानां निपातमाह। यास्क एतं तृचं वैश्वदेवतं मन्यते।

इतिहासमिदं सूक्तं आहतुर्यास्क भागुरी।
कन्येति शौनकस्त्वैन्द्रं पान्तमित्युत्तरे च ये। ६-१०७।

तमितीति ऋचि इदं सूक्तं यास्कभागुरी इतिहासमाहतुः, अपालाविषये, एतेन ज्ञायते यदयमपि यास्क ऐतिहासिकतां स्वीकरोति वेदे।

सप्तमे—इतिहासमिमं यास्कः सरण्यू देवते द्वृचे।
विवस्वतश्च त्वष्टुश्च त्वष्टेति सह मन्यते। ७-७

मैनमिति द्वृचे सूक्ते यास्कः, विवस्वतः त्वष्टुश्चेतिहासं मन्यते।

सावित्रमेके मन्यन्ते महो अग्ने स्तवं परम्।
आचार्याः शौनको यास्को गालवश्चोत्तमामृचम्। ७-३८।

प्रावे-पा इति सूक्तमेके सावित्रं मन्यन्ते। शौनकयास्कगालवाउत्तमामृचं सावित्रं मन्यन्ते।

यास्कौपमन्यवावेतानाहतुः पञ्च वै जनान्।
निषाद पञ्चमान्वर्णान्मन्यते शाकटायनः ॥ ७-६९।

अर्थस्तु औपमन्यवनिरुक्ते द्रष्टव्यः।

द्वृचे त्वानुमतं पादमन्त्यं यास्कस्तु मन्यते।
भूर्ध्वाः सोमश्च पूषा च रवं पथ्या स्वस्तिरेव च। ७-९३

आह्वानं प्रतिचाख्यान इतरेतरयोरिदम्।
संवादं मन्यते यास्क इतिहासं तु शौनकः ॥ ७। १५३

इतरेतरयोः पुरूरवसः उर्वश्यास्च इदं आह्वानं प्रति आख्यानं त्वित्थं संवादं यास्को मन्यते शौनकस्तु इतिहासं मन्यते।

अष्टमेऽध्याये--

प्रेतीतिहास सूक्तं तु मन्यते शाकटायनः।
यास्को द्रौघणमैन्द्रं वा वैश्वदेवं तु शौनकः ॥९।११।

प्रेति इति सूक्ते शाकटायन इतिहासं मन्यते। यास्कस्तु द्रौघणं सूक्तं मन्यते, ऐन्द्रं वा। शौनको वैश्वदेवं मनुते।

ऐन्द्राग्नं मन्यते यास्क एके लिंगोक्तदैवतम् ।
राक्षोघ्नाग्नेयमित्युक्तं यत्वेतद् ब्राह्मणेति तु ।८।६५।

यत्वेतदिति ऋचि यास्क ऐन्द्राग्नं मन्यते। एके लिंगोक्तदैवतं मन्यन्ते अथवा आग्नेयं रक्षोघ्नमिति मन्यन्ते ।

निरुक्ते १४.३६ "नमो यास्काय" पदं वर्तते ।

वार्ष्यायणिनिरुक्तम्

नाम्नो निरुक्तिः—वृषस्य गोत्रापत्यमित्यर्थे "तिकादिभ्यः फिञ्, पा० ४-१-१५४ इत्यनेन गोत्रे फिञ्, आदि वृद्धिः ।

परिचयः—वायुपुराणे ३४.६३ "वार्षायणिस्तु सामुद्रम्" ।

अर्थात् एतस्यायमाशयः । विष्णु नाभितो यदब्जमासीत् ततः पद्माकारा पृथिवी समुत्पन्ना । तस्या अब्जरूपायाः पृथिव्याः कर्णिकास्थानं मेरुपर्वतो वर्तते । कर्णिकावर्णनप्रसङ्गे तां कर्णिकामत्रिः शताश्रिं मेने । भृगुः सहस्राश्रिं मेने । सावर्णिरष्टाश्रिम्मनुते । भागुरिः चतुरस्रं मनुते । वार्षायणिः तां कर्णिकां अथवा मेरुं सामुद्रं समुद्रस्वरूपं मनुते । गालवः शरावम् । गार्ग्य ऊर्ध्ववेणीकृतम् क्रोष्टुकिः परिमण्डलम् मनुते । एष एव परिचय उपलभ्यते । वार्षायणिरेव वार्ष्यायणिर्भविष्यति अथवा तस्य पुत्रो भविष्यति ।

निरुक्तस्वरूपम्

यास्ककृत निरुक्ते ह्येकमेवोद्धरणं ह्यस्य दत्तं वर्तते ।

"षड् भावविकारा भवन्तीति वार्ष्यायणिः"

भावानां विकारा : षडेव भवन्ति इति वार्ष्यायणिराचार्यो मनुते ।

जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति ।

जायत इति पूर्वभावस्यादिमाचष्टे नापरभाव माचष्टे । न प्रतिषेधति ।

अस्तीत्युत्पन्नस्य सत्वस्यावधारणम् ।
विपरिणमत इत्यप्रच्यवमानस्य तत्वाद्विकारम् ।

वर्धत इति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानाम् । वर्धते विजयेनेति वा वर्धते शरीरेणेति वा । अपक्षीयत इत्यनेनैव व्याख्यातः प्रतिलोमम् । विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे, न प्रतिषेधति । अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह । ते यथावचनमभ्यूहितव्याः ।

पतञ्जलिः स्वभाष्ये वार्ष्यायणिमतमुपन्यस्यति—१.३.१ महाभाष्ये, षड्भावविकारा इति ह स्माह भगवान् वार्ष्यायणिः । जायतेऽस्ति विपरिणमते वर्धते अपक्षीयते विनश्यति इति । पतञ्जलिर्यै वार्ष्यायणिं भगवन्तमिति विशेषणेन विभूषयति, अतोऽवश्यमेव स महान् निरुक्तकार आसीत् ॥

शतबलाक्षनिरुक्तम्

अस्य नाम्नो निरुक्तिः—शतशब्दो बह्वर्थः । शतबलानि अक्षाणीन्द्रियाणि यस्य सः शतबलाक्षः । दुर्गस्तु शतबलाक्षशब्दस्यार्थं बह्विन्द्रियं करोति । मौद्गल्यो मुद्गलापत्यं मुनिः ।

परिचयः--ब्रह्माण्डपुराणे २।३४

प्रोवाच संहितास्तिस्रः शाकवैणो (पूणी) रथीतरः ।
निरुक्तं च पुनश्चक्रे चतुर्थं द्विजसत्तम ।। ३ ।।
तस्य शिष्यास्तु चत्वार पैलश्चेक्षलकस्तथा ।
धीमाञ्छतबलाकश्च गजश्चैव द्विजोत्तमाः ।। ४ ।।

यास्कः शाकपूणेर्नाम द्वाविंशतिकृत्वो निरुक्ते ह्युदाहरति । शाकपूणिरयं निरुक्तकार आसीत् अत एवास्य निरुक्तितत्वानि यास्केन बहुश उद्धृतानि । शाकपूणिरेव रथीतरापरनामा प्रथित आसीत् । निरुक्तं च पुनश्चक्रे–इति वाक्यबलात् निरुक्तकृदासीत् । तस्य शाकपूणेश्चत्वारः शिष्या आसन् । पैलः, इक्षलकः, शतबलाकः, गज इत्यादयः । एषु केवलं शतबलाकस्यैव नाम निरुक्ते ११–६ उपलभ्यते नान्येषां त्रयाणाम् । अतः शतबलाक्ष एव शतबलाकनामा पुराणेषु पठितो दृश्यते । यदि तस्य चत्वारः शिष्या आसन् मन्ये शतबलाक्षेणापि निरुक्तमधीतं स्यात् । अतस्तस्य मतं यास्को ददाति ।

विष्णुपुराणे ३–४–२३ ।

संहिता त्रितयं चक्रे शाकपूर्णस्तथेतरः ।
निरुक्तमकरोत्तद्वच्चतुर्थं मुनिसत्तम ।। २३ ।।
क्रौञ्चो वैतालिकस्तद्वद् बलाकश्च महामुनिः ।
निरुक्तकृच्चतुर्थोऽभूद् वेदवेदाङ्गपारगः ।। २४ ।।

परञ्चात्र चतुर्थस्य नाम न दत्तम् । यदि "क्रौञ्चो वैतालिक गजौ बलाकश्च महामुनिः" इत्ययं पाठः स्यात् । तदा बलाक एव निरुक्तकारो भविष्यति । यदि गज एव निरुक्तकारोऽभविष्यत् तदा यास्को गजस्यैव नाम निरुक्ते नादास्यत् । यदि शतबलाक्षस्य मतं तेन दत्तम् । मन्ये शतबलाक्षोऽपि शाकपूणेरथीतरात् निरुक्तमधीतवान् स्यात् तथा निरुक्तकारः स्यात् । यदि गजो निरुक्तकार आसीत् तर्हि तस्य निरुक्तकृतो निरुक्तवैशिष्ट्यं निरुक्ते न निविष्टं स्यात्, यत्र चतुर्विंशतीनां नामानि समायातानि । निरुक्तस्य एकस्मिँस्स्थलेऽपि तस्य मतवैभिन्यं नाभविष्यत् ।

वायुपुराणे ६०–६५

प्रोवाच संहितास्तिस्रः शाकपूर्णरथीतरः ।
निरुक्तं च पुनश्चक्रे चतुर्थं द्विजसत्तमः । ६५ ।
तस्य शिष्यास्तु चत्वारः केतवोदालकिस्तथा ।
धीमाञ्छतबलाकश्च नैगमश्च द्विजोत्तमः । ६१ । १ ।।
रथीतरो निरुक्तं च पुनश्चक्रे चतुर्थकम् ।। ६१ । २ ।।

अत्र शाकपूणेस्तृतीयः शिष्यश्शतबलाकश्चतुर्थो नैगमः ।

भागवते १२ स्कंधे ६ अध्याये—

जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्वसंहिताम् ।
बलाक पैंज वैतालविरजेभ्यो ददौ मुनिः । १५ ।

अत्र स्पष्टार्थः— यत् जातूकर्ण्यः (शाकपूणिः) सनिरुक्तां स्वसंहिताम् बलाकपैजवैतालविरजेभ्यो ददौ । तर्हि बलाकायापि निरुक्तं ददौ । एतेन सिद्ध्यति यत् स निरुक्तकृत् आसीत् । चतुर्भ्यो निरुक्तं ददौ परं बलाक एव तेषु प्रसिद्धो निरुक्तकार आसीत् यस्य नाम यास्को निरुक्ते दत्तवान् । चतुर्णां शिष्याणां पुराणानुसारिणी नामावलिरत्रदीयते ।

ब्रह्माण्डपुराणे	पैलः	इक्षलकः	शतबलाकः	गजः
विष्णुपुराणे	क्रौञ्चः	वैतालिकः	बलाकः	निरुक्तकृत्
वायुपुराणे	केतवः	उदालकिः	शतबलाकः	नैगमः
भागवते	पैजः	वैतालः	बलाकः	विरजः

विविच्यते तावत् – प्रथम शिष्यस्य चत्वारि नामानि पुराणभेदात् । तेष्वेकस्य नाम यास्को नोदाहरति। द्वितीय शिष्यस्य चत्वारि नामानि पुराणभेदात्। तेष्वेकस्य नाम यास्को नोदाहरति निरुक्ते। चतुर्थशिष्यस्य चत्वारि नामानि पुराणभेदात् । तेष्वेकस्य नाम यास्को नोदाहरति ग्रन्थे। तृतीयस्य शिष्यस्य शतबलाक्षस्य एकमेव नाम चतुर्षु पुराणेषु क्वचित् शत शब्दरहितं क्वचित्सहितञ्चोपलभ्यते । शतबलाक्षस्यैव नाम चतुर्ष्वपि पुराणेषु स्पष्टरूपेण वर्तते । तस्यैव मतं यास्को ददाति स्वग्रन्थे । अपरञ्च, धीमाञ्छतबलाकश्च, बलाकश्च महामुनिः, धीमाञ्छतबलाकश्च ॥ इत्याद्युपाधिभिस्स विभूष्यते । "अभ्यर्हितं पूर्वम्" इति न्यायमाश्रित्य भागवते सर्वश्रेष्ठ रूपेणास्य नामायातम्। प्रथमत एव । अतः शतबलाक्षो निरुक्तमधीत्य स्वमतप्रख्यापकं निरुक्तं प्रणीतवान् । अस्य नाम बौधायनसूत्रेऽपि समायातम् ।

गोपथब्राह्मणे १. १. ३१. विद्वान्सं एकादशाक्षं मौद्गल्यं ग्लावो मैत्रेयोऽभ्याजगाम तस्मिन् ब्रह्मचर्यं वसतो विज्ञायोवाच – किंस्वित् मर्या अयं त मौद्गल्यो ध्येति यदस्मिन् ब्रह्मचर्येव वसतीति। शिष्यास्तमूचुः । ततस्तस्य प्रश्नं ग्लावं प्रति – गायत्रीं चतुर्विंशतियोनिं द्वादशमिथुनां यस्या भृग्वङ्गिरसश्चक्षुः यस्यां सर्वमिदं श्रितं तां वदतु – इति प्रश्न विज्ञानेन एकादशाक्षस्य मौद्गल्यस्य वैदुष्यं विज्ञायते। स महान् विद्वान् आसीत् । यस्य प्रश्नस्योत्तरं नादात् ग्लावः । एतदपि भवितुं शक्नोति यत्तस्यैव शतबलाक्षस्य मौद्गल्यस्य नाम एकादशाक्षमौद्गल्यः स्यात् ।

निरुक्तस्वरूपम् ।

मृत्युपदनिर्वचनप्रसङ्गे ११ अध्याये ६ खण्डे निरुक्ते। मृत्युर्मारयतीति सतः, मृतं च्यावयतीति वा शतबलाक्षो मौद्गल्यः मध्यमो हि प्राणो मृत्युः। उत्क्रामन् शरीरादितरैः प्राणैः प्राणिनो वियोजयति एवं मारयति। "प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" अथवा मृतं च्यावयति-य एवोपक्षीणायुर्भवति उपक्षीणकर्मा तं गतायुषमेवासावपगमनेन प्रच्यावयति-इति शतबलाक्षो मौद्गल्य आचार्यो मन्यते।

शाकपूणिनिरुक्तम्

अस्य नाम्नो निरुक्तिः—शाकानि यः पूणयति संहन्ति (पूण संघाते) स शाकपूणस्तस्यापत्यं शाकपूणिः "अत इञ्" इत्यपत्ये इञ् प्रत्ययः।

अस्य परिचय :— अयं ऋग्वेदस्य शाखाकारः। वायुविष्णुब्रह्माण्डभागवतादि पुराणेषु अयं संहिताप्रवर्तकस्तथा निरुक्तकृत् रूपेण वर्तते। प्रमाणानि शतबलाक्ष निरुक्ते द्रष्टव्यानि तथापि किमपि दीयते।

विष्णुपुराणे—३. ४. २३.

संहिता त्रितयं चक्रे शाकपूर्णस्तथेतरः।
निरुक्तमकरोत्तद्वत् चतुर्थं मुनिसत्तम।

एतेन ज्ञायते यदयं निःसंशयं निरुक्तकृदासीत्।

ब्रह्माण्डपुराणे—२. ३५. ४.

प्रोवाच संहितास्तिस्त्रश्शाकपूणी रथीतरः।
निरुक्तं च पुनश्चक्रे चतुर्थं द्विजसत्तम।

वायुपुराणे—६०-६५

प्रोवाच संहितास्तिस्त्रश्शाकपूर्ण रथीतरः
निरुक्तं च पुनश्चक्रे चतुर्थं द्विजसत्तमः॥ ६५॥
रथीतरो निरुक्तं च पुनश्चक्रे चतुर्थकम्। ६१। २॥

भागवते—१२ स्कन्धे ६ अध्याये

जातूकर्ण्यश्च तच्छिष्यः सनिरुक्तां स्व संहिताम्।
बलाकपैजवैतालविरजेभ्यो ददौ मुनिः॥ १५॥

इत्यादि बहुविधप्रमाणैस्तस्य निरुक्तकर्तृत्वं समर्थ्यते।

बृहद्देवतायाम्—

जातवेदस्य सूक्तसहस्रमेक ऐन्द्रात्पूर्वं कश्यपार्षं वदन्ति।
जातवेदसे सूक्तमाद्यं तु तेषामेकभूयस्त्वं मन्यते शाकपूणिः। ३ १३०॥

अयमाशयः—एके आचार्याः जातवेदस्यं सूक्तसहस्रं ऐन्द्रात्पूर्वं कश्यपार्षं वदन्ति, परं तेषामाद्यं सूक्तं जातवेदसमिति तत्र शाकपूणिरेकभूयस्त्वं मन्यते अर्थात् न एक एव देवः अपितु ततोऽपि भूयस्त्वं मनुते।

पञ्चामन्दान् भावयव्यस्य गीता जायापत्योः सम्प्रवादो द्वृचेन ।
सम्प्रवादं रोमशयेन्द्रराज्ञोरेते ऋचौ मन्यते शाकपूणिः । ३ । १५५ ॥

शाकपूणिराचार्यस्तु द्वृचेन रोमशया सह इन्द्रराज्ञः संप्रवादोऽभूदितिमन्यते ।

वायुः शुनः सूर्यएवात्रसीरः शुनासीरौ वायुसूर्यौ वदन्ति ।
शुनासीरं यास्क इन्द्रं तु मेने सूर्येन्द्रौ तौ मन्यते शाकपूणिः ॥ ५ । ८ ॥

अर्थात् आचार्या निरुक्तकृतः शुनासीरौ वायूसूर्यौ वदन्ति । परं यास्क एतेन पदेन इन्द्रं मनुते । शाकपूणिः सूर्येन्द्रौ मनुते ।

शौनकादिभिराचार्यै र्देवता बहुधेरिता ।
इडस्पतिं शाकपूणिः पर्जन्याग्नी तु गालवः । ५ । ३९ ।

अर्थात् प्रसुष्टुतिः, इति ऋचि शौनकादयो बहुदेवतां वदन्ति । शाकपूणिः इडस्पतिं तथा गालवः पर्जन्याग्नी मन्यते ।

महानैन्द्रं प्रत्नवत्यां अग्निं वैश्वानरं स्तुतम् ।
मन्यते शाकपूणिस्तु भार्म्यश्वश्चैव मुद्गलः । ६ । ४६ ॥

अर्थात् महानैन्द्रं प्रत्नवत्यामृचि शाकपूणिर्वैश्वानरमग्निं स्तुतं मन्यते । तथा तमेव भार्म्यश्वो मुद्गलोऽपि मन्यते ।

ऋत्विजो यजमानं च शाकपूणिस्तु मन्यते ।
होताध्वर्युस्तथोद्गाता ब्रह्मा चेति वदन्ति तान् । ७ । ७० ।

के पञ्चजना इत्यस्मिन् विषये शाकपूणिः, चतुरो ऋत्विजो यजमानञ्चेति पञ्चजनान् मन्यते ।

" तस्मात्सा देवता तत्र सूर्यमेके प्रचक्षते
मुद्गलः शाकपूणिश्च आचार्यः शाकटायनः ॥ ८ । ९० ।

आयङ्गौरिति सूक्ते सार्पराज्ञी देवता भवति । तत्र एके सूर्यं मन्यन्ते । मुद्गल–शाकपूणि–शाकटायनाः प्रत्यृचं त्रिस्थानाधिष्ठितां वाचं स्तुतां मन्यन्ते । इत्थं शाकपूणिशब्दस्तु बृहद्देवतायां सप्तकृत्वः पठितः । रथीतर शब्देन पुराणेषु शाकपूणिरेवोच्यते इति शाकपूणिपरिचये एव प्रमाणानि दत्तानि । अतः रथीतर शब्दस्य बृहद्देवतायां त्रिकृत्वः पाठोऽपि शाकपूणिकृते वर्तते । अतोरथीतरमतानि दीयन्ते ।

चतुर्भ्य इति तत्राहुर्यास्कगार्ग्यरथीतराः ।
आशिषोऽथार्थवैरूप्यात् वाचः कर्मण एव च । १ । २६ ।

अस्याशयो द्रष्टव्यो हि गार्ग्यनिरुक्ते ।

एकादश्या तु नासत्यौ द्वादश्याग्निमिमं पुनः ।
पृथक् पृथक् स्तुतीदं तु सूक्तमाह रथीतरः ॥ ३ । ४० ॥

आप्री सूक्ते एकादश्या रथीतरो नासत्यौ स्तुतौ मन्यते । द्वादश्या अग्निम् । इदं सूक्तं पृथक् स्तुति पृथक् देवतावादि ह्यस्य मतेन वर्तते ।

निपातभाजं सोमं च अस्यां रथीतरोऽब्रवीत् ।
ऐन्द्रेषु हि निपातोऽत्र स्तुतोऽग्निररुणेन सम् । ७ । १४५ ।

आपातमन्युः, इति ऋचि सोमः स्तुतः । रथीतरो निपातभाजं सोमं मन्यते अर्थात् ऐन्द्रे मन्त्रे सोमः स्तुतोऽप्यप्रधानः । इन्द्र एव प्रधान इति मन्यते ।

निरुक्तस्वरूपम्

१—शाकपूणिः संकल्पयाञ्चक्रे सर्वा देवता जानामीति तस्यै देवतोभयलिङ्गा प्रादुर्बभूव तां न जज्ञे तां पप्रच्छ विविदिषाणि त्वेति। सा तस्मा एतामृच मादिदेशैषा मद्देवतेति ।२।८।। एकविंशति पृथिवि नामधेयनिर्वचनप्रसङ्गे निर्ऋतिपदे—तत्र निर्ऋतिर्रमणात्–निविष्टानि रमन्तेऽस्यां भूतानि इति निर्ऋतिः पृथिवी – ऋच्छतेः कृच्छ्रापत्तिरितरा–नारकीयदुखसंज्ञिका पाप्मा ।। सा पृथिव्या सन्दिह्यते । इत्यनेन सन्देहसामान्येनोदाहृतमिदमत्रमतं शाकपूणेः ।

२—विद्युत्तडिद् भवतीति शाकपूणिः सा ह्यवताडयति दूराच्च दृश्यते । ३ । ११ । तडित् शब्द निर्वचनप्रसङ्गे — तडिदित्यन्तिकवधयोः संसृष्टकर्म ताडयतीति सतः—त्वया वयमिति मन्त्रे तडित् शब्दस्य अन्तिकोऽर्थो गृहीतः । परं शाकपूणिस्तु विद्युदेव तडित् भवति इति मन्यते । सा विद्युत् आहन्त्यशनिरूपेण दूराच्च दृश्यते ।

३—महान् कस्मात्–मानेनान्याञ्जहातीति शाकपूणिः । मंहनीयो भवतीति वा ।। ३।१३।। महान् इति पदनिर्वचने यास्कः ।। शाकपूणिमतमेव स्वीचकार । मानेन—अन्यान् अतिक्रामति पूजनीयो वा भवति ।

४—ऋत्विक् कस्मात्– ईरणः – ऋग्यष्टा भवतीति शाकपूणिः ऋतुयाजी भवतीति वा । ३ । १९ ।। ईरण शब्दस्तु संस्तुतीनामीरयिता ऋत्विग्भवतीति प्रवृत्तिनिमित्तकः । व्युत्पत्तिस्तु – ऋग्भिर्यजतीति ऋत्विग्भवतीति शाकपूणिर्ब्रवीति । ऋतौ कालविशेषे याजी यजनशीलो वेति— ऋत्विक् ।

५—योनिः शितामिति शाकपूणिः विषितो भवति ।४।३।। शिताम इत्यनवगतपद-निर्वचनप्रसङ्गे यास्कस्तु—बाहू शिताम शब्देन मन्यते। परं शाकपूणिस्तु योनिमेव शिताम वक्ति – विषितो भवति। योनि शब्देनात्र गुदएवाभिप्रेतः, अनवदानिया योनिः। स गुदस्तु विषितो व्याप्तो भवति पुरीषेण । श्रोणितः शितामत इत्यत्र श्रोण्यनन्तरमेव शिताम पदमायाति । अतस्स एव भवति ।

६—कन्ययोरधिष्ठानप्रवचनानि सप्तम्या एकवचनान्तानि इति शाकपूणिः ।४।१५। अयमाशयः — विद्रधे नवे द्रुपदे अर्भके इति एतानि कनीनकेवेति मन्त्रे पठितानि चत्वारि पदानि कन्ययोरधिष्ठानप्रवचनानि सप्तम्या एकवचनान्तानीति शाकपूणिराचार्यो मन्यते ।

७—सर्वे क्षियति निगमा इति शाकपूणिः। ५। ३। सोमो अक्षाः इति पद निर्वचनप्रसङ्गे "न यस्य द्यावापृथिवी न धन्वनान्तरिक्षं नाद्रयः सोमो अक्षाः" ऋ. । ८-४-१५-१.

तथा "अनूपे गोमान् गोभिरक्षाः सोमो दुग्धाभिरक्षाः" अत्र सर्वे एते त्रयोऽपि अक्षाः क्षियतिनिगमाः "क्षि निवास गत्योः" इति शाकपूणिराचार्यो मन्यते। एके तु प्रथमस्य अक्षाः शब्दस्य अश्नोतेः, द्वितीयस्य क्षि धातोः, तृतीयस्य क्षरतेः सिद्धिं वदन्ति।

८—स्पष्टं दर्शनायेति शाकपूणिः। ५। १३॥ अप्सरापदनिर्वचने "अप्सरा अप्सारिण्यपि वाप्स इति रूप नामाप्सातेरप्सानीयं भवत्या दर्शनीयं व्यापनीयं वा"—इति यास्कः परं तद्रूपं दर्शनाय स्पष्टं भवतीति शाकपूणिराचार्यो मन्यते।

९—अच्छाभेः, आप्तुमिति शाकपूणिः। ५।२८। अच्छपदनिर्वचने अच्छ इत्येष शब्दोऽभेरर्थे भवति। आप्तुमिति योऽर्थ उक्तः स्यात् स एवार्थोऽच्छेत्यनेनोक्तो भवतीति एवं शाकपूणेराचार्यस्य मतम्।

१०—त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिः ७।१४॥ अग्निपदनिर्वचनप्रसङ्गे यास्कः अग्निः कस्मात्—अग्रणीर्भवति—अग्रं यज्ञेषु प्रणीयते। अङ्गं नयति सन्नममानः अक्नोपनो भवतीति स्थौलाष्ठीविः न क्नोपयति न स्नेहयति। शाकपूणिस्तु त्रिभ्य आख्यातेभ्योऽयमग्निशब्दः सिद्धयति इति मन्यते। इतात्—अक्तात्—दग्धाद्वा नीतात् स शाकपूणिः एतेः (इण् गतौ) इत्यकारमादत्ते। ग् इति "अञ्जूव्यक्तिम्रक्षण कान्तिगतिषु" धातोः अथवा दह् भस्मीकरणे धातोः नीः कृतह्रस्वः (णीञ् प्रापणे) इति धातोरेवमग्निशब्दः सिद्धयति। इति शाकपूणिमतम्।

११—अयमेवाग्निर्वैश्वानर इति शाकपूणिः ७।२३। तत्को वैश्वानर इति प्रश्ने मध्यम इत्याचार्याः। अथासावादित्य इति पूर्वे याज्ञिकाः शाकपूणिस्तु मन्यते यदयमेव पार्थिवोऽग्निर्वैश्वानर इति विश्वानरावेते उत्तरे ज्योतिषी। वैश्वानरोऽयं यत्ताभ्यां जायते। कथं त्वयमेताभ्यां जायते ? इति यत्र वैद्युतः शरणमभिहन्ति। यावदनुपात्तो भवति मध्यसधर्मैव तावद्भवति। उदकेन्धनः शरीरोपशमनः। उपादीयमान एवायं संपद्यते उदकोपशमनः शरीरदीप्तिः। अथादित्यात्—उदीचि प्रथम समावृत्त आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे, यत्र शुष्कगोमयमसंस्पर्शयन्धारयति तत्प्रदीप्यते। सोऽयमेव सम्पद्यते।

१२—त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः ७।२८॥ "स्तोमेन हि दिवीति" मन्त्रे त्रेधाभुवे इत्यस्मिन् अंशे त्रेधाभावाय अग्नेः पृथिव्यामन्तरिक्षे दिवि इति शाकपूणिराचार्यो मन्यते। प्रकृतस्यैव शाकपूणेः पुनर्ग्रहणं स्वपक्षानुस्मृतये।

१३—अयमेवाग्निर्द्रविणोदा इति शाकपूणिः ८। २। क्रौष्टुकिस्तु ब्रवीति—इन्द्र एव द्रविणोदाः पूर्वपक्षहेतवः क्रौष्टुकिनिरुक्ते द्रष्टव्याः। अत्र उत्तरपक्षहेतवो यथा आग्नेयेष्वेव हि सूक्तेषु द्राविणोदसाः प्रवादा भवन्ति "देवा अग्निं धारयन्द्रविणोदाम्" ऋ. १-७-३-१.

यथो एतत् सबलधनयोर्दातृतम इति सर्वासु देवतास्वैश्वर्यं वर्तते। यथो एतत् "ओजसो जातमुतमन्य एनम्" इति चाहेति—अयमप्यग्नि रोजसा बलेन मथ्यमानो जायते तस्मादेनमाह—सहसस्पुत्रं सहसः सूनुं सहसो यहुम्।

यथो एतत् अग्निं द्राविणोदसमाहेति ऋत्विजोऽत्र द्रविणोदस उच्यन्ते हविषो दातारस्ते चैनं जनयन्ति "ऋषीणां पुत्रो अधि राज एषः" य. वाज. सं. ५।४।

यथो एतत् (ऋतुयाजेषु द्राविणोदसाः प्रवादा भवन्ति) तेषां पुनः पात्रस्येन्द्रपानमिति (समाख्या) भवतीति भक्तिमात्रं तद् भवति–यथा वायव्यानीति सर्वेषां सोमपात्राणाम् ।

यथो एतत् सोमपानेन (एनं) स्तौतीति–अस्मिन्नप्येतदुपपद्यते सोमं पिब मन्दसानो गणश्रिभिः । ऋ. ४ । ३ । २५ ।

यथो एतत् "द्रविणोदाः पिबतु द्रविणोदसः", इति अस्यैव तद्भवति "मेद्यन्तु ते" इति ऋचि वनस्पत इत्येनमाहैष हि वनानां पाता वा पालयिता वा । तस्मादग्निर्द्रविणोदा इति सिद्धम् ।

१४—अग्निरिति शाकपूणिः ८ । ५ । इध्मपदनिर्वचने यज्ञेध्म इति कात्थक्यः । शाकपूणिमते अग्निरेवेध्मः ।

१५—अग्निरिति शाकपूणिः ८ । ५ । तनूनपादाज्यं भवति–इति कात्थक्यः नपादित्यनन्तरायाः प्रजाया नामधेयम् । निर्णततमा भवति । तनूरत्र गौरुच्यते । तता अस्यां भोगाः । तस्याः पयो जायते । पयस आज्यं जायते । शाकपूणिस्तु तनूनपादग्निरिति वक्ति । आपोऽत्र तन्व उच्यन्ते । तता अन्तरिक्षे । ताभ्य ओषधिवनस्पतयो जायन्ते । ओषधिवनस्पतिभ्य एष जायते ।

१६ अग्निरिति शाकपूणिः नरैः प्रशस्यो भवति ॥८।६॥ नराशंसो यज्ञ इति कात्थक्यः । नरा अस्मिन् आसीनाः शंसन्ति – शाकपूणिमते अग्निरेव नराशंसः ।

१७ अग्निरितिशाकपूणिः ८–१० । द्वारपदनिर्वचने यज्ञे गृहद्वार इति कात्थक्यः । अग्निरिति शाकपूणिराचार्यो मन्यते ।

१८ अग्निरिति शाकपूणिः ८ । १४ । माध्यमिकस्त्वष्टेत्याहुर्मध्यमे च स्थाने आम्नातः शाकपूणिमते अग्निरेव त्वष्टा ।

१९ अग्निरिति शाकपूणिः ८ । १७ । तत्को वनस्पतिः, यूप इति कात्थक्यः, शाकपूणिस्तु ह्यग्निमेव वनस्पतिं मन्यते ।

२० अग्निरिति शाकपूणिः ८ । १८ ।

२१ त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः १२ । १९ । विष्णुपदनिर्वचने "इदं विष्णुः" इति मन्त्रे त्रेधा पदस्य शाकपूणिमते ह्युक्तार्थः ।

२२ (यत्तु किञ्चिद्बहुदैवतं तद् वैश्वदेवानां स्थाने युज्यते) यदेव विश्वलिङ्गमिति शाकपूणिः । १२ । ४० । यत् किञ्चित् बहुदैवतं मन्त्रजातं तद् वैश्वदेवानां स्थाने युज्यते " इति यास्कमतम् । यत् विश्वशब्दोपेतं मन्त्रजातं तदेव वैश्वदेवानां स्थाने विनियुज्यते न बहुदेवतामात्रेणेति शाकपूणिराचार्यो मन्यते ।

२३ परिशिष्टे १३. ११ । कतमत्तदेतदक्षरमोमित्येषा वागिति शाकपूणिः ।

स्थौलाष्ठीविनिरुक्तम्

अस्य नाम्नो निरुक्तिः–स्थूलाष्ठीवतः पुत्रः स्थौलाष्ठीविः । बाह्वादिभ्यश्च पा० ४।१।९६। इत्यनेन इञ् पृषोदरादित्वाट्टिलोपः । अस्य विषये परिचयो नोपलभ्यते ।

निरुक्तस्वरूपम् —अक्नोपनो भवतीति स्थौलाष्ठीविः। ७। १४। अग्निपदनिर्वचन प्रसङ्गे, अयमग्निः अक्नोपनो भवति क्नोपन शब्दस्य स्नेहनमित्यर्थः। क्नूयी शब्दे उन्दे च–इ धातोः नञि समासे अक्नोपन इति–न क्नोपयति न स्नेहयति विरुक्षीकरोति। सर्वंवस्तुगतमार्द्र स्निग्धताञ्च भस्मीकृत्य विरुक्षीकरणमेवाग्नेः स्वभावः, यास्कस्तु ह्यग्निशब्दस्य निर्वचनं करो —अग्रणीर्भवति–अग्रं यज्ञेषु प्रणीयते अङ्गं नयति सन्नममानः। त्रिभ्य आख्यातेभ्यो जायत इ शाकपूणिः।

एतेरिति स्थौलाष्ठीविः १०। १। अनर्थको वकारः। वायुपदनिर्वचन प्रसङ्गे यास्कः:— वायुर्वातेर्वेतेर्वा स्याद् गतिकर्मणः। अर्थात् वायुशब्दः (वा गति गन्धनयोः) इति धातोरथवा (वी गति व्याप्तिप्रजनन कान्त्यसन खादनेषु) इति गतिकर्मणो वायुशब्दस्सिद्ध्यति। अत्र स्थौलाष्ठीवि नामकाचार्यस्य मतं यत् "इण् गतौ" इति धातोरयं वायु शब्दः सिद्ध्यति वकारश्चात्रानर्थकः एतिह्यसावन्तरिक्षमित्यायुः सन् वर्णोपजनात् वायुः — एवं सततमसौ वाति गच्छतीति वायुः इत्थं यास्कीयनिरुक्तेऽस्योद्धरणद्वयमेवोपलभ्यते।

———

स्याद्वादमञ्जरि-विधूननम्

श्रीराजेन्द्रचौधरी

अथ साम्प्रतमक्षपादप्रतिपादित-पदार्थानां सर्वेषां चतुर्थपुरुषार्थं प्रत्यसाधकतमत्वे वाच्येऽपि तदन्तः पातिनां छलजातिनिग्रहस्थानानां परोपन्यासनिरासमात्रफलतया अत्यन्तमनुपादेयत्वात् तदुपदेशदातुर्वैराग्यमुपहसन्नाह **जैनाचार्यः**—

" स्वयं विवादग्रहिले वितण्डा-
पाण्डित्यकण्डूलमुखे जनेऽस्मिन् ।
मायोपदेशात्परमर्म भिन्द-
न्नहो विरक्तो मुनिरन्यदीयः ॥ "

[स्या. म. का. १० पृ. ५४-५५] इत्यादिना—

अस्यार्थः—

अहो ! मुनिः— अक्षपादर्षिः, विरक्तः— वैराग्यवान् । अन्यदीयः— परीयः, परमर्मभिन्दन्— परमर्माणि व्यथयन् । कस्मात्—मायोपदेशात् । अस्मिन्— प्रत्यक्षोपलक्ष्यमाणे जने । स्वयं—परोपदेशनिरपेक्षमेव । विवादग्रहिले— विरुद्धः परस्परकक्षीकृतपक्षाधिक्षेपदक्षः वादः वचनोपन्यासः विवादः (छलजातिप्रधानात्मकः) तेन ग्रहिल इव ग्रहगृहीत इव । तथा **वितण्डा—परपक्षस्थापनाहीनं वाक्यम् ।**

वस्तुतः— अपरामृष्टतत्त्वातत्त्वविचारं मौखर्यं वितण्डा, तत्र यत्पाण्डित्यमविकलं कौशलं तेन कण्डूलमिव मुखं लपनं यस्य स तथा तस्मिन्निति ।

अत्रामुना पद्यनाक्षपादर्षिमाचिक्षेप हेमचन्द्राचार्यः । **अत्रायं विमर्शः—**

किन्नाम प्रमाणत्वमिति विचारे प्रमाकरणत्वन्तदित्युत्तरे प्रदत्ते, तत्र प्रमा च " यथार्थानुभव एवेति " स्थितावपि " **अर्थोपलब्धिहेतुः प्रमाणमिति** " सिद्ध्यति ।

परञ्चेदं लक्षणम्परमते न विचारसहम् । यतोऽस्मिँल्लक्षणे कर्तृकर्मादेरपि प्रमाणत्वापत्तिः दुर्वारा स्यात् ।

यदि कर्तृकर्मादिविलक्षणं करणमेव हेतुशब्देन विवक्षितं चेत्, तदा " तज्ज्ञानमेव युक्तम् " । न चेन्द्रियसन्निकर्षादिकन्तत्, साधकतमस्यैव करणत्वात् । तथा च यस्मिन् सत्यर्थ उपलभ्यते

तत्करणमिति पर्यवसन्नम्। अत्र दुग्धभोजनादेरपि प्रमाणत्वापत्तिवारणायाव्यवहितफलस्यैव तत्व म्बोध्यम्।

तन्न समीचीनम् ज्ञानादन्यत्र प्रमाणत्वम्। अन्यत्रोपचारात्। तथाप्यव्यवहितफलत्वेन साधक तमत्वं ज्ञानस्यैवेति न तत्सम्यग्लक्षणम्, अपि तु स्वपरव्यवसायि ज्ञानमेव प्रमाणमिति वास्तवि लक्षणम्।

एवम्प्रमेयस्यापि– "आत्मशरीरेन्द्रियादि–" भेदाद् द्वादशविधत्वमुक्तन्तार्किकैस्तदपि सम्यक्, शरीरादीनामात्मन्येवान्तर्भावात्। अत्रात्मनः संसारिणश्च तदविष्वग्भावादिदम्बोध्यम्।

आत्मनः प्रमातृत्वेन प्रमेयत्वाभावात्। इन्द्रियबुद्धिमनसाञ्च करणत्वात् प्रमेयत्वाभावः द्वेषाश्च– रागद्वेषमोहस्वरूपाः, ते च प्रवृत्तेर्न पृथग् भवितुमर्हन्ति। यतस्ते–वाङ्मनःकायव्यापारस्य शुभा शुभफलस्य विंशतिविधस्य प्रवृत्तिशब्दवाच्यत्वमामनन्ति। रागादिदोषाणाञ्च मनोव्यापारात्मकत्व म्प्रसिद्धमेव।

दुःखस्य शब्दादीनामिन्द्रियार्थानाञ्च फल एवान्तर्भावः।

प्रेत्यभावापवर्गयोः पुनरात्मन एव परिणामान्तरापत्तिरूपत्वान्न पार्थक्यमात्मनः सकाशादु चितम्। तदेवं द्वादशविधं प्रमेयमिति वाग्विस्तारमात्रम्।

एतन्मते "**द्रव्यपर्यायात्मकं वस्तु प्रमेयमिति**" प्रमेयस्य समीचीनं लक्षणम्।

एवं संशयादीनामपि तत्वाभासत्वं प्रेक्षावद्भिरनुप्रेक्षणीयम्।

परञ्चैतन्मतन्न कथमपि विचारयोग्यम्। यतोऽत्रायं विचारः– यदि ज्ञानस्यैव प्रमाणत्व मिष्टन्तदेन्द्रियादेः का दशा? **अर्थात्** – रूपप्रत्यक्षम्प्रति चक्षुरेव करणम्, चाक्षुषप्रमाम्प्रति तस्य करणत्वात्, साधकतमस्यैव करणत्वस्येष्टत्वात्। स्थितावस्यां चक्षुषः करणत्वमत्र केनापि न निवर्त्यम्, यतस्तमन्तरा रूपविशिष्टस्य द्रव्यस्य प्रत्यक्षन्न केनापि कदापि कुत्रापि कथमपि वा कर्तुं शक्यमित्य कामेनापि रूपरूपिणोः प्रत्यक्षम्प्रति चक्षुषः करणत्वात् प्रमाणत्वमभ्युपेयमेव।

नचात्रेन्द्रियसन्निकर्षादेरपि करणत्वं कथन्नेति वाच्यम्, इन्द्रियसन्निकर्षादेरवान्तरव्यापारत्वेनात्र कारणत्वस्य वाच्यत्वात्। तत्र यदीन्द्रियादेः करणत्वन्न स्वीकृतञ्चेत् तर्हि सर्वजनसिद्धप्रतीतेरपला को निवारयेत्।

अपि च—स्वपरव्यवसायिज्ञानस्य प्रमाणत्वे कस्मादपेक्षया कस्य ज्ञानस्य प्रमात्वम् कस्य च प्रमाणत्वमिति विचारणीयम्। न हि तस्यैव ज्ञानस्य स्वम्प्रति प्रमात्वम्प्रमाणत्वञ्चेष्टम्। तत्र कर्तृत्व- करणत्वयोर्विरोध इव प्रमात्वप्रमाणत्वयोः परस्परं विरोधात्।

अर्थात्—यथा तम्प्रत्येवैकस्य कर्तृत्वं करणत्वञ्च विरुद्धन्तथैव चाक्षुषप्रमाम्प्रति तत्प्रमायाः करणत्वं सर्वथा विरुद्धमेव।

अतः —चाक्षुषप्रमाम्प्रति चक्षुष एव करणत्वन्न तज्ज्ञानस्य। एवं तज्ज्ञानस्यैव प्रमात्वन्न तत्करणस्येति न कश्चिद्विरोध आपतति।

एवं— "शरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाणा" मात्मनि नान्तर्भावो भवितुमर्हति। आत्मनस्तेषामपेक्षया सर्वथा भिन्नत्वात्। आत्मनः प्रमातृत्वेऽपि प्रमेयत्वे न कश्चिद्विरोधस्तस्य चेतनत्वात्, इतरेषाञ्चाचेतनत्वात् प्रमेयत्वमेव, न प्रमातृत्वमिति महान् भेदस्तयोर्बोध्यः।

अपिच—यथा धर्मधर्मिणोः गुणगुणिनोश्च महान्भेदः, तथैव शरीरात्मनोश्चात्यन्तो भेदः सिद्ध एवेति परस्परन्तयोरैकान्तिके भेदे कथमविष्वग्भावो भवेत्तयोरिति।

यच्चोक्तम्— "इन्द्रियबुद्धिमनसान्तु" करणत्वात् प्रमेयत्वाभावः— इति। **तदपि तुच्छम्** —

यतो येषां करणत्वन्तेषान्नास्ति प्रमेयत्वमित्यत्र नियामकाभावात्। एकत्र करणत्वप्रमेयत्वयोरविरोधात्। तथाचेन्द्रियबुद्धिमनसां करणत्वेऽपि प्रमेयत्वे स्वीकृते न कश्चिद्विरोध इति।

अत्रायमाशयः—प्रमाविषयीभूतं प्रमेयं, करणञ्चासाधारणं कारणमेव। तथाच तयोः को विरोधः। व्यापकत्वात् प्रमेयत्वस्य प्रमातृप्रमाणप्रमेयेषु च सत्वे बाधकाभावो बोध्यः। करणत्वस्य च तदपेक्षया व्याप्यत्वमिति न तयोर्विरोधः। **तथाचेन्द्रियादौ प्रमेयत्वमस्त्येवेति भावः।**

एवं दोषाश्च—रागद्वेषमोहस्वरूपा अपि न प्रवृत्तिस्वरूपाः, किन्तु तन्मूलका तदनुरूपैव प्रवृत्तिः शास्त्रनिर्धारितातो दोषाः प्रवृत्तेर्न पृथग्भवितुमर्हन्ति इति कथनमनर्थकमेव।

अपि च—प्रेत्यभावापवर्गयोः पुन आत्मन एव परिणामान्तरापत्तिरूपत्वान्न पार्थक्यमात्मनः सकाशादुचितमिति परास्तम् यतस्तयोर्नात्मनः परिणामान्तरापत्तिः येनायन्दोषः स्यात्।

अत्रायम्भावः—आत्मनो नोत्पत्तिः न वा मृत्युरेवेति स्थितौ कथमात्मनः परिणामान्तरापत्तिः संभवेत्।

"न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः। अजो नित्यः शाश्वतोऽयम्पुराणो न हन्यते हन्यमाने शरीरे।" इत्यादिना तथैव निश्चयात्।

प्रेत्यभावशब्दार्थश्च—प्रेत्य–मृत्वा, भावः–जननम् उत्पत्तिर्वा। आत्मनोऽपि यदि जन्ममरणादि स्यात् तदा "तत्परिणाम" इति कथनं सम्यग्भवेत्। किन्त्वत्र यतो न जननाद्यात्मन अतो न तत्परिणाम इति।

एवमपवर्गोऽपि नात्मस्वरूपः, तस्य चरमदुःखध्वंसरूपत्वात्, शरीरावच्छेदेनात्यन्तिकात्ममनः संयोगाभावे सम्पाद्यमानत्वाच्च।

यद्यपि दुःखमपि फलान्तर्गतमेव तथापि मुख्यत्वेन दुःखस्यापि प्रमेयत्वमुपात्तम्।
तथा च द्वादशविधम्प्रमेयमिति सिद्धम्।

अत्र प्रमेयस्य "**द्रव्यपर्यायात्मकं वस्तु प्रमेयमिति**" यल्लक्षणम्परैरुरीकृतम् —

तत्तु सर्वथैव**विचारानर्हम्** — यतोऽस्मिल्लँक्षणे केवलं द्रव्यस्यैव प्रमेयत्वम्भवितुमर्हति, तदतिरिक्तानां बुद्ध्यादीनामिति । तच्च सर्वथा तर्कशास्त्रविरुद्धम् । **अतो लक्षणमिदन्न समीचीन मिति भावः ।**

एवं तर्कशास्त्रोक्तानि विविधानि सोदाहरणानि छलजातिनिग्रहस्थानानि विवर्ण्याक्षपाद मुनिमाचुक्रोश परः ।

तत्तु **सर्वथैवाज्ञानावृतमेव ।** यतः – प्रमाणप्रमेयादिषोडशविधानाम्पदार्थानान्तत्वज्ञानात् मोक्षावाप्तिस्तर्कशास्त्रसम्मता । इयञ्च तदीयगौतमसूत्रादेवावगम्यते, तथाच तादृशषोडशपदार्था न्तर्गतानां छलजातिनिग्रहस्थानानामपि तत्त्व (सम्यक्) ज्ञानात्–मोक्षावाप्तिर्भविष्यत्येव, न तत्त्रिविधपदार्थरहितानामेव पदार्थानां ज्ञानादवाप्तिर्मोक्षस्येति स्थितौ कस्यचिदंशस्य परित्यागा त्कस्यचिदंशस्य च सङ्ग्रहणादर्धजरतीयत्वमेवापतेत् ।

अतस्तर्कशास्त्रोक्तम्मतमेव सम्यक् प्रतिभाति । तथाचाक्षपादर्षे : वैराग्यमुपहसञ्जैनाचार्य स्वयमेवोपहास्यः सञ्जातः इति महती विचित्रागतिः समुत्पन्ना । **इति स्याद्वादमञ्जर्युक्तदशमकारि काप्रदत्ताक्षेपपरिहारः समाप्तः ।**

अधुना मीमांसकभेदाभिमतं वेदविहितहिंसाया धर्महेतुत्वमुपपत्तिपुरस्सरं निरस्यन्नाह परः—

" न धर्महेतुर्विहितापि हिंसा, नोत्सृष्टमन्यार्थमपोद्यते च ।
स्वपुत्रघातान्नृपतित्वलिप्सा सब्रह्मचारिस्फुरितं परेषाम् ।।

(स्या. म. का. ११ पृ. सं. ६१)

अत्रायमर्थः—वेदविहिता हिंसा धर्महेतुर्न भवति । परार्थमुत्सृष्टमपि नापोद्यते । परेषां-भवत्प्रणीतवचनपराङ्मुखानां, स्फुरितं–चेष्टितम् । स्वपुत्रघातान्नृपतित्वलिप्सासब्रह्मचारि निजसुतनिपातनेन राज्यप्राप्तिमनोरथसदृशम् ।

यथा किल कश्चिदविपश्चित्पुरुषः परुषाशयतया निजमङ्गजं व्यापाद्य राज्यश्रियं प्राप्तुमीहते, न च तस्य तत्प्राप्तावपि पुत्रघातपातककलङ्कपङ्कः क्वचिदपयाति – एवं वेदविहितहिंसाया देवतादिप्रीति सिद्धावपि हिंसा-समुत्थं दुष्कृतं न खलु पराहन्यते ।

एवं तेषां दुर्वादिनां वेदविहितहिंसायामनुष्ठितायामपि देवतादिपरितोषणे मनोराज्यमेव । न पुनस्तेषामुत्तमजनपूज्यत्वमिन्द्रादिदिवौकसां च तृप्तिः । तस्य निराक्रियमाणत्वात् । **अत्र मीमांसकमतेऽयं विचारो यत्**—या हिंसा गार्ध्याद् व्यसनितयावा क्रियते, सैवाधर्मानुबन्धहेतुः प्रमादसम्पादितत्वात् शौनिकलुब्धकादीनामिव । किन्तु वेदविहिता या हिंसा सा नाधर्महेतुरपि तु धर्महेतुः देवतातिथिपितॄणां प्रीतिसम्पादकत्वात् तथाविधपूजोपचारवत् ।

नच तत्प्रीतिसम्पादकत्वमसिद्धम्, कारीरीप्रभृतियज्ञानां स्वसाध्ये वृष्ट्यादिफलेऽव्यभिचारेण तत्प्रीणितदेवताविशेषानुग्राहकत्वस्य कल्पनात् ।

अतिथिप्रीतिस्तु– मधुपर्कसंस्कारादिसमास्वादजा प्रत्यक्षोपलक्ष्यैव ।

पितॄणामपि तत्तदुपयाचितश्राद्धादिविधानेन प्रीणितानां स्वसन्तानवृद्धिविधानं साक्षादेव वीक्ष्यते। **"स्वर्गकामः सोमेन यजेत" "पशुना यजेत" "पशूनालभेत"** इत्यादिभिः बहुविधाभिः श्रुतिभिश्च तथैव ज्ञायते। तथाहि–देवप्रीत्यर्थमश्वमेधादिविधिः प्रतीत एव।

अतिथिविषयस्तु – विधिः "महोक्षं वा महाजं वा श्रोत्रियाय प्रकल्पयेत्" इत्यादिः।

पितृप्रीत्यर्थस्तु "द्वौ मासौ मत्स्यमांसेन त्रीन्मासान्हारिणेन तु।
औरभ्रेणाथ चतुरः शाकुनेनेह पञ्च तु॥" इत्यादिः।

इति मीमांसशास्त्रसिद्धान्तसिद्धविषयाञ्जैनाचार्यः प्रतिविधत्ते—**न धर्महेतुरित्यादिना**।

अत्रायम्भावः–भवदुक्ता वेदविहितापि हिंसा न धर्महेतुरपि तु सर्वथाऽधर्महेतुरेव। यतः स्ववचनविरोधः प्रकट एव। **तथाहि** – हिंसा चेद्धर्महेतुः कथम्, धर्महेतुश्चेद्धिंसा कथम्? नहि भवति माता च वन्ध्या चेति।

न च तत्र हिंसा कारणं, धर्मस्तु तत्कार्यम् इति वाच्यम्, हिंसाया धर्महेतुत्वे तपोविधानदान-ध्यानादीनान्तदकारणत्वप्रसङ्गात्।

यदि च वेदविहितहिंसायाः धर्महेतुत्वं स्वीक्रियते, तदा तत्र प्रष्टव्यः—किं तस्याः धर्महेतुत्वं, वध्यजीवानां मरणाभावेन, मरणेऽपि तेषामार्तध्यानाभावात्सुगतिलाभेन वा? नाद्यः प्राणत्यागस्य तेषां साक्षादवेक्ष्यमाणत्वात्। नापरः – परचेतोवृत्तीनां दुर्लक्षतयार्तध्यानाभावस्य वाङ्मात्रत्वात्। प्रत्युत हा कष्टम्? न कोऽपि कारुणिकः शरणं ममेति स्वभाषया विरसमारसत्सु तेषु वदनदैन्यनयनतरल-तादीनां लिङ्गानां दर्शनात् दुर्ध्यानस्य स्पष्टमेव निष्टङ्क्यमानत्वात्।

अथ यथायः पिण्डो गुरुतया मज्जनात्मकोऽपि तनुतरपत्रादिकरणेन संस्कृतः सन् जलोपरि-प्लवते, यथा च मारणात्मकमपि विषं मन्त्रादिसंस्कारविशिष्टं सत् – गुणाय जायते, यथा वा दहन-स्वभावोऽप्यग्निः सत्यादिप्रभावप्रतिहतशक्तिः सन्न प्रदहति।

— एवं मन्त्रादिविधिसंस्कारान्न खलु वेदविहिता हिंसा दोषाय। नच तस्याः कुत्सितत्वं शङ्कनीयम्, तत्कर्तॄणां याज्ञिकानां लोके पूज्यत्वदर्शनात्।

तदेतन्निषेधति जैनाचार्यः — वैषम्येण दृष्टान्तानामसाधकतमत्वात्। अयः पिण्डादयश्च पत्रादिभावान्तरापन्नाः सन्तः सलिलतरणादिक्रियासमर्थाः। न च वैदिकमन्त्रसंस्कारविधिनापि विशस्य-मानानां पशूनां काचिद्वेदनानुत्पादादिरूपा भावान्तरापत्तिः प्रतीयते।

अथ तेषां वधानन्तरं देवतापत्तिर्भावान्तरमस्त्येवेति चेत् – किमत्र प्रमाणम्? **न तावत् प्रत्यक्षम्**, तस्य सम्बद्धवर्तमानार्थग्राहकत्वात्। तथा हि – **"सम्बद्धं वर्तमानञ्च गृह्यते चक्षुरादि-नेति"** वचनात्तस्य निश्चयात्।

नाप्यनुमानम्, तत्प्रतिबद्धलिङ्गानुपपत्तेः। **नाप्यागम एव प्रमाणम्**, तस्याद्यापि विवादास्पदत्वात्। **अर्थापत्युपमानयो**स्त्वनुमानान्तर्गततया तद्दूषणेनैव गतार्थत्वमित्यादि **यदुक्तन्तन्न रुचिकरम्** यतः नायन्नियमः – यत्सर्वविधापि हिंसाऽधर्महेतुरिति।

अत्रेदं विचारणीयम्––यदि वेदविहितापि हिंसा – अधर्महेतुरेव स्यात्, तदा वैदिकलौकिकहिंसयोः को भेदः। आचार्योच्चारितविहितमन्त्रादेश्च किम्प्रयोजनम्? तस्योपयोगस्य च किम्महत्वम्।

अतः सत्काले सद्व्यक्तिद्वारा सन्मन्त्रादिप्रयोगेण ज्ञायते यद्वैदिकी हिंसाऽधर्माय न प्रभवति, किन्तु धर्मायैव "**पशुना यजेत**" इत्यादिविधिवाक्येन यम्पशुमुद्दिश्य यागो विधीयते तस्य पशोस्तत्कर्तुश्च स्वर्गावाप्तिः भवति–इति शास्त्रानुसारेण निश्चीयतेऽतो वैदिकी हिंसा न दोषायालम्।

अपि "**चेदं** सर्वथा सत्यन्नहि भवति माता च वन्ध्या चेति" किन्त्वत्र दृष्टान्तदार्ष्टान्तिकयोः महान् भेदः। यथा स्त्रीत्वविशिष्टासु सर्वासु स्त्रीषु स्त्रीत्वस्य विद्यमानत्वेऽपि मातृभगिन्योर्महान्भेदः दरीदृश्यते, तथैव मातृवन्ध्ययोरपि सर्वथा भिन्नत्वमेव सुनिश्चितम्।

एवमेव हिंसात्वविशिष्टासु बहुविधासु हिंसासु हिंसात्वस्य सत्वेऽपि वैदिकलौकिकभेदाच्च हिंसायाः द्वैविध्येऽपि पुनस्तत्र कायिकवाचिकमानसिकभेदाच्च त्रिविधासु हिंसासु परस्परभिन्नत्वन्निश्चितमेवावसेयम्। तत्र भवतु लौकिकी हिंसा दोषाय किन्तु या वैदिकी हिंसा सा नाधर्मायापि तु–अभ्युदयायैवेति को दोषः?

अपि च "न च धर्मो हिंसात एव भवतीति प्रातीतिकम्, तपोविधानदानध्यानादीनां तदकारणत्वप्रसङ्गात्" इति यदुक्तं **तन्न मनोरमम्**, यत इदन्तदा सुशोभनम्, यदा धर्मो हिंसात एव भवतीति कथनं सत्यं स्यात्। परञ्च वैदिकी हिंसा नाधर्मायेति कथनात् कथमिदं सम्यक् कथमपि स्यादिति विज्ञैर्विभावनीयम्।

अतः स्वकपोलकल्पितकल्पनयैवान्यद्भुक्तमन्यद्वान्तमिति रीत्या स्वेच्छया प्रलपञ्जैनाचार्यः स्वयमेवोपहासास्पदो भवतीति कस्यात्र दोषः।

अपि च– वेदविहिताया हिंसाया धर्महेतुत्वे स्वीकृते त्रयो दोषास्तैरुद्भावितास्तेऽप्यकिञ्चित्करा एव। यत **आद्ये** प्राणत्यागस्य साक्षादवेक्ष्यमाणत्वेऽपि तेषां वास्तविको मरणाभाव एव, पाशविकशरीरादेस्सम्बन्धविच्छेदेऽपि दैविकशरीरादि–लाभात्। यद्यपि शरीरादिसम्बन्धविच्छेद एव मरणमिति यागीयपशूनामपि तादृङ्मरणम्भवत्येव तथापि तत्काल एव पूर्वशरीरत्यागपूर्वकस्यापरस्योत्कृष्टशरीरस्य संग्रहणेन तेषाम्मरणाभाव एव बोध्यः।

द्वितीये च "**वदतो व्याघातः**" एव तन्मते। यतः परचेतोवृत्तीनां दुर्लक्षतयार्तध्यानाभावस्य वाङ्मात्रत्वात्। प्रत्युत हा कष्टम्? न कोऽपि कारुणिकः शरणं ममेति वाक्ययोर्विरोधः स्पष्ट एव प्रतिभाति।

अत्रायम्भावः– यदि परचेतोवृत्तीनां दुर्लक्षतयार्तध्यानाभावः वाङ्मात्रमेव स्यात्, तदा हा कष्टम्? न कोऽपि कारुणिकः शरणमिति तच्चेतोवृत्तीनां कथं बोधः इति विचारणीयः।

अत्रेदं बोध्यम्– यदेकत्र परचेतोवृत्तयः दुर्लक्ष्याः अपरत्र हा कष्टमिति कथनेन ताः सुलक्ष्याः इति यदि मान्यं स्यात्तदा समायातार्धजरतीयता। यत एकत्र तदेव मान्यमपरत्र च तदमान्यमिति रीत्यार्धजरतीयतापत्तिर्दुर्वारा। **अतो द्वितीयः पक्षोऽप्यकिञ्चित्कर एव।**

अपि च–यथायः पिण्डादयः पत्रादिभावान्तरापन्ना सन्तः सलिलतरणादिक्रियासमर्थाः भवन्ति, तथैव वैदिकमन्त्रसंस्कारविधिनापि यागीपयशूनां वेदतानुत्पादादिरूपा देवतापत्तिरूपा वा भावान्तरापत्तिः प्रतीयत एव। अत्र न प्रत्यक्षप्रमाणमिति न शङ्कनीयम्, योगिनां ज्ञानिनाञ्च तत्प्रत्यक्षकारित्वात्। "**सम्बद्धं वर्तमानञ्च गृह्यते चक्षुरादिनेति**" नियमस्याल्पमतीनामस्मदादीनाङ्कृते चारितार्थ्यात्।

एवं "यत्र याज्ञिकी हिंसा तत्रावश्यं भावान्तरापत्तिरिति" व्याप्तिबलेनानुमानस्य प्रामाण्ये सम्भवे "नाप्यनुमानमिति" कथनं कथन्नासङ्गतम्।

अपि च– विवादास्पदत्वेनागमप्रमाणस्याकिञ्चित्करत्वम्-कथमपि सम्पादयितुमशक्यम्। यत आगमप्रमाणमन्तरा न केऽपि किञ्चिदपि सम्यक् कार्यं कर्तुमर्हन्ति। विशेषतः—बालकानां वृद्धानान्तु कथैव का, पश्य तावत्– यश्च बालकः स्वजनकन्नापश्यत्, पश्चात् – किञ्चित् समयानन्तरं "मम पिता क्वास्ते" किन्नाम चास्तीति प्रश्ने भ्रात्रादिना तन्नाम्नि समुच्चारिते तस्य यज्ज्ञानमुत्पद्यते जिज्ञासोस्तच्छब्दप्रमाणेनैव सम्भवति, कथमन्यथा तमदृष्ट्वा कथञ्चिदपि तज्ज्ञानं तस्य भवितुमर्हति। **एवं** वृद्धा अपि शिथिलेन्द्रियतया गमनागमनेऽसमर्थत्वात् कस्यचिच्छब्दं श्रुत्वैवाभिलषितमर्थं जानन्ति, इत्यकामेनापि शब्दस्य प्रामाण्यमवश्यमभ्युपगन्तव्यम्भवता। तथा च विवादास्पदत्वेन नागमः प्रमाणमिति कथनं कथन्नासङ्गतम्।

अतो यागीयपशुहिंसा सुगतिकामनया धर्महेतुरेव मन्तव्या।

एवं यथा जिनायतनादिविधाने भवद्भिरपि परिणामविशेषात्पृथिव्यादिवृत्तिजन्तुजातघातोऽपि पुण्याय कल्प्यते तथास्माभिरपि कथन्न यागीयपशुवधः पुण्याय कल्पयितुं शक्यः।

अत्र सत्स्वपि श्रुतिस्मृतिपुराणादिप्रतिपाद्येषु यमनियमादिषु बहुषु विषयेषु विभिन्नान्देवानुद्दिश्य विहिता पशुवधादयः न दोषार्हा इति बोध्याः।

न च जिनायतनादिविधाने संयोगतः कतिपयानाञ्जीवानां वधेऽप्यज्ञानमूलकतयानुषङ्गिकत्वाज्जिनायतननिर्माणेनोत्पन्नधर्मविशेषैस्तद्दोषक्षयाच्च न कोऽपि दोष इतिवाच्यम्, तत्रत्यवधादौ ज्ञाताज्ञाताधर्ममूलकत्वेन दोषस्यानपायात्।

मम मते तु हिंसाजन्यदोषस्य सत्वेऽपि वेदोक्तविहितत्वेन तेषां सुगतिलाभादेवादोषो बोध्यः।

न च वैदिकवधविधाने न कश्चित्पुण्यार्जनानुगुणः गुण उत्पद्यत इति वाच्यम्, विप्रेभ्यः विविधयागाङ्गपुरोडाशादिप्रदानेन पुण्यानुबन्धिनो गुणस्योत्पादात्।

यद्यपि सुवर्णादिप्रदानेनापि पुण्योपार्जनसम्भवः, तथापि पशुवधेन सपुण्यम्भूत्यादिकमप्युत्पद्यत इति विशेषः। "**श्वेतं वायव्यमजमालभेत भूतिकामः**" इत्यादिभिः श्रुतिभिः सत्रे हन्यमानानां छागादीनां प्रेतैः सङ्गत्यभावरूपस्योपकारस्य च विद्यमानत्वात्।

न च ते निहताः पशवः सद्गतिलाभमुदितमनसः कस्मैचिदागत्य तथाभूतमात्मानं कुतो न कथयन्तीति वाच्यम्,

" औषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा ।
यज्ञार्थं निधनम्प्राप्ताः प्राप्नुवन्त्युच्छ्रितम्पुनः ॥ "

इत्याद्यागमप्रमाणेन तत्सद्भावात् ।

अथ यदि हिंसयापि स्वर्गप्राप्तिः स्यात्तर्हि बाढं पिहिता नरकप्रतोल्यः । एवं शौनिकादीनामपि स्वर्गप्राप्तिप्रसङ्गात् । **यथा चाह परर्मषिः—**

"यूपं छित्वा पशून् हत्वा कृत्वा रुधिरकर्दमम् ।
यद्येवं गम्यते स्वर्गे नरके केन गम्यते ॥ "

किञ्च—अपरिचितास्पष्टचैतन्यानुपकारिपशुहिंसनेनापि यदि त्रिदशपदप्राप्तिस्तदा परिचित-स्पष्टचैतन्यपरमोपकारिमातापित्रादिव्यापादनेन याज्ञिकानामधिकतरपदप्राप्तिः प्रसज्येतेति चेन्न, शब्द-प्रमाणादेव वस्तुतत्वसिद्धौ स्वकपोलकल्पितकल्पनाया अनर्हत्वात् ।

अत्रायमाशयः—कुत्र कदा किं कर्तव्यमकर्तव्यञ्चेत्यत्र शास्त्रमेव प्रमाणत्वेनानुग्राह्यम् । तमन्तरा हि कार्यव्यवस्थैव लुप्येत । तथा चोक्तं गीतायाम् ।

" तस्माच्छास्त्रम्प्रमाणन्ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥ "

इत्यादिविविधप्रमाणैः शब्दमूलकत्वेन शास्त्रस्य प्रामाण्यं युक्तम् ।

तथाचात्र शब्दप्रमाणेनैव वेदविहितायाः हिंसायाः धर्महेतुत्वमङ्गीक्रियते । तत्र तस्य यदि प्रामाण्यन्नाङ्गीक्रियेत तर्हि केन प्रमाणेन तस्या औचित्यं विहितत्वञ्च स्वीकार्यम् ।

यदि तस्या वेदोक्तायाः हिंसायाः विहितत्वमेव नाङ्गीक्रियेत चेत् तदा **" मा हिंस्यात् सर्वभूतानि "** इत्यादिनिषेधवाक्यस्य प्रामाण्यं कथं स्यात् । पशुना यजेतेत्यादिविधिवाक्यानां च चारितार्थ्यं कथं स्यात् ।

यदि चात्र शब्दप्रमाणमिष्टन्तदा **" अग्नीषोमीयं पशुमालभेत "** इत्यादिवाक्यानां तेनैव प्रमाणेन विहितत्वं कथन्नाङ्गीकार्यम् । एकत्र तन्मान्यमपरत्र चामान्यमित्यत्र प्रमाणाभावो बोध्यः । अतो यज्ञे छागादिवधस्यैव विहितत्वन्न खलु पित्रादिवधस्येति बोध्यम् ।

यदि चात्र भवता छागादिवधस्य पित्रादिवधसाभ्यमुपवर्ण्यते तदा जिनायतननिर्माणे क्रियतां स्वेच्छया पित्रादिवधः तत्रत्यपिपीलिकादिवधसाम्यात् ।

अपि च नरकपुरप्रतोल्याश्च पिधाने भवतां चिन्ता न कर्तव्या । यतस्तद्द्वारमपिहितमेव प्राप्नुवन्ति तदधिकारिणः, शौनिकादीनाञ्चाविहितत्वादेव तत्र स्वर्गप्राप्त्यभावो बोध्यः ।

अतः स्वदूषितभावनया यथेच्छं जल्पञ्जैनाचार्यः स्वयमेवोपहास्य सञ्जातः इति महदाश्चर्यम् ।

BVBSSMV

अपि च "अचिन्त्योऽयम्मणिमन्त्रौषधीनां प्रभावः" इति वचनाद्वैदिकमन्त्राणामचिन्त्य-प्रभावत्वात् – तत्संस्कृत – पशुवधे भवत्येव स्वर्गप्राप्तिरिति तदप्राप्तौ को हेतुरिति विचारणीयम्।

यद्यपीहलोके विवाहगर्भाधानजातकर्मादिषु तत्तन्मन्त्राणां व्यभिचारोपलम्भाददृष्टे स्वर्गादावपि तद्व्यभिचारोऽनुमीयते, यथा च वेदोक्तमन्त्रसंस्कारविशिष्टेभ्योऽपि विवाहादिभ्योऽनन्तरं वैधव्याल्पा-युष्कतादारिद्र्याद्युपद्रवविधुराः दृष्टान्तगोचरीभूताः उपलभ्यन्ते, तथैव स्वर्गादावपि व्यभिचारानुमानं सत्यमेव कथन्न प्रतीयेतेति चेन्न, तत्र तत्र कर्त्रादिवैगुण्यादेवेष्टसिद्धेरभावात्। तथा चोक्तं— "**कर्तृकर्मसाधनवैगुण्यात्फले वैगुण्यमिति**"।

न च तत्र कर्त्रादिवैगुण्यात्फले वैगुण्यमुत तत्तन्मन्त्राणामसामर्थ्यादित्यत्र किम्मानमिति वाच्यम्, "**युष्मदभिमतानामारोग्गबोहिलाभं समाहिवरमुत्तमं दितु**" इत्यादिवाक्यानां लोकान्तरकल्पित-फलमिवास्मदभिमतवेदवाक्यानामपि परलोकगमनरूपकल्पितफलप्राप्तेरिष्टत्वात्। अत्र स्वपक्षे दोषो-द्धाराय परलोकगमनफलमिष्यते परपक्षे तन्न मन्यत इति महद्वचनवैचित्र्यमिति विवाहादौ कथमुक्तो-पलम्भावकाशः।

नच वेदोक्तायाः हिंसायाः निम्नलिखितविविधप्रमाणैः कथन्न गर्हितत्वमिति – तथाहि—

" देवोपहारव्याजेन यज्ञव्याजेन येऽथवा।
घ्नन्ति जन्तून् गतघृणा घोरां ते यान्ति दुर्गतिम्॥

अपि च— **अन्धे तमसि मज्जामः पशुभिर्ये यजामहे।**
हिंसा नाम भवेद्धर्मो न भूतो न भविष्यति॥

अन्यच्च— **प्राणिघातात्तु यो धर्ममीहते मूढमानसः।**
स वाञ्छति सुधावृष्टिं कृष्णाहिमुखकोटरात्॥"

इत्यादिभिस्तथैव प्रतिपादनादिति वाच्यम्, एकदेशीयप्रमाणानां सर्वत्र नियामकत्वाभावात् – इमे दोषाः वैदिकहिंसातिरिक्तपराः बोध्याः। ऊपर्युक्तश्लोकेषु वैदिकहिंसाया निन्द्यत्वाभावदर्शनात्। यदि वैदिकहिंसास्थलेऽपि दोषः स्यात् तदा पूर्वोक्त "**मग्नीषोमीयं पशुमालभेत**" इत्यादिवाक्यानाम-सामञ्जस्यमापतेत्।

यद्यपि "**प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफले**"—त्यादिवाक्यैरपि निवृत्तिमार्गस्य श्रेयस्करत्वं सिद्ध्यति, तथापि विधिमुखेन प्रवृत्तिमार्गगामिनामनेकवाक्यानाम्प्रतिबन्धकं वाक्यमपि नोपलभते। यत्र चोपलभते तत्र तदतिरिक्तत्वेन संकोचे कृत एवेष्टसिद्धिर्भवतीति बोध्यम्।

अपि च सर्वत्र यदि निवर्तकवाक्यानुसारेणैव कार्यं स्यात्तदा प्रवर्तकवाक्यानाञ्चारितार्थ्यं क्व स्यात्, उपयोगिता च का तत्रामिति मुहुर्मुहुः विचारणीयम्।

अन्यच्च—याज्ञिकानां लोकपूज्यत्वदर्शनाद्यजमानानाञ्च स्वमनोऽभिलषितफलप्राप्तिदर्शनाच्च वैदिकी हिंसा सर्वथा हितकरी सुखकरी च बोध्या। अत्र देवतातिथिपितृप्रीतिसम्पादकत्वादिभिश्च वेदोक्तायाः हिंसायाः परमोपयोगित्वमुपरिष्टादेव ज्ञेयम्। **इदमत्र तत्त्वम्**—यथा च मृतानां जन्तूनां श्राद्धं तृप्तिकारणम्भवत्यन्यथा रौरवनरकादिप्राप्तिरेव प्रेतानान्तदुत्तराधिकारिणाञ्च, तथैवेयं वेदविहिता हिंसापि वेदप्रमाणानुगामिनामास्तिकानां सर्वथा कल्याणदा नानिष्टफलदा ज्ञेया। यतस्तेषान्तेषां विविधानां यज्ञानान्तेनैव मार्गेण प्राशस्त्यमस्ति न केनाप्यपरेण मार्गेणेति विशेषः।

अत्र यज्ञार्थे पशुवधे न कश्चिद्दोष इत्याह मनुः —

" यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
यज्ञश्च भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ॥ ३९ ॥

औषध्यः पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
यज्ञार्थं निधनम्प्राप्ताः प्राप्नुवन्त्युत्सृतीः पुनः ॥ ४० ॥

मधुपर्के च यज्ञे च पितृदैवतकर्मणि ।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ॥ ४१ ॥

एष्वर्थेषु पशून्हिंसन् वेदतत्वार्थविद्द्विजः ।
आत्मनश्च पशूंश्चैव गमयत्युत्तमां गतिम् ॥ ४२ ॥

गृहे गुरावरण्ये वा निवसन्नात्मवान्द्विजः ।
नावेदविहितां हिंसां साप्यपि समाचरेत् ॥ ४३ ॥

या वेदविहिता हिंसा नियतास्मिंश्चराचरे ।
अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ ॥ ४४ ॥

इत्यादिबहुविधैः स्मार्तवचनैश्चापि यागीयहिंसाकरणे न कोऽपि दोष इति ।

अत्रायं विशेषः—यद्यत्र सर्वेषामैकमत्यं स्याद् तदास्तिकनास्तिकयोः को भेदः । विवि मार्गाणाञ्च कावश्यकतेति स्वस्वपक्षे स्वस्वोचितविहितमार्गानुगामिनामेव धर्मोऽभ्युदयो विवि उन्नतयश्च सञ्जायन्ते । तथाहि

"स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।
स्व कर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥
श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।

इत्याद्याः बहुविधयः गीतोक्ताः स्मृतयश्चरितार्थाः भवन्ति । एतेन वैदिकी हिंसापि दोषावहे प्रत्युक्तम् ।

अथ श्राद्धादिविधानं मुग्धजनविप्रतारणमात्रफलमेव कथन्न । यतो हि लोकान्तरम्प्राप्ता जन स्वकृत सुकृतकर्मानुसारेण स्वर्गादौ सुखमुपभुञ्जानाः सन्तः तनयादिभिरावर्जितम्पिण्डम्भोक्तुं क स्पृहयालवो भवेयुः ।

तथाचोक्तम्–" मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम् ।
तन्निर्वाणप्रदीपस्य स्नेहः संवर्द्धयेच्छिखाम् ।

तदन्यकृतत्वात्तस्य जडत्वात्–निश्चरणत्वाच्चेति चेन्न ।

पूर्वशरीरत्यागानन्तरम्प्रेतानां सद्गतिलाभाय पुत्रादिभिः प्रदत्तपिण्डदानस्यानिवार्यरूपेणोद्देश्यता सम्बन्धेन प्राप्तत्वात् ।

अत्रायम्भावः– " वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही " ॥

इत्यादिगीतोक्तैरन्यत्रोक्तैश्च वचनप्रमाणैः ज्ञायते यत्पूर्वशरीरत्यागानन्तरं किञ्चिदपूर्वं शरीरम्परिगृह्य प्रेतो भूत्वा स जीवः स्वोत्तराधिकारिपुत्रादिप्रदत्तम्पिण्डादिकमुपभोगाय सततमीहमानस्सन्तिष्ठते। तत्प्रदत्तम्पिण्डादिकमुपभुज्य च सन्तृप्तो भवति सः।

यस्य च नास्ति कोऽप्युत्तराधिकारी तस्य पिण्डप्रदातुरभावाच्च सद्गतिर्न भवतीति मर्कटभ्रमणमिव चतुरशीतिलक्षपरिमितयोनिभ्रमणन्तस्य भवत्येव। तदवसरे स रुदन् प्रलपति यदहं कुत्रागतः, नास्ति मम कोऽपि त्राता। हा ! महत्कष्टम्। इत्यादिभिः बहुविधैः वचनैः भूयो भूयः उच्चैरुच्चैः विलपन्नपि स प्रेतः रौरवाद्यनेकघोरनरके यमदूतैर्नीयमान क्षुत्पिपासाकुलश्च आस्ते।

यस्य चोत्तराधिकारी भवति, सः स्वीयधर्मानुसारेणात्र भुवि स्वकीयम्पितरमुद्दिश्य तर्पणादिकम्पिण्डादिकञ्चार्पयति समन्त्रं श्रद्धया, अतः तत्पितरो न क्षुत्पिपासाकुलाः रौरवे कष्टन्दुःखं वोपभुञ्जन्ते कथमपीति। तत्रापि गयाश्राद्धकर्तुस्तत्प्रेतस्य च मुक्तिः शास्त्रप्रामाण्यात्सुनिश्चितैवेति श्राद्धकरणस्यातीवावश्यकता प्रतीयते।

तथाहि– " जीवतो वाक्यकरणात् क्षयाहे भूरिभोजनात्।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता "॥

एवं- "पुन्नाम्नो नरकात्त्रायत" इति पुत्रः– इत्यादिना पुत्रस्य श्राद्धादिकर्तृत्वं समुपपन्नम्।

अपि च– पिता देवः पिता स्वर्गः पिता हि परमं तपः।
पितरि प्रीतिमापन्ने प्रीयन्ते सर्वदेवताः॥

इत्यनेन पितॄणां सन्तोषप्रदं कर्मावश्यं कर्तव्यम्। तच्च कर्म गयाश्राद्धस्वरूपमवश्यमेव कर्तव्यम्। यतः ब्रह्महत्यादिपापस्यानेन विनाशसम्भवात्।

तथाहि– ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
पापं तत्संगजं सर्वं गयाश्राद्धाद्विनश्यति॥

किञ्च– गयायाम्पिण्डदानेन यत्फलं लभते नरः।
न तच्छक्यम्मया वक्तुं कल्पकोटिशतैरपि।

एतेन गयाश्राद्धमतीव हितकरम् प्रतिभाति। अत्र चतुर्विधा मुक्तिः स्पष्टरूपेण प्रतिपादिता।

यथाचोक्तम्–" ब्रह्मज्ञानं गयाश्राद्धं गोग्रहे मरणन्तथा।
वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधा "

अत्र गोग्रहपदेन गंगातटस्य ग्रहणं कर्तव्यम्। गयाश्राद्धे कः समयोऽपेक्षित इत्याह वायुपुराणे—

" मीने मेषस्थिते सूर्ये कन्यायां कामुके घटे।
दुर्लभं त्रिषु लोकेषु गयायाम्पिण्डपातनम्॥

अपिच– गयायां सर्वकालेषु पिण्डं दद्याद्विचक्षणः।
मकरे वर्तमाने च ग्रहणे चन्द्रसूर्ययोः "॥

कदा श्राद्धमिदमत्याज्यमित्याह तत्रैव—

अधिमासे जन्मदिवसे—अस्ते च गुरुशुक्रयोः।
त्यक्तव्यन्न गयाश्राद्धं सिंहस्थे च बृहस्पतौ "।। इति।

अत्र नास्तिकानाङ्कृतेऽपि पिण्डादिकरणमुचितमेव। यतः- शास्त्रव्यवस्था सर्वेषां ह्
एवास्ति। किन्तु यदि तत्र नास्तिका श्राद्धादिकन्न चिकीर्षन्ति चेत् तदा तत्कृते त्विदं शोभनमेव। अन्य
नरकपुरप्रतोल्योऽवरुद्धा एव भवेयुरिति तस्यापि व्यवस्था कर्तव्या एवेत्यास्तिकनास्तिकानां विभि
पृथक् पृथक् मार्गः स्फुट एव सुनिश्चितः।

अपि चागमप्रमाणेनापीदं कर्तव्यमेव। तथाहि "**अहरहः उभयथापीज्यन्त**" इ
प्रमाणादवगम्यते। अत्र—उभयथापीत्यस्य **पूर्वाह्णेन पराह्णेन** चेति बोध्यम्। तत्र **देवयाने
पूर्वाह्णम्, पितृयानेन च पराह्णं** विवक्षितम्।

अन्नायमाशयः — देवोद्देश्यकं सर्वविधम्पूजनादिकार्यं पूर्वाह्णे-दिनस्य पूर्वभाग एव कर्तव्यम
पितरमुद्दिश्य पिण्डदानादिकं सर्वविधं कार्यम्पराह्णे—दिनस्य परभागे माध्याह्नादुपरि कर्तव्यम्-इ
निश्चितम्। तत्रापि— मातृनिमित्तम्पूर्वाह्णे एव विहितम्, पितृनिमित्तं चापराहह्णे — इति बोध्यम्
तथाहि—

पूर्वाह्णे मातृकं कार्यमपराह्णे नु पैतृकम्।
एकोद्दिष्टन्तु मध्याह्ने प्रातर्वृद्धिनिमित्तकम्।।

इति वचनात् निश्चीयते। अत्र श्राद्धविषयपराणि स्मार्तवचनान्यपि बहूनि सन्ति तानि संक्षिप्यैवा
प्रदर्श्यन्ते—अत्रापस्तम्बेन श्राद्धस्वरूपं स्पष्टमेवोक्तम् (१–४, २–१६)

अथैतन्मनुः—श्राद्धशब्दं कर्म प्रोवाच। प्रजानिःश्रेयसार्थं च। तत्र पितरो देवता ब्राह्मण
स्त्वाहवनीयार्थे। मासि मासि चेदं कार्यम्। अपरपक्षस्यापराह्णः श्रेयान्। अत्र पितॄनुद्दिश्य द्रव्य
त्यागो ब्राह्मणस्वीकरणपर्यन्तं श्राद्धस्वरूपं प्रधानम्।

दैवश्राद्धादौ श्राद्धशब्दप्रयोगो गौणो बोध्यः। ब्रह्मपुराणादौ "**नमो विश्वेभ्यो देवेभ्यः**"
इत्यादिनान्नमादौ न्यवेदयत्। पितृपितामहप्रपितामहादीन्प्रत्येकमुद्दिश्य द्रव्यत्यागविधानम्।

"**त्रिषु पिण्डः प्रवर्तते**" इति श्रुत्या च महर्षिणा मनुना मासिकं श्राद्धविधानमुक्तम्।
तथाहि—

" पितृयज्ञं तु निर्वर्त्य विप्रश्चेन्दुक्षयेऽग्निमान्।
पिण्डान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् "।।
पितॄणां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः।
तच्चामिषेण कर्तव्यं प्रशस्तेन प्रयत्नतः।।
न निर्वपति यः श्राद्धं प्रमीतपितृको द्विजः।
इन्दुक्षये मासि मासि प्रायश्चित्ती भवेत्तु सः।। "

इति मनुस्मृतीय-तृतीयाध्यायेन स्पष्टं ज्ञायते श्राद्धस्यावश्यकत्वम्। इदं श्राद्धमपि नित्यनैमित्तिक-
काम्यादिभेदाच्च त्रिविधम्। अवान्तरभेदाच्च द्वादशविधमपि।

अत्र भविष्यपुराणेऽपि कीर्तितम्—तथाहि—

" अहन्यहनि यच्छ्राद्धं तन्नित्यमिति कीर्तितम् ।
एकोद्दिष्टन्तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते " । इत्यादिना ।

एवं श्राद्धकालोऽपि को ग्राह्य इत्यत आह—

" अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम् ।
द्रव्यं ब्राह्मणसम्पत्तिः विष्णुवत्सूर्यसंक्रमः ॥
व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्ययोः ।
श्राद्धं प्रतिरुचिश्चैव श्राद्धकालाः प्रकीर्तिताः ॥

इत्यादिना श्राद्धकरणं सर्वथावश्यकम् प्रतीयते ।

श्राद्धाकरणे दोषमाह—" सूर्ये कन्यागते श्राद्धं यो न कुर्याद्गृहाश्रमी ।
धनपुत्राः कुतस्तस्य पितृभिः श्वासपीडनात् " ॥

नच नैवागमस्य कथंचिदपि प्रामाण्यं युक्तम्, यतः स पौरुषेयोऽपौरुषेयो वा ? पौरुषेयश्चेत्सर्वज्ञकृतः तदितरकृतो वा ? आद्ये युष्मन्मतव्याहतिः । यतः—

" अतीन्द्रियाणामर्थानां साक्षाद्द्रष्टा न विद्यते ।
नित्येभ्यो वेदवाक्येभ्यो यथार्थत्वविनिश्चयः ॥ "

इत्यादिना तथैव निश्चयात् ।

द्वितीये च तत्र दोषवत्कर्तृकत्वेनानाश्वासप्रसङ्गात्—इति वाच्यम् । पौरुषेयत्वपक्षातिरिक्ता-पौरुषेयत्वपक्षाश्रयणेन निर्दोषात् । कथंचित्स्वीकृतेऽपि पौरुषेयत्वपक्षे सर्वज्ञरचितत्वाद्वेदस्य न काऽपि दोषापत्तिस्तार्किकाणाम्मते । परञ्च मीमांसकानाम्मते चापौरुषेयत्वपक्ष एव युक्त्या घटतेऽत एतत्कल्पे न कोऽपि दोषः सम्भवतीति बोध्यम् ।

ननु वर्णात्मकशब्दस्योच्चारितत्वेन पौरुषेयत्वमेव वेदस्य कथन्न ज्ञायते, कुमारसम्भवादि-वचनवत्, वेदोऽपि वचनात्मक एव, यत्र यत्र वचनात्मकत्वम्, तत्र तत्र पौरुषेयत्वमिति व्याप्तेः । तथैवोक्तिरपि—

" ताल्वादिजन्मा ननु वर्णवर्गो,
वर्णात्मको वेद इति स्फुटं च ।
पुंसश्च ताल्वादि ततः कथ स्या—
दपौरुषेयोऽयमिति प्रतीतिः ॥ "

इत्यादिना वेदवचनानामप्युच्चारितत्वेन पौरुषेयत्वमेव प्रतीयत इति चेन्न, श्रुतेः पौरुषेयत्वे स्वीकृते सति " भ्रमप्रमादकर्णापाटवविप्रलिप्सेत्याद्यनेकविधदोषाक्रान्तत्वाद्वेदस्याप्यप्रामाण्यापत्तेस्तादवस्थ्यात् ।

अत्रायमाशयः—यतः पुरुषगता दोषाः ऊपर्युक्ताः सन्ति, अतः पुरुषनिर्मितेषु वचनेष्वपि ते दोषाः अवश्यमागच्छेयुरिति—अप्रमाणपुरुषवचनं वेदं कः श्रद्दधेत् ? प्रामाण्यञ्च तस्य कथं स्यात् ?

अतः वेदा अपौरुषेया एव विवक्षिताः न पौरुषेया इति। येऽप्याप्तपुरुषाः सञ्जाताः तेऽपि वेदस्मर्तार एवाभूवन्न खलु तत्कारकाः। "**स्मर्तारोऽस्य न कारकाः**" इति प्रमाणात्।

तथा च श्रुतिमूलकत्वादेव स्मार्तपौराणिकादिवचनानामपि प्रामाण्यं सिद्ध्यति, नान्यथेत्यवगन्तव्यम्।

एवमुत्सर्गापवादयोर्मध्येऽपवादो विधिर्बलीयः" इति न्यायात् "**मा हिंस्यात्सर्वभूतानि**" इत्याद्युत्सर्गवाक्यानां "**पशुना यजेत**" इत्याद्यपवादवाक्यैः बाधकत्वं स्पष्टमेव पूर्वोक्तदिशा बोध्यम्। तथाच तदनुसारेण शास्त्रप्रतिपादितानां श्राद्धादिक्रियाणामपि प्रामाण्यङ्कर्तव्यत्वञ्च सिद्धमेव।

अपि च यच्चोक्तम्–उत्सर्गापवादयोरेकार्थ–साधनविषयत्वात्परस्परसापेक्षत्वमेव। यथा च जैनानां संयमपरिपालनार्थं नवकोटिविशुद्धाहारग्रहणमुत्सर्गः तथाविध-द्रव्यक्षेत्रकालभावापत्सु च पञ्चकादियतनयाऽनेषणीयादिग्रहणमपवादः। एवमायुर्वेदेऽपि—

"उत्पद्यते हि सावस्था देशकालामयान्प्रति।
यस्यामकार्यं कार्यं स्यात्कर्मकार्यन्तु वर्जयेत्"॥

इत्यादिवचनाच्च-यमेवैकरोगमधिकृत्य कस्यांचिदवस्थायां किञ्चिद्वस्त्वपथ्यम्, तदेव चावस्थान्तरे तत्रैव रोगे पथ्यमिति ज्ञायते—इत्यादिबहुविधोक्तम्। तदपि न नूतनम् यतः—वैदिकहिंसास्थलेऽपि तत्कर्तुः यागीयपशूनाञ्च दुर्गतिनिवारणपूर्वकस्य स्वर्गादिफलस्य कल्पनात्। अत्रेयं प्राचीनोक्तिरपि चरितार्था। तथाहि—

"पूजया विपुलं राज्यमग्निकार्येण सम्पदः।
तपः पापविशुद्धयर्थं ज्ञानं ध्यानञ्च मुक्तिदम्"॥

इत्यादिभिर्विविधैः वचनैश्च यागविधेः सुगतिहेतुत्वमङ्गीकृतमेवेति न कोऽपि दोषोऽत्र बोध्यः। एतेन परपक्षमुपहसञ्जैनाचार्यः स्वयमेवोपहास्यो जातः इति महती विचित्रा गतिः समुत्पन्ना बोध्या।
इति स्याद्वादमञ्जर्युक्तैकादशकारिकाप्रदत्ताक्षेपपरिहारः समाप्तः।

अथ साम्प्रतं नित्यपरोक्षज्ञानवादिनां भाट्टानामेकात्मसमवायिज्ञानान्तरवेद्यज्ञानवादिनां यौगानां च मतं विकुट्टयन्नाह जैनाचार्य :—

"स्वार्थावबोधक्षम एव बोधः'
प्रकाशते नार्थकथान्यथा तु।
परे परेभ्यो भयतस्तथापि।
प्रपेदिरे ज्ञानमनात्मनिष्ठम्। (स्या. म. पृ. ७३, का. १२)

अत्रायमर्थः—बोधः ज्ञानम्। स च स्वार्थावबोधक्षम-एव प्रकाशते। विपर्यये दूषणमाह–नार्थकथान्यथेति, अन्यथेति ज्ञानस्य स्वसंविदितत्वानभ्युपगमेऽर्थकथैव न स्यात्।

अत्रायम्भावः—यदि हि ज्ञानं स्वसंविदितं नेष्यते तदा तेनात्मज्ञानाय ज्ञानान्तरमपेक्षणीयं तेनाप्यपरमित्यनवस्था स्यात्। ततो ज्ञानं तावत् स्वाववोधव्यग्रतामग्नम्। अर्थस्तु जडतया स्वरूपज्ञापनासमर्थ इति को नामार्थस्य कथामपि कथयेत्। तथापि—एवं ज्ञानस्य स्वसंविदितत्वे युक्त्या

घटमानेऽपि परे तीर्थान्तरीयाः। ज्ञानं-कर्मतापन्नम्। अनात्मनिष्ठम्-न विद्यते आत्मनः स्वस्य निष्ठा निश्चयो यस्य तत् अस्वसंविदितमित्यर्थः। परे-पूर्वपक्षवादिनस्तेभ्यः सकाशात् ज्ञानस्य स्वसंविदितत्वं नोपपद्यते, स्वात्मनि क्रियाविरोधादित्युपालम्भसम्भावनासम्भवं यद्भयं तस्मात्, तदाश्रित्येत्यर्थं प्रपेदिरे।

अत्र भाट्टास्तावदिदमामनन्ति--ज्ञानं स्वसंविदितं न भवति, स्वात्मनि क्रियाविरोधात्। न हि सुशिक्षितोऽपि नटबटुः स्वस्कन्धमधिरोढुं पटुः। न च सुतीक्ष्णाप्यसिधारा स्वं छेत्तुमाहित-व्यापारा। तथाच परोक्षमेव ज्ञानम्, न स्वसंविदितमिति।

तदेतन्न रुचिकरमिति प्रतिपादयन्ति जैनाचार्याः - किमुत्पत्तिः स्वात्मनि विरुध्यते **ज्ञप्तिर्वा ?** यद्युत्पत्तिः, सा विरुध्यताम्। न हि वयमपि ज्ञानमात्मानमुत्पादयतीति मन्यामहे।

अथ ज्ञप्तिः, नेयमात्मनि विरुद्धा। तदात्मनैव ज्ञानस्य स्वहेतुभ्य उत्पादात् प्रकाशात्मनेव प्रदीपालोकस्य।

न च प्रकाशात्मैव प्रदीपालोक उत्पन्न इति परप्रकाशकोऽस्तु। किन्तु-आत्मानमपि-एतावन्मात्रेणैव प्रकाशयतीत्यस्य कोऽर्थः ? नह्यप्रकाशितोऽयमात्मा-आलोकान्तरात् प्रकाशित एवेति। यतः **प्रथमे** प्रत्यक्षो बाधः। **द्वितीये** चानवस्था स्यादिति वाच्यम्, एतस्य स्वमपेक्ष्य कर्मतया प्रकाशाभावेनास्वप्रकाशकत्वकल्पनात्।

यदि च प्रकाशरूपेणोत्पन्नत्वात् स्वयम्प्रकाशते इति कथनं स्यात्, तदा वयमपि कर्मतयैव ज्ञानं प्रतिभासमानं स्वसंवेद्यं ब्रूम इति को दोषः। ज्ञानं स्वयं प्रतिभासते इत्यादावकर्मकस्य तस्य चकासनादिति **यदुक्तं तत्तुच्छम्**, ज्ञानस्य स्वप्रकाशकत्वाभावात्।

न च यथा ज्ञानं "स्वं जानामीति" कर्मतयापि तद्भाति, तथैव प्रदीपः स्वं प्रकाशयतीत्ययमपि कर्मतया प्रथित एवेति को दोष इति वाच्यम्, प्रदीपस्य पराधीनत्वेन ज्ञानस्य च स्वाधीनत्वेन दृष्टान्तदार्ष्टान्तिकयोः परस्परं विरोधात्। न हि ज्ञानमिव प्रदीपोऽपि स्वप्रकाशने समर्थः।

यद्यप्येकस्य प्रदीपस्य सन्दर्शनाय नापरस्य प्रदीपस्यावश्यकता केनापि स्वीक्रियते, तथापि ज्ञानस्य सविषयकत्वेन वस्तु प्राप्य स्वप्रकाशनसामर्थ्यम् प्रदीपस्य च वस्तुनिरपेक्षत्वेन व्यक्त्यधीनत्वमिति महदन्तरन्तयोरित्यूह्यम्।

अत्रायं विचारः—यद्यपि ज्ञानमपि व्यक्त्यधीनमेव प्रदीपवत्। तथापि तयोरिदमन्तरमस्ति यद्-ज्ञानं कुत्रापि कथमपि कदाचिदपि निर्विषयकं नोत्पद्यतेऽपितु सर्वदा सर्वत्र सर्वैश्च सविषयकमेवा-नुभूयते। अतः वस्तुसापेक्षमेव ज्ञानं कस्मिंश्चिदप्यात्मनि कदाप्युपलभ्यते। प्रदीपस्तु वस्तुनिरपेक्ष एव कदापि कुत्रापि प्रकाशतेऽतस्तयोः वस्तुनिरपेक्षत्वसापेक्षत्वयोः परस्परं विरोधान्महदन्तरमिति सिद्धम्।

यद्यपि व्यक्तिरेव जिज्ञासति चिकीर्षति प्रदीपमपि प्रज्वालयति। तथापि ज्ञानस्य वस्तुप्राप्य प्रकाशकारित्वनियमात्-पदार्थमन्तरा ज्ञानमसम्भवम्। नैवंविधा स्थितिः प्रदीपस्य। स च पदार्थास्तित्वे नास्तित्वे चोभयथैव व्यक्तिप्रयत्नसापेक्ष एव प्रज्वलति, नान्यथेति भेदस्तयोः स्पष्ट एवेति सुधीभिर्विभावनीयम्।

नच स्वात्मनि क्रियाविरोधात्मको यः दोष उद्भावितः सोऽयुक्तः अनुभवसिद्धेऽर्थे विरोधा-सिद्धेरिति वाच्यम्, घटमहं जानामीत्यादौ कर्तृकर्मवज्ज्ञप्तेरप्यवभासमानत्वात्। नचाप्रत्यक्षोपलम्भस्या-

र्थदृष्टिः प्रसिद्ध्यति । नच ज्ञानान्तरादुपलम्भसम्भावना । तस्याप्यनुपलब्धस्य प्रस्तुतोपलम्भप्रत्यक्षीकरणे असामर्थ्यात् । यद्युपलम्भान्तरसम्भावना क्रियते तदानवस्था । अर्थोपलम्भात्तस्योपलम्भेऽन्योन्याश्रयदोषः स्यादिति वाच्यम्, ज्ञानाभावेऽर्थप्राकट्यस्यान्यथानुपपत्या तदुपलम्भात् ।

यदि चार्थोन्मुखतयेव स्वोन्मुखतयापि ज्ञानस्य प्रतिभासात् स्वसंविदितत्वं कल्प्येत तदानुभूतेरनुभाव्यत्वे घटादिवदननुभूतित्वप्रसङ्गः । तथा च ज्ञानमनुभवरूपमप्यनुभूतिर्न भवति, अनुभाव्यत्वात् घटवत्, इत्यनुमानम्फलितम् ।

एतच्च भवन्मतेऽत्रानुभाव्यत्वस्य स्वसंवेद्यत्वादिष्यत एव ।

नच ज्ञातुर्ज्ञातृत्वेनेवानुभूतेरनुभूतित्वेनैवानुभवः सिद्ध एवेति तस्या अर्थापेक्षयाऽनुभूतित्वात्, स्वापेक्षया चानुभाव्यत्वात्स्वपितृपुत्रापेक्षयैकस्यैव पुत्रत्वपितृत्ववद्विरोधाभावात् । तथा च ज्ञानं स्वयम्प्रकाशमानमेवार्थं प्रकाशयति प्रकाशकत्वात् प्रदीपवदिति वाच्यम्, एकस्मिन्नेव वस्तुनि प्रकाश्यत्वप्रकाशकत्वयोः विरोधात् । संवेदनस्य प्रकाश्यत्वेन प्रकाशकत्वाभावात् । यथा च नेत्रादयः स्वयम्प्रकाशका अपि स्वप्रकाशने सर्वथाऽसमर्था एव भवन्ति । तथैव संविदपि स्वस्य प्रकाशनेऽसमर्थैव कथन्न भवेदिति ?

यद्यपि ज्ञानानां स्वसंविदितत्वमनेके तान्त्रिकप्रवराः स्वीकुर्वन्ति, तथापि प्रथममिन्द्रियबुद्धिजन्मलक्षणं ज्ञानम्, ततोऽर्थप्रतिपत्तिः (प्राकट्यं वा) तस्मादर्थापत्तिः, तया च प्रवर्तकज्ञानस्योपलम्भ इत्येवं रूपां त्रिपुटीप्रत्यक्षकल्पनामामनन्ति भट्टाः । इति तेषाम्मते ज्ञानं न स्वसंविदितमपि तु सर्वथा परोक्षमेव ज्ञानम्भोभवीति सिद्धम् ।

अतोऽत्र जैनाचार्यकृतं खण्डनमसमीचीनमेवं बोध्यम् ।

अत्र यौगाः प्राहुः — ज्ञानं स्वान्यप्रकाश्यमेव ईश्वरज्ञानान्यत्वे सति प्रमेयत्वात् घटवत् । समुत्पन्नं हि ज्ञानमेकात्मसमवेतानन्तरोद्भविष्णुमानसप्रत्यक्षेणैव लक्ष्यते न पुनः स्वेन ।

नचैवमनवस्था, अर्थावसायिविज्ञानोत्पादमात्रेणैवार्थसिद्धौ प्रमातुः कृतार्थत्वात्, अर्थज्ञानजिज्ञासायान्तु तत्रापि ज्ञानमुत्पद्यत एवेति । परञ्चेदम्मतञ्जैनाचार्येभ्यो न रोचते । यतस्तेऽनेकविधान्दोषान्प्रदर्शयन्ति । तथाहि—

पक्षस्यात्र प्रत्यनुमानबाधित्वाद्धेतोः कालात्ययापदिष्टत्वात् । तथाहि—विवादास्पदं ज्ञानं स्वसंविदितम् ज्ञानत्वात्, ईश्वरज्ञानवत् ।

नचायं वाद्यप्रतीतो दृष्टान्त इति वाच्यम्, पुरुषविशेषस्येश्वरतया जैनैरपि स्वीकृतत्वेन तज्ज्ञानस्य तेषां प्रसिद्धेः । अत्र तवप्रदर्शितो हेतुः व्यर्थविशेष्यकः, समर्थविशेषणोपादानेनैव साध्यसिद्धेः । अग्निसिद्धौ धूमवत्वे सति द्रव्यत्वादितिवत् । अत्रेश्वरज्ञानान्यत्वादित्येतावतैवेष्टसिद्धेः । भवन्मते तदन्यज्ञानस्य सर्वस्यैव प्रमेयत्वात् । सोपाधिकत्वाच्चाप्रयोजकोऽप्ययं हेतुः । उपाधिश्चात्र जडत्वमेव प्रसिद्धं विवक्षितम् । स च स्तम्भादिरेव ग्राह्योऽत्र, यतोऽयं स्वस्मादन्येन एव प्रकाश्यते । न च ज्ञानं जडस्वरूपम्, स्वसंविदितत्वात् । **इति यत्—व्याजहार तन्न कथमपि विज्ञैः विचारार्हम् । यतोऽत्रायं विचारः संजागर्ति** यत्—ज्ञानं **स्वसंविदितमस्वसंविदितं वा ? आद्ये** ज्ञानस्य स्वसंविदितत्वेन चैतन्यापत्तिः दुर्वारा स्यात् । यतश्च ज्ञानमचेतनमतो न स्वसंविदितम् ।

तथा च–ईश्वरज्ञानवदिति दृष्टान्त एव न घटते तस्य नित्यत्वात्। विवादास्पदञ्च ज्ञानं यतो न नित्यमतो न स्वसंविदितम्। अतः ज्ञानत्वेन हेतुना विवादास्पदं ज्ञानं न स्वसंविदितं कथमपि भवितुं शक्यम्।

द्वितीये च मम मतमेव समागतम् – इति व्यर्थः कोलाहलः।

अपि चेश्वरज्ञानान्येऽप्रमेयस्वरूपे "शुक्ताविदं रजत –मित्यादौ" दोषापत्तिः स्यादिति तद्वारणाय हेतौ विशेष्यदलं सार्थकमिति कथं व्यर्थविशेष्यको हेतुरिति विचारणीयम्।

एवं न सोपाधिको हेतुरत्र येनाप्रयोजक एव हेतुः स्यात्। यतः स्वमते जडत्वे स्वान्यप्रकाश्यत्वव्यापकत्वस्य सत्वेऽपि ईश्वरज्ञानान्यत्वविशिष्टप्रमेयत्वाव्यापकत्वाभावस्य सत्वादुपाधित्वाभावसत्वेन कथमप्रयोजकत्वं हेतोरिति विभावय।

अपि च ज्ञानानां जिज्ञासासमुत्पाद्यत्वेनापरज्ञानेनैव पूर्वज्ञानं गृह्यते, इति ज्ञानस्यापि स्वान्यप्रकाश्यत्वसत्वात् "विवादाध्यासितं रूपादिज्ञानमिति ज्ञानस्य न ज्ञानान्तरज्ञेयतेति" कथनं न समीचीनमिति बोध्यम्।

एतेन भाट्टयौगानाम्मतमाक्षिपञ्जैनाचार्यः स्वयमेवाक्षेपभाजनः सञ्जातः इति विचित्रा गतिः समुत्पन्ना। इति स्याद्वादमञ्जर्युक्तद्वादशकारिकाप्रदत्ताक्षेपपरिहारः समाप्तः।

अथ ये ब्रह्माद्वैतवादिनोऽविद्यापरपर्यायमायावशात्प्रतिभासमानत्वेन विश्ववर्तिवस्तुप्रपञ्चमपारमार्थिकं समर्थयन्ते तन्मतमुपहसन्नाह --जैनाचार्यः —

" माया सती चेद्द्वयतत्त्वसिद्धिरथा–सती हन्त कुतः प्रपञ्चः।
मायैव चेदर्थसहा च तत्किं माता च वन्ध्या च भवेत्परेषाम्"

[स्या. म. का. १३, पृ. ७७]

अस्यार्थः—वादिना परिकल्पिता–अविद्यास्वरूपा या माया सा सद्रूपाऽसद्रूपा वा। आद्ये द्वयतत्त्वसिद्धिः। अर्थात्– तात्विकरूपेण ब्रह्मातिरिक्ताया मायाया अभ्युपगमात्, तत्त्वतः—आत्मनः मायायाश्च सिद्धिर्बोध्याः। एवञ्च पदार्थद्वयतत्वसिद्धिः स्यात्। तथाचाद्वैतवादस्य सिद्धान्तः भज्येत। द्वितीये च यदि गगनाम्भोजवदवस्तुरूपा माया परिकल्प्यते तदा हन्त प्रपञ्चः कुतः? न कुतोऽपि सम्भवतीत्यर्थः। यतः तुरङ्गशृङ्गवत् मायाया अवस्तुभूतत्वेन कस्मिंश्चिदपि कार्यजननेऽसमर्थत्वमेवेति।

यदि च माया च भविष्यति, अर्थसहाचेत्युभयं मन्यते चेत्, तदप्यसमीचीनम्। यतो नहि भवति माता च वन्ध्या चेति। अर्थात् यदि कापि स्त्री कस्यचित्–माता अस्ति तदा सा वन्ध्या कथम्? यदि च वन्ध्या तदा माता कथमुभयोः मातृत्ववन्ध्यात्वयोः परस्परं विरोधात्। इति संक्षिप्य काव्यार्थोऽवसेयः।

अत्र वादिन इत्थं प्रणिगदन्ति यत् तात्विकरूपेण ब्रह्मैवास्ति सत्यम्, तदतिरिक्तं जगच्च मिथ्यास्वरूपमेव। **"ब्रह्म सत्यं जगन्मिथ्येति"** वचनादिदं ज्ञायते। तथाहि—

" सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन।
आरामं तस्य पश्यन्ति न तत्पश्यति कश्चन"॥

इति प्रमाणात्पूर्वोक्तं सिद्धम्।

अत्रानुमानञ्च—अयम्प्रपञ्चः मिथ्यारूपः प्रतीयमानत्वात्। यदेवं तदेवं यथा शुक्तिशकले कलधौतम्। तथा चायम्। तस्मात्तथेति पञ्चावयवघटितमेव बोध्यम्।

तदेतन्न विचारक्षमं स्वीकुर्वन्ति जैनाः—तथाहि-मिथ्यारूपत्वं कीदृग्विवक्षितम्? किमत्यन्तासत्वम्, उतान्यस्यान्याकारतया प्रतीतत्वम्, आहोस्विदनिर्वाच्यत्वम्। **प्रथमेऽसत्ख्याति** प्रसङ्गः। **द्वितीये** विपरीतख्यातिस्वीकृतिः। **तृतीये** तु किमिदमनिर्वाच्यत्वम्? निःस्वभावत्वं चेत्? निसःप्रतिषेधार्थत्वे स्वभावशब्दस्यापि भावाभावयोरन्यतरार्थत्वेऽसत्ख्यातिसत्ख्यात्यभ्युपगमप्रसङ्गः। अत्र भावप्रतिषेधेऽसत्ख्यातिरभावप्रतिषेधे च सत्ख्यातिरिति। प्रतीत्यगोचरत्वं निःस्वभावत्वमिति चेदत्र विरोधः स्यात्।

किञ्चेयमनिर्वाच्यता प्रपञ्चस्य प्रत्यक्षबाधिता घटोऽयमित्याकारकम्प्रत्यक्षं हि प्रपञ्चस्य सत्यतामेव व्यवस्यति। यतः—इतरेतरविविक्तवस्तूनामेव च प्रपञ्चशब्दवाच्यत्वम्प्रसिद्धम्।

अत्रायं विचारः—घटोऽयमित्याद्याकारकम्प्रत्यक्षम्प्रपञ्चस्य सत्यतान्न व्यवस्यति। अपि तु तस्य मिथ्यात्वं क्रियते। यतः "**ब्रह्म सत्यं जगन्मिथ्येति**" तस्य सिद्धान्तः। एवञ्चैतत्सिद्धान्तानुसारेण ब्रह्मातिरिक्तस्य जगदन्तर्वर्त्तिपदार्थमात्रस्यैव यदा मिथ्यात्वन्तदा घटादिप्रपञ्चस्य कथं सत्यत्वमिति विचारणीयम्।

यद्यपि केवलवस्तुस्वरूपप्रतिपत्तेरेवान्यप्रतिषेधप्रतिपत्तिरूपत्वमिति नियमान्नीलमिति कथने पीतादिव्यवच्छिन्नस्यैव पदार्थस्य ग्रहणम्भवतीति सत्यम्, तथापि प्रत्यक्षस्य विधायकत्वात् प्रतिषेधे तस्य सामर्थ्यरहितत्वम्बोध्यम्। यतः प्रत्यक्षं हि इदमिति वस्तुस्वरूपं गृह्णाति तत्र नान्यत्स्वरूपं प्रतिषेधतीति। यथा चोक्तम्—

"**आहुर्विधातृ प्रत्यक्षं न निषेद्धृविपश्चितः**"। इति।

न च "प्रपञ्चः मिथ्या न भवति असद्विलक्षणत्वात् आत्मवत्" इत्यनुमानेनानुमानबाधितः पक्षः कथन्नेति वाच्यम्, पक्षे हेतोरभावात्स्वरूपासिद्धदोषस्य सत्वात् प्रत्यनुमानबाधितत्वस्य च बोधात्।

अत्रायमाशयः—यद्यत्र प्रपञ्चस्याप्यसद्विलक्षणत्वमङ्गीकर्तव्यं स्यात्, तदा सद्विलक्षणत्वं कः स्यात्। अर्थात्—असद्विषयः को भवेत्। आत्मवदिति दृष्टान्तेन प्रपञ्चे सत्यत्वन्नारोपयितुं शक्यते दृष्टान्तस्य चेतनत्वात् प्रपञ्चस्य चाचेतनत्वात्तयोर्भेदात्। अतोऽत्र प्रदर्शितं प्रत्यनुमानमकिञ्चित्कर-मेव बोध्यम्।

यच्चोक्तम् "किञ्चेदमनुमानं प्रपञ्चाद्भिन्नमभिन्नं वा? यदि भिन्नं तर्हि सत्यमसत्यं वेत्यादि (स्या. म. पृ. सं. ८०, पं. ६) **तदतितुच्छम्**—

प्रकृतानुमानस्य प्रपञ्चाद्भिन्नत्वकल्पे सत्यत्वस्य स्वीकारेऽपि प्रपञ्चस्य सत्यत्वाभावे स्पष्ट-म्प्रतीयमानत्वात्। प्रपञ्चभिन्नत्वकल्पाङ्गीकारात्। अङ्गीकारे च तयोर्भेदः सर्वथा स्पष्ट एव। तत्रानु-मानस्य सत्यत्वेऽपि यदि प्रपञ्चस्यापि सत्यत्वमेवाङ्गीक्रियते तदाभेदकल्पविषयकः "**वदतो व्याघातः**" दोषः स्यात्। अतोऽस्मिन् कल्पे प्रपञ्चस्य सत्यत्वन्नैव कथमपि स्थापयितुमर्हम्।

भेदकल्पे प्रकृतानुमानस्यासत्यत्वे च प्रपञ्चस्यासत्यत्वं स्फुटमेवेति-उभयथापि असत्यत्वम्प्र-पञ्चस्य सिद्धमेव। **अत्रायमाशयः**—

अत्रासत्यत्वकथनेन तस्य पारमार्थिकी सत्ता नास्तीति तात्पर्यमतस्तेनानुमानेन प्रपञ्चस्यापि व्यावहारिकी एव सत्ता न परमार्थिकीति बोध्यम्। यतः स्वमते "**ब्रह्म सत्यं जगन्मिथ्येति**" कथनात्

जगतः पारमार्थिकी सत्ता न स्वीक्रियते, इति तात्पर्यमतः कथमनुमानस्य सत्यत्वम्प्रपञ्चस्य वेति विचारणीयम् ।

अभेदकल्पे स्वीकृतेऽप्यनुमानस्य व्यवहारमूलकत्वेन प्रायोगिकी सत्ता स्वीक्रियतेऽतः तेनानुमानेन प्रपञ्चस्य मिथ्यात्वसिद्धौ न कोऽपि विरोधः ।

तथाच — **प्रपञ्चो न मिथ्येति प्रत्यनुमानं बाधितमेव ।**

ननु कथम्प्रमाणमद्वैतमते, यतस्तत्सत्वे द्वैतप्रसंगात् । यदि च लोकप्रत्यायनाय प्रमाणमभ्युपगम्यते, तदा तदपि न सम्यक् —त्वन्मते लोकस्यैवासम्भवात् । एकस्यैव नित्यनिरंशस्य परब्रह्मणः सत्वात् । कथंचित्प्रमाणे स्वीकृतेऽपि तत्किम्प्रत्यक्षम्प्रमाणमनुमानमागमो वा ? न तावत्प्रत्यक्षम्, तस्य समस्तवस्तुजातगतभेदस्यैव प्रकाशकत्वात् । आबालगोपालं तस्यैव प्रतिभासनात् । पक्षस्य प्रत्यक्षबाधितत्वेन हेतोः कालात्ययापदिष्टत्वादनुमानमपि न घटते । द्वैताविनाभावित्वेनाद्वैतम्प्रति प्रामाण्यासम्भवात् । वाच्यवाचकभावलक्षणस्य द्वैतस्यैव तत्रापि दर्शनात् ।

तथाहि— **" कर्मद्वैतं फलद्वैतं लोकद्वैतं विरुध्यते ।**
विद्याऽविद्याद्वयं न स्याद्बन्धमोक्षद्वयं तथा ।"

आगमोऽपि कथम्प्रमाणम् ? अद्वैतमतेऽपि व्यावहारिकसत्तायाः व्यवहारार्थं मान्यतया प्रत्यक्षादिषड्विधप्रमाणानामस्तित्वेन प्रामाण्यस्य स्वीकारात् । तथाहि—

" अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् " ॥

इति प्रमाणेन प्रत्यक्षस्य द्वैविध्येऽपि निर्विकल्पकप्रत्यक्षात्सन्मात्रविषयात्तस्यैकस्यैव सिद्धिर्बोध्या ।

यच्च सविकल्पकप्रत्यक्षं घटपटादिभेदसाधकं तदपि सत्तारूपेणान्वितानामेतेषां प्रकाशकत्वात्सत्ताऽद्वैतस्यैव साधकम्, सत्ताया परब्रह्मरूपत्वात् । तदुक्तम् – **यदद्वैतं तद्ब्रह्मणो रूपमिति ।**

अनुमानादपि तत्सद्भावो विभाव्यत एव विधेस्तत्वस्य निश्चयात् । तथा च—विधिरेव तत्वम् प्रमेयत्वात् प्रत्यक्षादिपञ्चविधानाम्प्राणानाम्भावाविषयत्वेनैव प्रवृत्तेः ।

तथाहि— **" प्रत्यक्षाद्यवतारः स्याद्भावांशो गृह्यते यदा ।**
व्यापारस्तदनुत्पत्तेरभावांशे जिघृक्षते ॥ " इति ।

अतो निखिलपदार्थानाम्प्रमेयत्वेन विधित्वम्बोध्यम् । यच्च न विधिरूपम्-तच्च न प्रमेयम्, यथा खरविषाणम् ।

अपि च ग्रामारामादयः पदार्थाः प्रतिभासान्तः प्रविष्टाः प्रतिभासमानत्वात् । यत्प्रतिभासते तत्प्रतिभासान्तः प्रविष्टम् । यथा प्रतिभासस्वरूपम् ।

अपि चागमप्रमाणेनापि परब्रह्मणः सिद्धिः ।

तथाहि— "पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यमुतामृतत्वस्येशानो यदन्नेनातिरोहति यदेजति यन्नैजति यद्दूरे यदन्तिके यदन्तरस्य सर्वस्य यदुत सर्वस्यास्य बाह्यत

इत्यादिना तत्सिद्धिर्बोध्या।

अपि च "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिवेदो वचनैश्च तत्सिद्धिर्बोध्या। अपि च—

"सर्वं वै खल्विदं ब्रह्म नेह नानास्ति किञ्चन"

इत्यादिनापि तत्सिद्धेः। अत्रेदन्तत्वम्बोध्यम्—

परमपुरुष एक एव तत्वम्, सकलभेदानां तद्विवर्तत्वात्। तथाहि—सर्वे भावाः ब्रह्मविव सत्वैकरूपेणान्वितत्वात्। यद्यद्रूपेणान्वितं तत्तदात्मकमेव, यथा घटघटीशरावोदञ्चनादयो मृद्रूपेण नान्विताः मृद्विवर्ताः। यथा वा रुचककुण्डलादयः सुवर्णेनान्विताः सुवर्णविकाराः। एव "मात्मै सर्वं यद्भूतं यच्च भाव्यम्, तस्मादात्मनः आकाशः सम्भूतः आकाशाद्वायुः, वायोस्तेजः, ते आपः, आपः पृथिवीत्यादि, यतो वा इमानि भूतानि जायन्ते, येन जातानि जीव यत्प्रयन्त्यभिसंविशन्ति, द्यावाभूमी जनयन्देव एकः विश्वस्य कर्ता भुवनस्य गोप्ते "त्यादि वेदवाक्यैश्चात्मविवर्ता एव पदार्थाः सिद्धयन्ति। इति सिद्धं ब्रह्मविवर्तत्वन्निखिलभेदानाम्पदार्थानामिति तथा—

"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥"

इत्यादिविविधप्रमाणैश्च समदर्शित्वमेवात्मनो बुद्धयते। न खलु समवर्तित्वमिति। अन्य अश्वश्वागर्दभादिभिरपि साकं मानवानां शयनासनपानादिविविधकर्मणः आपत्तिः प्रसज्येत। त महदनर्थकं स्यादिति विद्वद्भिर्विचारणीयम्। अपि चाद्वैतवादेऽपि न सर्वत्राद्वैतबुद्धिरपि तु स्थलविशे एव सा प्रवर्तते। तथाहि—

"भावाद्वैतं हि सर्वत्र क्रियाद्वैतन्न कर्हिचित्।
अद्वैतं सर्वभूतेषु नाद्वैतं गुरुणा सह"॥

इत्यादि प्रमाणैश्च निश्चीयते यद्भावगतमेवाद्वैतं विवक्षितम्। न खलु क्रियागतमिति।

"आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः"।

इत्यादिनापि भावगतमेवाद्वैतं विवक्षितम्। अतः जैनाचार्योक्त आक्षेपः न कथञ्चिदपि विज्ञजनविचारार्हः।

इति स्याद्वादमञ्जर्युक्तत्रयोदशकारिकाप्रदत्ताक्षेपपरिहारः समाप्तः।

अथ स्वाभिमतसामान्यविशेषोभयात्मकवाच्यवाचकभावसमर्थनपुरःसरं तीर्थान्तरीयप्रकल्पित तदेकान्तगोचरवाच्यवाचकभावनिरासद्वारेण तेषां प्रतिभावैभवाभावमाह परः—

" अनेकमेकात्मकमेव वाच्यं,
द्वयात्मकं वाचकमप्यवश्यम् ।
अतोऽन्यथा वाचकवाच्यक्लृप्ता-
वतावकानां प्रतिभाप्रमादः ।। (स्या. म. का. १४ पृ. सं. ८४)

अत्रायमर्थः---वाच्यमभिधेयं चेतनमचेतनं वस्तु । सामान्यरूपतया एकात्मकमपि व्यक्ति-भेदेनानेकम् । तथा वाचकमभिधायकं शब्दरूपम्, तदप्यवश्यं निश्चितं द्वयात्मकम् । सामान्य-विशेषोभयात्मकत्वात्, एकानेकात्मकम् । अत्रावश्यमितिपदेनोक्तोभयोरुभयात्मकत्वं निश्चिन्वत्तदेकान्तं व्यवच्छिनत्ति । अतः-उपदर्शितप्रकारात् । अन्यथा-सामान्यविशेषैकान्तरूपेण प्रकारेण । वाच्यवाचक-भावकल्पनायां-अत्वदीयानामन्ययूथ्यानाम्प्रतिभाप्रमादः-प्रज्ञास्खलितम् । अत्रार्थप्रतिपादनस्य वाचकाधी-नत्वेन पूर्वमेव वाचकपदमुपात्तम् । यथा चाहुः शाब्दिकाः

" न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते । " इति ।

अत्र **भावार्थस्त्वयं ग्राह्यः**---अत्र द्रव्यास्तिकनयानुपातिनो **मीमांसकभेदा अद्वैतवादिनः सांख्याश्च** वाच्यतया सामान्यरूपमेवाभ्युपगच्छन्ति ।

पर्यायास्तिकनयानुसारिणः **सौगताश्च** विशेषरूपमेव वाच्यं निर्वचन्ति ।

नैगमनयानुगामिनः **अक्षपादाः काणादाश्च** परस्परनिरपेक्षपदार्थपृथग्भूतसामान्यविशेषयुक्तं वस्तु वाच्यत्वेन निश्चिन्वते ।

अत्र पक्षत्रयेऽपि जैनाचार्यप्रवराः परमतमित्थं स्थापयन्ति यत्—संग्रहनयावलम्बिनो वादिनः प्रतिपादयन्ति सामान्यात्पृथग्भूतानां विशेषाणामदर्शनात्सामान्यमेव तत्वम् । यथा द्रव्यत्व-मेव तत्वम् । ततोऽर्थान्तरभूतानां धर्माधर्माकाशकालपुद्गलजीवद्रव्याणामनुपलब्धेः ।

किञ्च यैः सामान्यात्पृथग्भूताः अन्योन्यव्यावृत्त्यात्मका विशेषाः कल्प्यन्ते । तेषु विशेषत्वं विद्यते न वा ? नोचेत्, निःस्वभावताप्रसङ्गः । स्वरूपस्यैवाभावात् । अस्ति चेत्तर्हि तदेव सामान्यम् ।

अपि च विशेषाणां व्यावृत्तिप्रत्ययहेतुत्वं लक्षणम् तत्र व्यावृत्तिप्रत्यय एव न घटते । यतः सा च विवक्षितपदार्थे इतरपदार्थप्रतिषेधरूपा ग्राह्या । तत्र विवक्षितपदार्थश्च स्वस्वरूपव्यवस्थापन-मात्रपर्यवसायी । स च कथं पदार्थान्तरप्रतिषेधे प्रगल्भते ।

तन्न सम्यक्, यतोऽत्रायं विचार उत्पद्यते-काणादाक्षपादानाम्मते सामान्यात्पृथग्भूता एव विशेषाः उपलभ्यन्ते । तत्र सामान्यस्य जातिस्वरूपत्वात्-नित्यानित्योभयपदार्थवृत्तित्वम् । विशेषस्य चान्यत्वे सति नित्यद्रव्यमात्रवृत्तित्वमिति महदन्तरन्तयोः बोध्यम् । स्थितावस्यां यदि सामान्या-त्पृथग्भूताः विशेषाः मान्याः न स्युस्तदा तयोः पृथक् पृथक् किम्महत्वञ्जैनाचार्याणाम्मते । अभेद-श्चेत्तयोः पृथग्व्यवस्थापनमेवाशोभनम् । भेदस्तु सर्वथेष्ट एवातः सामान्यमात्रन्तत्वमिति कथनन्तु बालभाषितमेव प्रतिभाति ।

अपि च विशेषे विशेषत्वस्य विद्यमानत्वेऽपि तद्विशेषत्वन्न जातिरपि तु धर्मविशेष एवै कथन्तत्सामान्यम् (जातिः) । अतः — विशेषे विशेषत्वन्नास्तीति कथमपि वक्तुन्न शक्यन्तत्स्वभाव विरुद्धत्वात् । पदार्थमात्रे तद्गतधर्मस्य सत्वात् । कथंचित्सर्वेषु विशेषाख्यपदार्थेषु विशेषत्वाख्यायाः जाति स्वीकारेऽपि स च विशेषः न तज्जातिस्वरूपोऽपि तु व्यक्तिरिव स भिन्न एव जातेरिति न कोऽपि दो एतन्मते इति बुधैश्चिन्तनीयम् ।

अपि च विशेषेषु व्यावृत्तिप्रत्यय एव न घटते इति **यदुक्तन्तन्न मनोरमम्** । प्रमाणाभावात्

अत्रायमाशयः — विशेषोऽयमन्यान्व्यावर्तयितुं क्षमः । किन्त्वेनमन्यो न कोऽपि व्यावर्तयि शक्नोति । स्वतः व्यावर्तकत्वस्वरूपत्वादेतरयेति स्थितौ " एतस्य व्यावृत्तिप्रत्यय एव न घटत " इति कथनं कथन्नासङ्गतम् ।

अत्र द्रव्यास्तिकनयपर्यायास्तिकनयनैगमनयानुपातिभिश्च त्रिभिर्मान्यं स्वतन्त्रं सामान्यविशेषो भयस्वरूपं स्वतन्त्रसत्ताकम्पदार्थमसहमानः **जैनाचार्यः प्राह**—

तदेतत्पक्षत्रयमपि न क्षमते क्षोदम्, प्रमाणबाधितत्वात् सामान्यविशेषोभयात्मकस्यैव वस्तुनोऽनुभूयमानत्वाच्च । तत्र वस्तुनो लक्षणञ्च–**अर्थक्रियाकारित्वमेव** । तथाहि—यथा गौरि- त्युक्ते खुरककुत्सास्नालाङ्गूलविषाणाद्यवयवसम्पन्नं वस्तुस्वरूपं सर्वगोव्यक्त्यनुयायि प्रतीयते, तथा महिष्यादिव्यावृत्तिरपि प्रतीयते । न हि क्वचित्कदाचित्केनचित्सामान्यं विशेषंविनाकृतमनुभूयते, विशेषा वा तद्विनाकृताः । **तेषामयं विचारः**—सामान्यं प्रतिव्यक्ति कथंचिद्भिन्नङ्कथंचिच्चाभिन्नम्, कथंचिच्च तदात्मकं विसदृशपरिणामवत्, इत्यादि ।

एवं विशेषा अपि नैकान्तेन सामान्यात्पृथग्भवितुमर्हन्ति । यतः यदि सामान्यं सर्वगतं सिद्धं भवेत्' तदा तेषामसर्वगतत्वेन ततो विरुद्धधर्माध्यासः स्यात्, विशेषेभ्योऽव्यतिरिक्तत्वाद्धि सामान्य- मप्यनेकमिष्यते, सामान्यात्तु विशेषाणामव्यतिरेकात्तेऽप्येकरूपा एव । अत्र सामान्यस्यैकत्वञ्च संग्रह- नयार्पणात्सर्वत्र बोध्यम् । एवञ्चासिद्धं सामान्यविशेषयोः सर्वथा विरुद्धधर्माध्यासितत्वमिति **यदुक्त- मार्हतैस्तन्न रुचिकरम्** । यतः —

गौरित्युक्ते खुरविषाणादिसंवलितस्य सास्नावतः चतुष्पदः गोव्यक्तेरेव स्वशक्त्या संग्रहणम्भ- वति, न तु महिष्यादेरन्यस्य चतुष्पदः इति प्रसिद्धमेव लोके । तथा च महिष्यादीनामत्र गोपदेन कथं प्रतिषेधः । यतः **व्यावृत्तिर्नाम**–विवक्षितपदार्थेषु तदितरपदार्थप्रतिषेध एव । एवञ्चायम्प्रतिषेधः कथमपि न घटते । यतः " **प्राप्तौ सत्यान्निषेधः** " तथा **विधिपूर्वकत्वन्निषेधस्येति** नियमात् ।

अत्रायमाशयः—यदि गोपदेन महिष्यादीनामपि बोधः स्यात्, तदा तद्व्यावृत्त्यर्थन्तत्र कश्चन प्रयत्नः कर्तव्यः । परञ्च यदा तत्र तत्पदेन तस्योपस्थितिरेव न भवति तदा तद्व्यावृत्त्यर्थं कस्यापि यत्नस्य तत्रावश्यकता न प्रतिभाति–इति कथं तद्व्यावृत्तिस्तत्रेति विज्ञैर्विचारणीयम् ।

अत्र कथंचिदपि यदि जैनाचार्याणां मतेऽपि केनचित् "**गौरयमिति**" पदेन कुत्रापि महिष्यादेः बोधः क्रियेत चेत्, तदा तत्र तद्व्यावृत्तिरपि स्यात् । यतो न बोधः अतो न व्यावृत्तिरिति। **एतेन " गौरिति पदेन महिष्यादेः व्यावृत्तिरिति " जैनोक्तम्मतमपास्तम्** ।

अपि च "सामान्यं विशेषं विना न कुत्राप्यवतिष्ठते" इति कथनमप्युन्मत्तमतमिव प्रतिभाति ।

यद्यपि सामान्यान्तर्गता एव विशेषा अपि भवन्ति । "सामान्येष्वेव विशेषोऽप्युपलभ्यते— इति वचनात् ।

तथापि – एतादृशः सामान्यविशेषविषयकः प्रत्ययः आपामरजनसाधारणः । अतस्तत्र न कापि विप्रतिपत्तिर्मम । किन्तु पारिभाषिकः तर्कशास्त्रसम्मतः सामान्यविशेषविषयः नैतादृशः स्वमनोवाञ्छितः, येन सर्वत्रैव तदुभयात्मकः प्रत्ययः स्यात् । अतस्तर्कशास्त्रसम्मतयोः सामान्यविशेषविषययोरुपरि यत्सर्वत्रैव तदुभयात्मकत्वेनाक्षिप्तम्परैस्तत् **न समीचीनम्** । यतः —सामान्यस्य जातिरूपत्वमङ्गीकृत्य "**नित्यत्वे सत्यनेकवृत्तित्वन्तत्, अन्त्यो नित्यद्रव्यवृत्तिः विशेषः परिकीर्तितः**" इति—तदुभयोः लक्षणं ग्रन्थकृता कृतमिति बोध्यम् । अतः **जैनोक्तं खण्डनमपास्तम्** । यतः यत्सामान्यं घटत्वादि तन्न विशेषः । यश्च परमाणुवृत्तिरतिरिक्तः विशेषः स च न सामान्यमिति कथं—**सामान्यं विना न विशेषः, तं विना च न सामान्यमिति कथनं** संगच्छेत ।

अतस्तर्कशास्त्रलक्षणमबुद्ध्यैव स्वमनोऽभिलषितन्तदुभयमनुमन्यमानः जैनाचार्यः खण्डयामास इति **तन्न–आदरार्हम्** ।

अपि च वाचकमपि शब्दाख्यं द्व्यात्मकं सामान्यविशेषोभयात्मकम् । यथा सर्वशब्दव्यक्तिष्व-नुयायिशब्दत्वमेकं शाङ्खशाङ्गतीव्रमन्दोदात्तानुदात्तस्वरितादिविशेषभेदादनेकम् । शब्दस्य तदुभयात्मक-त्वम्पौद्गलिकत्वाद्व्यक्तमेव । तथाहि–पौद्गलिकः शब्दः इन्द्रियार्थत्वात् रूपादिवत् । **इति यदुक्तन्तन्न युक्तम्**—शब्दे पौद्गलिकत्वस्य निषेधात् स्पर्शशून्याश्रयत्वात् ।

यद्यप्यत्र केनचिद्देशेन विविधाः हेत्वाभासाः प्रदर्शिताः, **तथापि** ते सर्वे हेया एव बोध्याः प्रमाणाभावात् ।

यच्चोक्तम् "रूपादिवदस्मदादिप्रत्यक्षत्वात् न गगनगुणः शब्दः" इति **तदप्यकिञ्चि-त्करम्**—गगनगुणे स्वीकृते शब्देऽस्मदादिना प्रत्यक्षत्वमिव तद्गुणेऽस्वीकृतेऽपि पुन अस्मदादिनैव प्रत्यक्षत्वस्य सम्भवात् । यतः – येनेन्द्रियेण यस्य प्रत्यक्षत्वन्तेनैवेन्द्रियेण तदभावस्यापि प्रत्यक्षत्वमिति नियमात्तथा बोध्यमत्र ।

अतो न गगनगुणत्वाभावस्य शब्दे सिद्धिः कथमपि कर्तुं शक्यत इति ।

अपि च यदि शब्दो नाकाशगुणः तदा कस्यायं गुण इति विचारणीयम् । विचित्रागतिः जैनाचार्याणां यदिमे शब्दस्य गगनगुणत्वन्नाङ्गीकुर्वन्तीति । न जाने कस्यायं गुण एतन्मते— इति महान् विचारणीयः समागतः विषयः ।

तथाचात्र घटादिपदार्थस्य सामान्यविशेषोभयात्मकत्वस्य खण्डितत्वे तद्वाचकस्य ध्वनेरपि तदुभयात्मकत्वं खण्डितमेव बोध्यम् । अतः —

"विकल्पयोनयः शब्दाः विकल्पाः शब्दयोनयः ।
कार्यकारणता तेषां नार्थं शब्दाः स्पृशन्त्यपि" ॥

"अर्थाभिधानप्रत्ययास्तुल्यनामधेयाः" इति वचनात् – इदमपि संगच्छते ।

अपि च यदुक्तं—"सर्वभावानां हि भावाभावात्मकं स्वरूपमिति"।

यतः प्रत्येकं वस्तु स्वस्वरूपेण सत्, पररूपेण चासत्, इति भावाभावात्मकमेव वस्तुनः स्वरूपम्। यथा चोक्तम्—

"सर्वमस्ति स्वरूपेण पररूपेण नास्ति च ।
अन्यथा सर्वसत्वं स्यात्स्वरूपस्याप्यसम्भवः ।। "

इत्यादिना प्रत्येकस्मिन् घटे सर्वेषां घटव्यतिरिक्तपदार्थानामभावरूपेण वृत्तेरनेकात्मकत्वं घटस्य सूपपादम् । तथा चैकस्मिन्नर्थे ज्ञाते सर्वेषामर्थानां ज्ञानम् ।

तथा चोक्तम्— **"एको भावः सर्वथा येन दृष्टः,**
सर्वे भावाः सर्वथा तेन दृष्टाः ।
सर्वे भावाः सर्वथा येन दृष्टाः ।
एको भावः सर्वथा तेन दृष्टः" ।।

इत्यादि **यदुक्तन्तन्न रुचिकरम्** ।

पूर्ववदत्रापि—एकस्मिन् वस्तुनि भावत्वमभावत्वञ्च नैव स्थातुमर्हति । यत्र भावत्वन्तत्र नाभावत्वम् । यत्र चाभावत्वं न तत्र भावत्वमिति, तयोः परस्परं विरोधात् । अतः कथन्तदुभयत्वमेकत्र तिष्ठेत्—इति विचारणीयम् ।

अपि च भवन्मते—एकस्मिन्नेव पदार्थे तदुभयत्वस्य विद्यमानत्वात् के भावाः के चाभावाः इति परिगणनं कथं स्यात् तदुभयत्वस्यैकत्र सत्वात् ।

अतः प्रत्येकं वस्तु भावाभावोभयात्मकमिति कथनं केवलं साहसमात्रमेवेति बोध्यम् ।

अपि चैको भावात्मकः घटः पदार्थः येन पुरुषेण कुत्रापि दृष्टो न तेन सर्वे भावाः पदार्थाः दृष्टाः । नापि सार्वत्रिका सार्वदिका वा सर्वे घटास्तेन दृष्टाः । अतः— **"एको भावः सर्वथा येन दृष्टः, सर्वे भावाः सर्वथा तेन दृष्टाः"** इति कथनं केवलं बालभाषितमेव ।

न च स्वरूपद्रव्यक्षेत्रकालभावैः सत्त्वं, पररूपद्रव्यक्षेत्रकालभावैस्त्वसत्वम्—इति को विरोधावकाश इति वाच्यम् ।

वस्तुमात्रस्य स्वस्वरूपेणैव सर्वदा सर्वत्र सत्त्वात् । न खलु परस्वरूपेण कोऽपि पदार्थः क्वचित्संस्तिष्ठते, येन तन्निषेध आवश्यकः स्यात् ।

अतः पररूपद्रव्यक्षेत्रकालभावैस्त्वसत्वमिति कथनमसङ्गतमेव ।

यद्यप्यत्र द्वितीयकल्पेऽपि वाचकमपि शब्दरूपं द्वयात्मकम्प्रतीयते । यथा चौरशब्दोऽन्यत्र तस्करे रूढोऽपि दाक्षिणात्यानामोदने प्रसिद्धिः । यथा च कुमारशब्दः पूर्वदेशे आश्विनमासे रूढः । एवमन्येऽपि बहवस्तादृशाः शब्दाः वर्तन्ते । तथापीमे शब्दाः वाचकतया क्वचिदन्यत्र प्रसिद्धा अपि रूढ्यैवान्यत्र प्रसिद्धाः । **अतो वाचकस्य द्वैविध्यं कथमपि न ग्राह्यम्** । अत्र वाच्यवाचकभावस्य प्रकारान्तराणि निम्नलिखितानि बोध्यानि ।

केषांचिन्मते – अपोह एव शब्दार्थः। यथोक्तम् **"अपोहः शब्दलिङ्गाभ्यां न वस्तुविधिनोच्यते"** इति।

अपरे च सामान्यमात्रमेव शब्दानां गोचरः। विधिवादिनां मते च **विधिरेव** वाक्यार्थः। तथाहि – वाक्यस्वरूपः शब्द एव विधिः प्रवर्तकत्वात्, **इत्येके**। अन्ये तु तद्व्यापारो भावनापरपर्यायः इति। नियोग **इत्यपरे**। प्रैषादय **इत्येके**। तिरस्कृततदुपाधिप्रवर्तनामात्रमेव विधिरि**त्यपरे**–इत्यादयः।

एतानि तु जैनशास्त्रेण न्यायकुमुदचन्द्रादौ खण्डितानि बोध्यानि। परञ्चास्मिन्ग्रन्थे न किमपि ग्रन्थकृताक्षिप्तमतो मयापि न किमपि परिहृतम्, आक्षेपपरिहारविषयत्वान्मम लेखस्य।
इति स्याद्वादमञ्जर्युक्तचतुर्दशकारिकाप्रदत्ताक्षेपपरिहारः समाप्तः।

इदानीं सांख्याभिमतप्रकृतिपुरुषादितत्वानां विरोधावरुद्धत्वं ख्यापयन् तद्बालिशताविलसितानामपरिमितत्वं दर्शयति – **आर्हताचार्यः**।

"चिदर्थशून्या च जडा च बुद्धिः शब्दादितन्मात्रजमम्बरादि।
न बन्धमोक्षौ पुरुषस्य चेति कियज्जडैर्न ग्रथितं विरोधि।"

[स्या. म. का. १५, पृ. सं. ९४, पं. १७]

अत्रायमर्थः—चित्–चैतन्यशक्तिः, अर्थशून्या–विषयपरिच्छेदविरहिता, बुद्धिः–महत्तत्वाख्या जडानवबोधरूपा। अम्बरादि – व्योमप्रभृति, भूतपञ्चकं – शब्दादितन्मात्रजम्, शब्दादीनि – पञ्चतन्मात्राणि, सूक्ष्मसंज्ञानि–तेभ्य उत्पन्नानीति। पुरुषस्य – प्रकृतिविकृत्यनात्मकस्यात्मनो, न बन्धमोक्षौ, किन्तु प्रकृतेरेव। तथाहि —

"तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः॥"

तत्र **बन्धपदेन** प्राकृतिकस्यैव ग्रहणम्बोध्यम्।

मोक्षश्च—पंचविंशतितत्वज्ञानपूर्वकोऽपवर्ग एव। जडैः मूर्खैस्तत्त्वावबोधविधुरधीभिः कापिलैः कियन्न ग्रथितं – कियन्न स्वशास्त्रेषूपनिबद्धम्। इति संक्षिप्तार्थोऽवसेयः।

अत्रेदं बोधम्—

सांख्यमते किल दुःखत्रयाभिहतस्य पुरुषस्य तदपघातकहेतौ तत्त्वजिज्ञासा उत्पद्यते। तथाहुः—

"दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ" [सां. का. २].

अत्र **दुःखत्रयञ्च** – आध्यात्मिकाधिदैविकाधिभौतिकमेव ग्राह्यम्। तत्रापि शारीरमानसभेदाच्चाद्यमपि द्विविधम्। **तत्राद्यं** वातादिदोषाणां वैषम्यनिमित्तमेव। **अपरञ्च** – कामक्रोधादिनिबन्धनम्।

आधिभौतिकञ्च – मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्।

आधिदैविकञ्च – यक्षराक्षसग्रहाद्यावेशहेतुकम्। तत्रेमे – आधिदैविकाधिभौतिके द्वेऽपि बाह्योपायसाध्यस्वरूपे दुःखे बोध्ये।

एतद्द्वयातिरिक्तमान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्बोध्यम्।

अनेन दुःखत्रयेण रजः परिणामभेदात् बुद्धिवर्तिना चेतनाशक्तेः प्रतिकूलतयाऽभिसम्बः अभिघातः बोध्यः। अत्राव्यक्तस्वरूपेणैकेन सह महदहंकारपञ्चतन्मात्रैकादशेन्द्रियपञ्चमहाभूतभेदात् त्रयोविंशतिविधं व्यक्तं पुरुषश्चिद्रूप इत्येवंविधानि पञ्चविंशतितत्वानि सन्ति। तथा चोक्तम्—

" मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः " ।। इति।

अत्र **प्रकृतिश्च** – सत्वरजस्तमसां त्रयाणां गुणानां साम्यावस्था बोध्या। प्रकृतेश्च विकार ए बुद्धितत्वम्—

तथाहि – **" प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः "**। इति नियमात् – त बोध्यम्। सेयं बुद्धिः धर्माधर्मभेदाद्द्विविधा। तत्रापि–धर्मज्ञानवैराग्यैश्वर्यरूपाणि चत्वारि **सात्विका** तस्याः रूपाणि।

अधर्माज्ञानावैराग्यानैश्वर्यरूपाणि चत्वारि **तामसानि** सांख्यमतसिद्धानि बोध्यानि। ततोऽ कारादयो क्रमशः बोध्याः। तद्यथा महतोऽहंकारः – अहं करोमीत्यादिप्रत्ययः। तस्माच्च शब्द स्पर्शरूपरसगन्धाख्यपञ्चतन्मात्राणि–उत्पद्यन्ते। तस्मादेव चक्षुस्त्वगित्याद्येकादशेन्द्रियाणि, पञ्चतन् मात्रेभ्यश्च पञ्चमहाभूतानि समुत्पद्यन्ते - इति सर्वं सांख्यकारिकादिशा बोध्यम्।

अत्र पञ्चविंशतितत्त्वानि—

सांख्याभिमतानि – इमानि – बोध्यानि—

ज्ञः १	पुरुषः १	प्रकृतिविकृतिशून्यः १
अव्यक्तम् १	मूलप्रकृतिः १	प्रकृतिरेवेयं न विकृतिः १
	महान् १ अहंकारः १ { शब्दस्पर्शरूप- रसगन्धाख्यानि पञ्चतन्मात्राणि ५	प्रकृतिविकृतयः ७
व्यक्तम् २३	{ चक्षुस्त्वक्श्रोत्र- रसनघ्राणेन्द्रियाणि पञ्चज्ञानेन्द्रियाणि ५ मनश्च १ { वाक्पाणिपादपायूपस्थाख्यानि पञ्चकर्मेन्द्रियाणि ५ { पृथिवीजलतेजः वाय्वाकाशरूपाणि पञ्चमहाभूतानि ५	केवलविकृतय एव १६
२५	२५	२५

पुरुषस्त्वेतन्मते पुष्करपलाशवन्निर्लेपो बोध्यः। तथा चोक्तम्—

" अमूर्तश्चेतनोऽभोगी नित्यः सर्वगतोऽक्रियः।
अकर्ता निर्गुणः सूक्ष्मः आत्मा कापिलदर्शने "॥

अत्र पङ्ग्वन्धवत्प्रकृतिपुरुषयोः संयोगो बोध्यः।

अत्रायम्भाव:—प्रकृतिपुरुषयोः संयोगेनैव सर्वं कार्यं सम्पद्यते। अन्यथा प्रकृतेरचेतनत्वेन पुरुषगतचैतन्यप्रतिबिम्बमन्तरा सृष्टिः कथंकारमुत्पद्येत इति विवेचनीयम्। यतः चिच्छक्तिश्च विषय-परिच्छेदशून्यैव विद्यतेऽतः विभिन्नेन्द्रियप्रणालिकया सुखदुःखादयो विषयाः बुद्धौ प्रतिसंक्रामन्ति। बुद्धिश्चोभयमुखदर्पणाकारातस्तस्यां चैतन्यशक्तिः प्रतिबिम्बते। ततः सुख्यहमित्यादयः प्रत्ययाः प्रभवन्ति। आत्मा च स्वं बुद्धेरव्यतिरिक्तमेव मन्यते। यथाह पतञ्जलिः **" शुद्धोऽपि पुरुषः प्रत्ययं बौद्धमनुपश्यति, तमनुपश्यन्नतदात्मापि तदात्मक इव प्रतिभासते। मुख्यतस्तु बुद्धेरेव विषय-परिच्छेदः।"**

तथाचात्र वाचस्पतिः—सर्वो व्यवहर्ता आलोच्य **नन्वहमत्राधिकृत** इत्यभिमत्य कर्तव्य-मेतन्मयेत्यध्यवस्यति ततश्च प्रवर्तते – इति सिद्धम्। चिच्छक्तिसन्निधानाच्चाचेतनापि बुद्धिश्चेतने-वावभासते।

आसुरिश्चाह—

" विविक्ते दृक्परिणतौ बुद्धौ भोगोऽस्य कथ्यते।
प्रतिबिम्बोदयः स्वच्छे यथा चन्द्रमसोऽम्भसि॥

विन्ध्यवासी त्वेवमाह –

" पुरुषोऽविकृतात्मैव स्वनिर्भासमचेतनम्।
मनः करोति सान्निध्यादुपाधिः स्फटिकं यथा "॥

प्रकृतिश्च नाना–पुरुषाश्रया सती बध्यते संसरति मुच्यते च न पुरुष इति बन्धमोक्षसंसाराः पुरुषे उपचर्यन्ते। यथा जयपराजयौ भृत्यगतावपि स्वामिन्युपचर्येते तथा भोगापवर्गयोः प्रकृतिगतयोरपि विवेकाग्रहात्पुरुषे सम्बन्ध इति।

तदेतज्जैनाचार्याः न स्वीकुर्वन्ति, निगदन्ति ते यच्चिच्छक्तिश्च–विषयपरिच्छेदशून्या चेति परस्परविरुद्धं वचः। सा चेत्स्वपरपरिच्छेदात्मिका नेष्यते तदा चिच्छक्तिरेव सा न स्यात्, घटवत्।

न चामूर्तायाश्चिच्छक्तेः बुद्धौ प्रतिबिम्बोदयो युक्तः, तस्य मूर्तधर्मत्वात्।

तदेतन्न कथंचिन्मान्यम्—यतो या चिच्छक्तिः सा न विषयपरिच्छेदात्मिकातो न दोषः। या चोभयपरिच्छेदस्वरूपा न भवति सा न चिच्छक्तिरित्यत्र न किमपि प्रमाणमुपन्यस्तम्–इति तद्वचः कः श्रद्दधेत्।

वस्तुतः या चिच्छक्तिः सा कथं विषयपरिच्छेदात्मिका। यदि विषयाकारा स्यात् सा तदा चिच्छक्तिः कथं स्यात्=उभयोः परस्परं विरोधात्-इति-मुहुर्मुहुः विचारणीयम्। न चात्र जडस्वरूपायां

बुद्धौ विषयाध्यवसायः असंभव इति वाच्यम्, अचेतनाया अपि बुद्धेश्चिच्छक्तिसान्निध्यादेव चेतन वदवभासनाद्विषयाध्यवसायसम्भवात् ।

अपि च यदुक्तमचेतनापि चेतनावतीव प्रतिभासत इतीवशब्देनारोप एव ध्वन्यते। आरोपश्चा नार्थक्रियासमर्थः। न खलु कोपादिना समारोपिताग्नित्वो माणवकः कदाचिदपि मुख्याग्निसाध्यां दाहा र्थक्रियां कर्तुं समर्थः प्रभवति – इति ।

तदप्यसारम्— इवशब्दस्यात्र नारोपोऽर्थः, अपि तु समानार्थक एवेवशब्दोऽत्रावसेयः तथा च चिच्छक्तेरेव विषयाध्यवसायो घटते, न जडरूपाया बुद्धेरिति कथनं कथन्न सारम्। चिच्छक्ति सम्पर्कादेव बुद्धावपि चेतनावत्वस्य सम्भवात् । "**पुरोहितोऽयं राजा संवृत्तः**" इतिव

अत्रायमाशयः–यथा राज्ञः सम्पर्कात् राजपुरोहितोऽपि राजा भवति, तथैव चिच्छक्तिसाहाय्ये नाचेतनापि बुद्धिः चेतनावती भविष्यत्येवेति ।

एवमहङ्कारादयोऽपि चेतनावत्या बुद्धेरुत्पद्यन्त एव। अन्यथा बुद्धौ चेतनावत्वसम्पादनस्य किम्फलम्? "तथा चाहंकारोऽपि न बुद्धिजन्यो युज्यत" इति कथनं कथन्नासङ्गतम्।

न च नानाश्रयायाः प्रकृतेरेव बन्धमोक्षौ संसारश्च, न पुरुषस्येति कथनं कथन्नानर्थकं यतोऽनादिभवपरम्परानुबद्धया प्रकृत्या सह यः पुरुषस्य विवेकाग्रहलक्षणोऽविष्वग्भावः स एव चेत बन्धस्तदा कोऽन्यो बन्धः स्यादिति वाच्यम् ।

अत्रोक्तविधस्य त्रिविधस्य बन्धस्य सत्वेऽपि प्रकृत्या पुरुषस्य सम्बन्धविच्छेदादेव मोक्ष सम्भवात् ।

अत्रायं विमर्शः — ज्ञानोद्रेकादिन्द्रियरागोपशमात्कृत्स्नकर्मक्षयाच्च मोक्षस्य त्रैविध्येऽ ज्ञानद्वारैव तत्सिद्धौ गौणत्वम्। किन्तु तत्रात्यन्तिकदुःखनिवृत्तेरेव मुख्यम्मोक्षत्वं सांख्यशास्त्रसम्मतम्।

तथा च— सम्यग्ज्ञानाधिगमात्समेषामान्तरिकबाह्यादीनां रागादिदोषाणामुपशमादात्यन्तिक रूपेणाध्यात्मिकादिदुःखत्रयाणां नाशान्मोक्षस्यावाप्तिर्भवति। स एवायम्मुख्यः मोक्षः।

बन्धश्चापि प्राकृतिकवैकारिकदाक्षिणभेदात्त्रिविधो बोध्यः । **तदुक्तम्**–पञ्चशिखाचार्यै

> "**प्राकृतेन तु बन्धेन तथा वैकारिकेण च।**
> **दाक्षिणेन तृतीयेन बद्धो जन्तुर्विवर्तते**" ॥ इति ॥

अनेन पुरुषतत्वानभिज्ञो ह्यीष्टापूर्तकारी कामोपहतचित्त एव बध्यते। यथोक्तम्—

> "**इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो येऽभिनन्दन्ति मूढाः।**
> **नाकस्य पृष्ठे ते सुकृतेन भूत्वा इमं लोकं हीनतरं वा विशन्ति**" ॥ तथा च —

पुरुषतत्वज्ञेष्टपूर्तिकर्त्री प्रकृतिरेवाभिमुच्यते। "**बद्धो मुच्येत बन्धनात्**" इति प्रमाणेनापि यः बद्धः स एव मुच्यते, इति ज्ञायते।

एवञ्च यदा प्रकृतिः बद्धा तदा मुक्तिरपि तस्या एव मान्या। परञ्च तत्र बद्धा प्रकृतिरिति मन्यते किन्तु मुक्ता सा न मन्यते भवतेति विचित्रैव गतिः जैनाचार्यमतीनामिति सद्विचारशून्यमेनं को बोधयेत्।

अत्र प्रकृतिपुरुषयोः विवेकदर्शनात् प्रवृत्तेरुपरतायां प्रकृतौ पुरुषस्य स्वरूपेणावस्थानमेव मोक्षः इति बोध्यम्।

न च प्रवृत्तिस्वरूपायाः प्रकृतेरौदासीन्यं कथमिति वाच्यम्, पुरुषार्थनिबन्धनाया एव तस्याः प्रवृत्तेः स्वीकारात्। तत्र पुरुषार्थश्च विवेकख्यातिरेव बोध्यः। तस्यां जातायां सा विनिवर्तते कृतकार्यत्वात्। यथा चोक्तम् —

" रंगस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः " ॥

इत्यादिविविधवचनात्तथा ज्ञायते।

न च यथा नर्तकी पारिषदेभ्यो नृत्यम्प्रदर्श्य निवृत्तापि पुनस्तत्कुतूहलवशात्प्रवर्तते, तथा प्रकृतिः पुरुषायात्मानं दर्शयित्वा निवृत्तापि पुनः कथन्न प्रवर्ततामिति वाच्यम्, मोक्षप्राप्त्यनन्तरम्पुनस्तस्या प्रवृत्तौ साधकाभावात्। **" न स पुनरावर्तते " यद्गत्वा न निवर्तन्ते तद्धाम परमं मम** इत्यादिबहुविधश्रुतिस्मृतिप्रामाण्यादिदन्निश्चीयते।

अतो बद्धायाः प्रकृतेः मुक्तिप्राप्त्यनन्तरम्पुनः प्रवृत्तावसामर्थ्यम्बोध्यम्।

एतेनात्र जैनाचार्यप्रदत्ता आक्षेपाः समस्ताः निरस्ता बोध्याः।

इति स्याद्वादमञ्जर्युक्तपञ्चदशकारिकाप्रदत्ताक्षेपपरिहारः समाप्तः ॥

क्रमशः —

साहित्यतत्त्वविमर्शः

श्रीरेवाप्रसादद्विवेदी

साहित्यनाम्ना यस्येदानीं भूयान् प्रवादस्तत्त्वमिदं संस्कृतवाङ्मयमनुवीक्ष्य प्रमाणपुरःसरमिह कणेहत्य विमृशामः।

'साहित्यम्' इति पदं धारणार्थकाद् दधातेः, गतित्यागान्यतरार्थकाज्जहातेः गत्यर्थकाद् हिनोतेर्वा क्ते प्रत्यये निष्पन्नेन हितेतिशब्देन सह-समानान्यतरयोगात् सिद्धे सहितेति शब्दे भाववचनस्य ष्यञो योगेन व्युत्पद्यते, 'कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेने'ति तन्त्रकृदुक्तेः सम्बन्धवचनं च भवति। सम्बन्धश्चात्र प्रकृतिघटकीभूतधातूपपदशक्तिस्वाभाव्याद् धृत्युत्सर्गसंविदामन्यतमस्य सर्वेषामेव वाऽर्थानां सहभावरूपः, समभावरूपः, अभिन्नानुपूर्वीकशब्दवाच्यतया तदुभयरूपो[1] वा सम्भवति। अर्श आदित्वात् [५।२।१२७] मतुबर्थेऽचि कृते चैतदेव पदं सम्बन्धवद्वचनमपि सम्भवति। पक्षेऽस्मिन् पदमेतत् कीटात् कैटभवैरिम्, सर्षपात् सुमेरुं रजःकणाच्च ब्रह्माण्डपिण्डं यावत् स्थितं कृत्स्नमप्येतद् विश्वं क्रोडीकर्त्तुमुत्कन्धरायते। प्रथितं च विश्वस्य तथाविधं साहित्यं निगमागमेषु। भगवती श्रुतिः 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते'—इति जीवात्मपरमात्मनोः साहचर्यं, समानुभवशालित्वम् एकाधिकरणवृत्तित्वं च सयुजेत्यादिपदत्रिकेण स्फुटमुदीरयति, 'इयं विसृष्टिर्यत आबभूव' इति प्रपञ्चस्यास्य निष्पत्तिरूपं त्यागापरपर्यायमुत्सर्गमपि यावत् तथैव

---

१ ज्ञानसाहचर्योभयार्थे साहित्यशब्दप्रयोगोऽभियुक्तैर्बहुत्र कृतः। तथाहि—

(क) परस्परसापेक्षाणां तुल्यरूपाणां युगपदेकक्रियान्वयित्वं साहित्यम्—श्राद्धविवेकः।

(ख) तुल्यवदेकक्रियान्वयित्वम्, बुद्धिविशेषविशेष्यत्वं वा साहित्यम्।

—शब्दशक्तिप्रकाशिका

(ग) साहित्यमेकक्रियान्वयित्वम्। तद् यथा—'धवखदिरौ छिन्धि' इत्यत्र धवखदिरप्रतियोगिकं यत् साहित्यम्, तन्निरूपितं यदवयवविभागरूपं फलम्, तज्जनिका या छिदिक्रिया, तदनुकूलकृतिमाँस्त्वम्—इति।—सारमञ्जरी।

(घ) श्राद्धविवेकस्य [चौखम्भासंस्करणस्य] पञ्चमे पृष्ठे 'अन्नोत्सर्गानन्तरं सप्रणवां सव्याहृतिकां गायत्रीं जपेत्' इति कात्यायनसूत्रव्याख्याने साहचर्यार्थे साहित्यशब्दो नैकवारं प्रयुक्तो लभ्यते।

(ङ) वाच्यप्रत्ययेययोर्नास्ति व्यङ्ग्यव्यञ्जकतार्थयोः।
तयोः प्रदीपघटवत् साहित्येनाप्रकाशनात्॥ व्यक्तिविवेके [१०७ पृष्ठे चौ. सं.]

(च) यच्छब्दस्य पृथगिदमादिसाहित्ये तच्छब्दस्य च पृथगिदमादिसाहित्ये यत्तदोः परस्परसाहित्ये च बहवो भेदाः व्यक्तिविवेकव्याख्याने—१७६ पृ. चौ. सं.

न न कीर्त्तयति । पञ्चीकरणवादेन, 'त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मी'त्यादिभिर्वचनैश्च तेषु तेष्वागमेष्वपि सहावस्थितिरेकप्रत्ययगोचरता चास्य पुष्कलं प्रपञ्चिते लभ्येते । तदित्थं साहित्यशब्दो द्वन्द्वभावं तदापन्नं विश्वं च तथैव क्रोडीकर्त्तुं क्षमते यथा निर्द्वन्द्वमवाङ्मनसगोचरं च किञ्चिदपोह्य प्रतिपाद्यं तत्त्वं ब्रह्मशब्दः ।

आलङ्कारिकाः पुनः साहित्यपदं शब्दार्थयोरेव संकोचयन्ति । काव्यशास्त्र-परम्परायामिदं भामहस्य काव्यलक्षणे 'शब्दार्थौ सहितौ काव्यम्' इत्यत्र[2] शब्दार्थविशेषणीभूते सहितपदार्थे गर्भितं दृश्यते । तत्र साहित्येतिशब्दप्रयोगपूर्वं ध्वनिकृतः श्रीमदानन्दवर्धनाचार्या एव सर्वप्रथमं[3] दृष्टिं निचिक्षिपुः, तेषामेव ग्रन्थे [ध्वन्यालोके]--

'शब्दार्थयोः साहित्येन काव्यत्वे..' [४।६ वृत्तिः] इति पदस्यास्य सर्वप्रथमं स्फुटं प्रयुक्तत्वात्[4] । अत्र साहित्यशब्दः साहचर्यसामान्ये प्रयुक्त इति पङ्क्तेरस्याः पूर्वापरग्रन्थेन प्रमाप्यते । तथाहि—

> **'बन्धच्छायाप्यर्थद्वयानुरूपशब्दसन्निवेशः । अनपेक्षितार्थविशेषाक्षररचनैव बन्धच्छायेति नेदं नेदीयः सहृदयानाम् । एवं हि सति अर्थानपेक्षचतुरमधुरवचनरचनायामपि काव्यव्यपदेशः प्रवर्तेत । शब्दार्थयोः साहित्येन काव्यत्वे कथं तथाविधे विषये काव्यत्वव्यवस्थेति चेत् ? परोपनिबद्धार्थविरचने यथा तत्काव्यत्वव्यवहारः तथा तथाविधानां सन्दर्भाणाम्'** [ध्वन्यालोके ४।६ वृत्तिः] इति ।

अत्र साहित्यतया द्विविधः सम्बन्धश्चर्चितो लभ्यते (१) शब्दार्थान्यतरप्रतियोगिकः तदुभयान्तरानुयोगिकः

---

२ मेधाया गतेऽङ्के श्रीरामनिहालशर्माणः 'भामहसम्मतकाव्यस्वरूपानुसन्धानम्' इति स्वलेखे 'शब्दार्थौ सहितौ काव्यम्, इति वाक्यं भामहस्य काव्यलक्षणतया संमतं नास्तीति प्रत्यपादयन् । तत्खलूपरिनिर्दिष्टयाऽऽनन्दवर्धनोक्त्याऽग्रिमेण च प्रतिपादनेन सर्वैरेव काव्यशास्त्रकृद्भिः प्रायेणास्यैव वाक्यस्य काव्यलक्षणतयाङ्गीकृतेः संप्रदायविरुद्धम् । भामहालङ्कारे च वाक्यान्तराणां काव्यलक्षणप्रतिज्ञावाक्यत्वेन ग्रहीतुमशक्यत्वाद् ग्रन्थत्वपरिहाणिश्च स्फुटा 'विषयो विषयश्चैवे'त्यादिक्रमेण प्रवर्तितस्यैवाधिकरणपञ्चकसनाथस्य सन्दर्भस्य ग्रन्थतया विद्वद्भिरभिमतत्वात् ।

३ दण्डिनः काव्यादर्शे, वामनस्य काव्यालङ्कारसूत्रवृत्तौ, उद्भटस्य काव्यालङ्कारसारसङ्ग्रहे साहित्यपदं न लभामहे । समकालिकस्य रुद्रटस्यापि काव्यालङ्कारे पदमेतन्नास्ति । वामनेन 'काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्त्तत' इति यद्यप्युक्तं तथापि तत्र साहित्यपदं नोपलभ्यते ।

४ महामहोपाध्यायः काणे साहित्यशब्दस्यानन्दवर्धनकृतममुं प्रयोगं 'History of Samskṛta Poetics' नाम्नि तस्य ग्रन्थरत्ने नोद्धरति [द्र० उक्तस्य ग्रन्थस्य १५२–१८८, ३२८ पृ०] डॉ० राघवन्महोदयोऽपि पङ्क्तिमिमां न स्पृशति [द्र० Name of Samskṛta Poetics' in 'Some concepts of the Alaṇkāra Shāstra']

श्रीमान् ग. त्र्यं. देशपाण्डेमहानुभावोऽपि तस्य 'भारतीय साहित्यशास्त्र'–नाम्नि ग्रन्थे ध्वन्यालोकस्येमां पङ्क्तिं न स्पृशति । एतेषां संरम्भो राजशेखरस्य साहित्यविद्येत्युद्धरणे दृश्यते ।

शब्दप्रतियोगिकोऽर्थानुयोगिकः, अर्थप्रतियोगिकः शब्दानुयोगिकश्च (२) शब्दार्थद्वयानुयोगिको गुणालङ्कारादिप्रतियोगिकश्चेति । तत्र प्रथमः पक्षः प्रायेण सर्वविदितः । काव्यप्रकाशटीकासु शब्दार्थयोर्व्यासज्यवृत्तितां काव्यस्यामनन्तो माणिक्यचन्द्रादयस्तमिमं बहुधा प्रापञ्चयन् । तद्यथा—

'शब्दार्थौ मिलितौ जातिव्यक्तिवदन्योन्याव्यभिचारित्वेन [काव्यम्] । एतेन शब्दार्थयोर्भेदवादिनः प्रत्युक्ताः । तैर्ह्युक्तं मुखे शब्दमुपलभामहे भूमावर्थमिति । एतेन ००० शब्दार्थयोः प्रत्येकं काव्यत्वमिति. . .निराकृतम् ।' इति ।

द्वितीयस्तु विरलमतिगोचरः । तमिमं पक्षं राजशेखरः स्वकृतौ काव्यमीमांसायां सर्वप्रथमं किञ्चिदुन्छूनयति । स हि कृत्स्नमपि वाङ्मयं पौरुषेयापौरुषेयतया द्विशाखीकृत्य तस्य चतुर्विधत्वमुपपाद्य तन्निष्यन्दात्मना साहित्यमपि विद्यास्थानत्वं लम्भयते—

पञ्चमी साहित्यविद्येति यायावरीयः ।

सा हि चतसृणामपि विद्यानां निष्यन्दः । [का. मी. बडौदा सं० पृ. ५] इति

अस्या लक्षणं च—

'शब्दार्थयोर्यथावत् सहभावेन विद्या साहित्यविद्ये'ति सूत्रयति । न पुनरिमां विशकलय्य विवेचयति । ततोऽत्र संमूर्छता युक्तिवादेन विविधाः सम्प्रदायाः प्रवर्त्तन्ते । तत्र

(१) कुन्तकस्य काव्यैकधर्मतावादः—

राजानकग्रामणीः श्रीमान् कुन्तकाचार्यः काव्यालङ्कारनाम्नि स्वग्रन्थे तद्वृत्तौ च वक्रोक्तिजिविते साहित्यं काव्यैकवृत्तिधर्ममामनति । स हि—

"शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि । (१।७) इति

स्वसम्प्रदायानुरूपयोजनापुरस्सरं भामहस्यैव 'शब्दार्थौ सहितौ काव्यम्' इति वाक्यं काव्यलक्षणतयोद्धृत्य 'सहिता'विति पदं व्याचक्षाणः साहित्यतत्त्वमित्थं परिभाषयते—

'साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।
अन्यूनानतिरिक्तत्वमनोहारिण्यवस्थितिः ।।' (१।१७)

वृत्त्या च—" अनयोः = शब्दार्थयोः शोभाशालितां = सौन्दर्यश्लाघितां प्रति या कापि = अलौकिकीचेतनचमत्कारितायाः कारणम्, अन्यूनानतिरिक्तत्वमनोहारिणी = परस्परसाम्यसुभगा अवस्थितिः = विचित्रैव विन्यासभङ्गी सा सहितयोर्भावः साहित्यमुच्यते "—इत्याशयया कारिकार्थं विश्लेषयति ।

राजशेखरः शब्दार्थयोः स्वरूपं काव्यगतत्वेऽपि—

'व्याकरणस्मृतिनिर्णीतः शब्दः, निरुक्तनिघण्ट्वादिभिर्निर्दिष्टस्तदभिधेयः अर्थः ।

[ब० सं० का० मी० अध्यायः ९]—इति

वाङ्मयान्तरसाधारण्येनैव प्रत्यपादयत् । अन्वाख्याननदीष्णैर्वैय्याकरणैः प्रतिपादिता एव सुप्तिङ्कृत्तद्धितसमासभेदभिन्नाः पञ्च वृत्तीरपि च तथैव न्यदर्शयत् । भेदोपभेदाँश्चामूषां प्रापञ्चयत् । कुन्तकः प्रपञ्चमिममन्यथयन् काव्यत्वाभिमतयोः शब्दार्थयोस्तद् वैलक्षण्यमेवमाविरबीभवत्—

'वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि ।
तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः ॥ (१।८)
शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।
अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः' ॥ (१।९)

राजशेखरः शब्दार्थयोः सहभावमब्रूत, प्रतियोग्यनुयोगिनौ त्वस्य नोदमीलयत्[5]।

'अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।
औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः ।
वागार्थाविव सम्पृक्तौ,
तमर्थमिव भारत्या सुतया योक्तुमर्हसि ।'

इत्येवमभियुक्तवचोभिस्तु शब्दस्यार्थेनार्थस्य च शब्देनानुयोगिप्रतियोगिभावः प्रचारितो लभ्यते। कुन्तकस्तत्र प्रत्यवतिष्ठते। तत्रोक्तं प्रचारं पूर्वपक्षतया—

'शब्दार्थौ सहिताविव प्रतीतौ स्फुरतो यदा।
सहिताविति तावेव किमपूर्वं विधीयते ॥ (१।१६)

अभिधानाभिधेयाववियुक्तावेव सर्वकालं ज्ञाने प्रतिभासेते, तदेवं शब्दार्थयोर्निसर्गसिद्ध साहित्यम्, तदत्र[6] तदभिधानं निष्प्रयोजनम्' इति प्रदर्श्य सिद्धान्तपक्षाय प्रक्रममाणः—

'न वाच्यवाचकलक्षणशाश्वतसम्बधनिबन्धनं वस्तुतः साहित्यमुच्यते, यस्मादेतस्मिन् साहित्यशब्देनाभिधीयमाने कष्टकल्पनोपरचितानि 'गाङ्कुटादि (१।२।१) वाक्यानि, असम्बद्धानि शाकटिकादिवाक्यानि च सर्वाणि साहित्यशब्देनाभिधीयेरन्, तेन पदवाक्यप्रमाणव्यतिरिक्तं किमपि तत्त्वान्तरं साहित्यमिति विभागोऽपि न स्यात्।'—इति विप्रतिपाद्य—

'वाचकस्य वाचकान्तरेण वाच्यस्य च वाच्यान्तरेण साहित्यमभिप्रेतम्, न तु[7] वाचकस्य वाच्येन, वाच्यस्य च वाचकेन, प्रयोजनाभावादसमन्वयाच्च।'

एवं तं शब्दप्रतियोगिकं शब्दान्तरानुयोगिकमर्थप्रतियोगिकमर्थान्तरानुयोगिकं च निगमयति। पूर्वाचार्येषु दृष्टां साहित्यतत्त्वविमर्शकृपणतामपि—

'यदिदं साहित्यं नाम तद् एतावति निःसीमनि समयाध्वनि साहित्यशब्दमात्रेणैव प्रसिद्धम्, न पुनरेतस्य कविकर्मकौशलाधिरूढिरमणीयस्याद्यापि कश्चिदपि विपश्चिद् 'अयमस्य परमार्थः' इति मनाङ्मात्रमपि विचारपदवीमवतीर्णः—इति

---

५ कुन्तको राजेशेखरं नामग्राहपूर्वं स्मरति—'भवभूतिराजशेखरादिविरचितेषु बन्धसौन्दर्यसुभगेषु मुक्तकेषु (विचित्रवक्रत्वविजृम्भितं) दृश्यते, (१।५२ वृत्तिः) इति। काव्यमीमांसां तु नोद्धरति।

६ मूले—'कः सचेताः पुनस्तदभिधानेन निष्प्रयोजनमात्मानमायासयती'ति पङ्क्तिः।

७ मूले—'ननु च वाचकस्य वाच्यान्तरेण वाच्यस्य वाचकान्तरेण कथं न साहित्यमिति चेत् तन्न, क्रमव्युत्क्रमे प्रयो०' इत्येवंरूपा पङ्क्तिरस्ति। तत्र 'अन्तरेणे'तिव्यर्थम्।

कटाक्षयन्—स्वोपज्ञतामेवास्य कण्ठरवेणैवमुद्भेदयति—

'तदद्य सरस्वतीहृदयारविन्दमकरन्दबिन्दुसन्दोहसुन्दराणां सत्कविवचसामन्तरामोदं मनोहरत्वेन परिस्फुरदेतत् [साहित्यम्] सहृदयषट्चरणगोचरतां नीयते' इति। साहित्यमनयोरिति लक्षयति च।

साहित्यस्येव पदवाक्यप्रमाणानामपि काव्योपयोगिताम्—

'एतेषां पदवाक्यप्रमाणसाहित्यानां चतुर्णामपि प्रतिवाक्यमुपयोगः। तथा च (१) 'एतत्पदमेवं स्वरूपं गकारौकारविसर्जनीयात्मकम् एतस्य चार्थस्य प्रातिपदिकार्थपञ्चकलक्षणस्य आख्यातपदार्थषट्कलक्षणस्य वाचकमिति पदसंस्कारलक्षणस्य व्यापारः (२) पदानाञ्च परस्परान्वयलक्षणसम्बन्धनिबन्धनमेतद्वाक्यार्थतात्पर्यमिति वाक्यविचारलक्षणस्योपयोगः (३) प्रमाणेन प्रत्यक्षादिना एतदुपपन्नमिति युक्तियुक्तत्वं नाम प्रमाणलक्षणस्य प्रयोजनम्, (४) इदमेव परिस्पन्दमाहात्म्यात् सहृदयहारितां प्रतिपन्नमिति साहित्यस्योपयुज्यमानता।'

—एवमुरीकृत्य साहित्यस्यैव मौलिभूतत्वमेवमुद्दिशति—

'एतेषां यद्यपि प्रत्येकं स्वविषये प्राधान्यम्, अन्येषां गुणीभावः, तथापि सकलवाक्यपरिस्पन्दजीवितायमानस्यास्य साहित्यलक्षणस्यैव कविव्यापारस्य वस्तुतः सर्वातिशायित्वम्। यस्मादेतदमुख्यतयापि यत्र वाक्यसन्दर्भान्तरे स्वपरिमलमात्रेणैव संस्कारमारभते तस्यैतदधिवासशून्यतामात्रेणैव रामणीयकविरहः पर्यवस्यति। तस्मादुपादेयतायाः परिहाणिरुत्पद्यते। तथा च स्वप्रवृत्तिवैयर्थ्यप्रसङ्गः।'

तदित्थं कुन्तकः साहित्यं काव्यस्यैवासाधारणं धर्ममामनति येनेदं सौन्दर्यशालितां लभते। अतश्चासौ रसालङ्काररीतिगुणवृत्तिप्रभृतीनां समेषामेव शब्दार्थशोभाजनकानां परस्परस्पर्धया साम्यसुभगां तद्विदानन्दसम्पादनपटिष्ठां कामप्यन्तरिन्द्रियैकसंवेद्यां वाङ्मयान्तरासामान्यां यौगपद्येनावस्थितिं साहित्यपदव्यपदेश्यामामनति—

'मार्गानुगुण्यसुभगो माधुर्यादिगुणोदयः।
अलङ्करणविन्यासो वक्रतातिशयान्वितः॥

वृत्त्यौचित्यमनोहारि रसानां परिपोषणम्।
स्पर्धया विद्यते यत्र यथास्वमुभयोरपि॥

सा काप्यवस्थितिस्तद्विदानन्दस्पन्दसुन्दरा।
पदादिवाक्परिस्पन्दसारः साहित्यमुच्यते॥' [१।१७ अन्तरश्लोकाः]

एवं स्थिता सौन्दर्यजनकता कुन्तकमते साहित्यस्य।

(२) भोजस्य द्वादशसम्बन्धतावादः—

भामहस्य साहित्यसंविद् आनन्दवर्धनराजशेखरकुन्तकानां विवेचनात्रयीमापद्य यां सहृदयावर्जनचातुरीं भेजे सैव भोजराजस्य विश्लेषणप्रयागमुपेत्य तीर्थभावमुपेयुषी विबुधसंभावनास्पदं

समपद्यत । भोजराजः साहित्यस्य द्वादशसम्बन्धात्मकतां सिषाधयिषुः शृङ्गारप्रकाशं नाम प्रबन्धहीरकं प्रस्तौति । तत्रासौ महता विस्तरेणास्य विचारानुत्कीर्णयति । तथाहि—

'तत् [काव्यं] पुनः शब्दार्थयोः साहित्यमामनन्ति । तद् यथा 'शब्दार्थौ सहितौ काव्यम्' इति । कः शब्दः ? येनोच्चारितेनार्थः प्रतीयते ।०००। कोऽर्थः ? यः शब्देन प्रत्याय्यते ।०००। किं साहित्यम् ? यः शब्दार्थयोः सम्बन्धः । स च द्वादशधा (१) अभिधा (२) विवक्षा (३) तात्पर्यम् (४) प्रविभागः (५) व्यपेक्षा (६) सामर्थ्यम् (७) अन्वयः (८) एकार्थीभावः (९) दोषहानम् (१०) गुणोपादानम् (११) अलङ्कारयोगः (१२) रसावियोगश्च । [शृङ्गारप्रकाशे १।१२ उदा० वृत्तिः]

सप्तमस्य प्रकाशस्यावतरणिकायां पुनरपीमानेवं स्मरति—

'अभिधाविवक्षातात्पर्यप्रविभागव्यपेक्षासामर्थ्यान्वयैकार्थीभावदोषहान-गुणोपादानालङ्काररसावियोगरूपाः शब्दार्थयोर्द्वादशसमर्थाः (सम्बन्धाः) साहित्यमुच्यते ।'

एषामादिमानामष्टानां निरूपणं शृङ्गारप्रकाशस्य सप्तमाष्टमयोः प्रकाशयोः साटोपमुपलभ्यते । तद्यथा—

(१) शब्दस्यार्थाभिधायिनी शक्तिरभिधा [पृ. २२३ मैसूरसंस्करणम्]

(२) शब्देष्वर्थेऽभिधानदानाभिप्रायो विवक्षा । विवक्षातः कारकाणि भवन्ति 'अक्षान् दीव्यति, अक्षैर्दीव्यत' इति । [पृ. २३८]

(३) 'यत्परः शब्दः स शब्दार्थ' इति तात्पर्यम् । तच्च वाक्य एव । [पृ. २४६]

(४) पदे वाक्ये प्रबन्धे वास्यैतावतः शब्दस्यायमर्थोऽस्मिन्नर्थे चायमेतावच्छब्द इति शब्दार्थयोर्मिथःसम्बन्धितया पृथक्त्वेनाऽवधारणं प्रविभागः [पृ. २६३]

(५) उद्भूतसम्बन्धव्यतिरेकाणां पदार्थानामितरेतरं प्रत्याकाङ्क्षा व्यपेक्षा [देवो वर्षतीत्यादौ सन्निहितस्य, प्रविश पिण्डीं गृहं भक्षयेत्यादौ च व्यवहितस्य सा [पृ. २६८]

(६) व्यपेक्षावतां पदार्थानां मिथःसम्बन्धिरूपता सामर्थ्यम् [पृ. २८४]

(७) [कः पुनरयं] सम्बन्धो [अन्वयो] नाम अहानिर्व्यपेक्षा व्यतिषङ्ग इति [पृ. २८४]

(८) व्यपेक्षावतां समर्थानामन्वितार्थानां च पदार्थानां तिलतण्डुलवत्, नीरक्षीरवत्, पांसूदकवच्च यदविभागरूपेण भवनं स एकार्थीभावः । [पृ. २९७]

दोषहानादीनाञ्च चतुर्णां सम्बन्धानां स्वरूपानुसन्धानं भोजराजस्यैव सरस्वतीकण्ठाभरणेत्यन्वर्थनाम्नि स्वतन्त्रे सन्दर्भरत्ने कर्तुं सुशकम् । तत्र प्रथमे परिच्छेदे ५७–तमकारिकां यावद् दोषान् लक्षयित्वा—

एवं पदानां वाक्यानां वाक्यार्थानां च यः कविः ।
दोषान् हेयतया वेत्ति स काव्यं कर्तुमर्हति ॥ [५८]

इत्युपसंहृत्य गुणयोगमेवं प्रशंसति—

'अलङ्कृतमपि श्रव्यं न काव्यं गुणवर्जितम् ।
गुणयोगस्तयोर्मुख्यो गुणालङ्कारयोगयोः ॥'

बाह्यान्तरवैशेषिकभेदेन च त्रिविधाँस्तान् सप्रपञ्चं विवेचयति । द्वितीयतृतीयचतुर्थेषु च परिच्छेदेषु—

'ये व्युत्पत्त्यादिना शब्दमलङ्कर्तुमिह क्षमाः ।
शब्दालङ्कारसंज्ञास्ते ज्ञेया जात्यादयो बुधैः ॥ [२ । २]
अलमर्थमलङ्कर्त्तुं ये व्युत्पत्त्यादिवर्त्मना ।
ज्ञेया जात्यादयः प्राज्ञैस्तेऽर्थालङ्कारसंज्ञया ॥ [३ । १]
शब्देभ्यो यः पदार्थेभ्य उपमादिः प्रतीयते ।
विशिष्टोऽर्थः कवीनां ता उभयालङ्क्रिया मताः' ॥ [४ । १]

इत्यादिभिरलङ्कारान् वितनोति । एवमन्त्ये पञ्चमे परिच्छेदे—

रसोऽभिमानोऽहङ्कारः शृंगार इति गीयते ।
योऽर्थस्तस्यान्वयात् काव्यं कमनीयत्वमश्नुते [५ । १]
नवोऽर्थः सूक्तिरग्राम्या श्रव्यो बन्धः स्फुटा श्रुतिः ।
अलौकिकार्थयुक्तिश्च रसमाहर्त्तुमीशते । [५ । ७]

इत्येवं रसयोगमपि सवैदग्ध्यं संदृभ्णाति ।

भोजमतमनुवर्तमानो भावप्रकाशिकाकारः श्रीमान् शारदातनयोऽपि सम्बन्धानिमानेवमेव साहित्यतया मनुते । तत्र—

'द्वादशधा सम्बन्धः शब्दस्यार्थस्य यः स साहित्यम्' इति साहित्यं लक्षयित्वा—

'वृत्तिर्विवक्षा तात्पर्यप्रविभागाविहोदितौ ।
ततो व्यपेक्षा सामर्थ्यान्वयश्चैकार्थभावना ॥
दोषहानं गुणादानं तथाऽलङ्कारयोगिता ।
रसावियोग इत्येते सम्बन्धाः कथिता बुधैः ॥'—

इति तानेकैकशः समुद्दिशति ।

इतः परं साहित्यपदं नितान्तं प्रसिद्धिमापद्यते । क्षेमेन्द्रः काव्यलक्षणेऽस्य स्फुटं प्रयोगं करोति—

'काव्यं विशिष्टशब्दार्थसाहित्यम्' इति [सुवृत्ततिलके ३।२–४]

(३) साहित्यमीमांसाकृतः अष्टसम्बन्धात्मकतावादः—

साहित्यमीमांसाकारोऽनुपदीनावुभावपि वादावुपजीव्य तृतीयां सरणिमत्र प्रवर्त्तयति । स खलु निजं मतमेवमुपन्यस्यति—

'वृत्यादीनां समष्टिः स्यात् साहित्यं, तत्परिष्कृतिः ।
शब्दार्थयोः परिष्कारः कविस्तस्य प्रसाधकः ॥

अष्टौ वृत्त्यादयस्तत्र परिष्कारश्चतुर्विधः ।
वृत्तिर्विवक्षा तात्पर्यं प्रविभागो व्यपेक्षणम् ।
सामर्थ्यमन्वयैकार्थ्ये अष्टौ वृत्त्यादयः स्मृताः ।
दोषत्यागो गुणाधानमलङ्कारो रसान्वयः ।
इत्थं चतुर्विधा क्लृप्ता साहित्यस्य परिष्कृतिः ।। [प्रकरणम्–१]

वृत्त्यादीनां लक्षणान्यपि स एवं निर्मिमीते—

(१) वृत्तिः [अभिधा] पदानां व्यापारः पदार्थप्रतिपादने ।
(२) विवक्षा वक्तुमिच्छा स्यात् समसंक्षिप्तविस्तृतैः, शब्दैरर्थस्य ।
(३) वर्तते यत्परः शब्दः स शब्दार्थ इति स्थितिः ।
(४) एतावतोऽर्थभागस्य स्यादियान् शब्द इत्ययम्, प्रविभागः ।
(५) परस्परं पदार्थानामाकाङ्क्षा स्याद् व्यपेक्षणम् ।
(६) सामर्थ्यं च पदार्थानां भवेत् सम्बन्धिरूपता ।
(७) परस्पस्य ग्रथनं पदार्थानामिहान्वयः ।
(८) ततश्चैकत्वसम्पत्तिरेकार्थीभावनं विदुः । [प्रकरणम्–२]

परिष्कारत्वेनाभिमतानपि चतुरो धर्मान् ससंरम्भं तृतीयचतुर्थपञ्चमषष्ठेषु प्रकरणेषु मार्मिकतया यथासम्प्रदायं वितत्य विश्लेषयति --

'प्रयोगे दूष्यते येन स दोषः परिकीर्त्तितः ।
शास्त्रे लोके च समये निषेधात् त्याज्य एव सः । [प्रक० ३]
गुणाः श्लेषप्रसादाद्या ये काव्ये समवायिनः ।
बाह्यान् शब्दगुणान् प्राहुरान्तरानर्थसंश्रयान् । [प्र० ४]
काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते । [प्र० ५]
कान्तया गुणशालिन्या सर्वालङ्कारयुक्तया ।
किं फलं कामयानस्य यदि न स्याद् गुणावहा ।।
स भावो रसनीयत्वं यत्प्रकर्षः प्रपद्यते ।' [प्र०–६]

कुन्तकभोजराजयोर्मते अपि सोद्धरणं सपरिकरञ्च वैशद्येन विवेच्य प्रत्यादेष्टि । तत्र कुन्तकस्य मतं—

'शब्दार्थयोः सहस्थानं साहित्यमपरे जगुः ।
श्रिया परस्परस्पर्धायुक्तयोः काव्यसंस्थितिम् ।।'—

इति कारिकया संकलय्यास्मदुद्धृतं कृत्स्नमपि वक्रोक्तिजीवितं सकारिकं संक्षिप्य सोदाहरणं वृत्तावुपसंगृह्णाति । तत्र विश्वेश्वरशास्त्रिणा वक्रोक्तिपरतयाऽङ्गीकृतान्

'अपर्यालोचितेऽप्यर्थे बन्धसौन्दर्यसंपदा
गीतवद्हृदयाह्लादं तद्विदां विदधाति यत् ।।
वाच्यावबोधनिष्पत्तौ पदवाक्यार्थवर्जितम् ।
यत्किमप्युत्कयत्यन्तः[८] पानकास्वादवत् सताम् ।।

---

८ किमप्यर्पयत्यन्तः—इति विश्वेश्वरपाठः ।

स्फुरितं जीवितेनेव जीवितं कविना विना[९]।
विना निर्जीवतां याति येन वाक्यं विपश्चिताम् ॥
यस्मात् किमपि सौभाग्यं तद्विदामोदगोचरम् ।
सरस्वती समभ्येति तदेतत्[१०] प्रतिपादितम् ॥

इमानपि श्लोकान् 'मार्गानुगुण्यसुभगः—साहित्यमुच्यते' इति पूर्वोद्धृतैः पद्यैः सह समानन्तर्येण साहित्यपरतयैवोद्धरति। कुन्तकमतमात्ममतेनाभिन्नप्रायं च प्रतिपादयन् ब्रूते--

"एतन्मतमपि प्रायो मतमस्माकमश्नुते ।
अभेदः ख्याप्यते किन्तु तत्र साहित्यकाव्ययोः ॥

एतन्मतमप्यस्मन्मतमेवाप्नोति। इदमन्तरम्-परिष्कारः साहित्यमिति तेषां मतम्, वयं तु शब्दार्थयोः सम्मेलनमात्रमुक्तिरूपं साहित्यं तच्छास्त्राख्यानादिसाधारणम्, अन्यत् परिष्कारविशिष्टं तत् काव्यमिति मन्यामहे।

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ॥

इत्यनेनापि विशिष्टोक्तिरेव काव्यं भवतीति मन्तव्यम्। अतो यत् केषाञ्चित् मतं कविकौशलकल्पित-कमनीयतातिशयः शब्द एव केवलः काव्यमिति, केषाञ्चिद् रचनावैचित्र्यचमत्कारकारि वाच्यमेव काव्यमिति पक्षद्वयं निरस्तम्। उच्यते हि—

'शब्दार्थौ दोषरहितौ सगुणौ बन्धवर्तिनौ ।
काव्यं चारुतयात्यर्थमन्योन्यः (यं) सन्धिनाविव ॥ इति" इति।

भोजराजस्यापि मतं स्फुटं संकोचयति—

ननु[११] अभिधाविवक्षातात्पर्यविभागव्यपेक्षासामर्थ्यान्वयैकार्थीभावदोष-हानगुणोपादानालङ्कारयोगरसावियोगरूपः शब्दार्थयोर्द्वादशविधः सम्बन्धः साहित्यमिति श्रूयते। कथमष्टौ सम्बन्धाः साहित्यमिति। उच्यते। चरमं चतुष्टयमागमापायित्वात् साहित्यस्वरूपं न प्रविशति। तस्मात् तत् परिष्कारत्वेन निष्कृष्टम्। तच्चाष्टधेति निर्णयः।' इति।

---

९ शरीरं जीवितेनेव स्फुरितेनेव जीवितम्—इति विश्वेश्वरपाठः।

१० तदिदानीं विचार्यते इति विश्वेश्वरपाठः। स च सर्वथा त्याज्यः। समनन्तर-मेवापतितस्य 'इत्यन्तरश्लोकाः' इति वचनस्यासङ्गतेः। तदित्थं विश्वेश्वरकृतोऽनुवादोऽपि त्याज्य एव। वस्तुत इमा अपि कारिकाः साहित्यपरा एव।

११. साहित्यमीमांसायां 'ननु' इत्यतः पूर्वम् 'साहित्यं नाम सम्बन्धः सोऽष्टधेति मनीषिणः। शब्दार्थावष्टभिर्मार्गैः सम्बध्येते परस्परम् ॥' मनीषिणो भोजराजादयः ते हि शब्दार्थयोर्द्वादशविधः सम्बन्धः साहित्यमित्याचक्षते' इति कारिकासहिता पङ्क्तिरस्ति। तत्र 'मनीषिणो—चक्षते' इति भागो नूनं द्विरुक्तोऽसङ्गतश्च। पाण्डुप्रतावियं पङ्क्तिः पत्रपार्श्वे लिखिता स्यात्। संपादककेनेयं मूले योजिता स्यात्। कुन्तकस्यापि नाम्नोल्लेखोऽत्र नास्ति।

तदित्थं साहित्यमीमांसाकृतो मते 'वृत्तिः विवक्षे'त्यादयोऽष्टौ सम्बन्धा एव साहित्यपदव्यपदेश्या भवन्ति, अन्ये च चत्वारो दोषहानादयः परिष्कारभूता इति व्यक्तमुपपद्यते। अस्मिँश्च वादत्रये प्रथमद्वितीययोः साहित्यस्य काव्यैकवृत्तित्वं तृतीये च काव्येतरवृत्तित्वमपि [काव्येतरैकवृत्तित्वं वा] प्रसिद्धयति।

(४) काव्यनाट्यसमष्टिवादः--

इयता प्रबन्धेन साहित्यस्य यद्वृत्तित्वं सिद्धं तौ केवलौ शब्दार्थावेव भवतः। शब्दार्थातिरिक्ते नाट्ये तत्सद्भावोऽद्यावधि नोन्मीलितः। काव्यशास्त्रपरम्परानुशीलनेन तत्रापीदमभिमतं प्रतीयते।

कुन्तकभोजयोः समकालिकः किञ्चिदनन्तरभावी वा लोचनाभिनवभारतीप्रविधाता श्रीमानभिनवगुप्तः संस्कृतकाव्यशास्त्रे सार्वभौमां प्रतिष्ठामश्नुते। तदनुविधाता काव्यप्रकाशकारः सहृदयशिरोमणिर्मम्मटोऽपि कनिष्ठिकाधिष्ठित एव। तावेतौ काव्यशास्त्रसार्वभौमौ काव्यशास्त्रमधिकृत्यकृतेषूक्तेषु ग्रन्थेषु साहित्यपदमपि न प्रयुञ्जाते, तद्व्याख्यानं तु दूरापास्तम्। अभिनवगुप्तो ध्वन्यालोके लोचनं प्रथमं व्यधात् तदुत्तरं[१२] नाट्यशास्त्रेऽभिनवभारतीम्। तत्र चतुर्थ उद्योते यत्र पूर्वोद्धृतं साहित्यपदं समापतति तत्र लोचने तस्य स्पर्शोऽपि न दृश्यते। अभिनवगुप्तो मम्मट इव मात्रालाघवेन पुत्रोत्सवमानी नास्ति। स हि यत्रापि क्वचिदानुषङ्गिकतयाऽपि केचन रहस्यदिग्धाः प्रयोगा दृश्यन्ते तेष्वपि भृशं संरब्धवानालोक्यते। ध्वन्यालोक एव—

सोऽर्थस्तद्व्यक्तियोगी शब्दश्च कश्चन।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः। [१।८]

इत्यत्र प्रत्यभिज्ञेयपदे प्रकृतित्वेनापि समुपागतं 'प्रत्यभिज्ञा'—पदं प्रत्यभिज्ञाय तत्संकेतितां तत्परमगुरुप्रवर्त्तितां प्रत्यभिज्ञामनुन्मील्य न विरमति। 'प्रतिपत्तव्याविति वक्तव्ये[१३] प्रत्यभिज्ञेया'विति वदतो ग्रन्थकृतोऽभिसन्धिमुन्मीलयन्नसौ ब्रूते—

'प्रत्यभिज्ञेयशब्देनेदमाह— 'काव्यं तु जातु जायेत कस्यचित् प्रतिभावतः' इति नयेन यद्यपि स्वयमस्यैतत् परिस्फुरति तथापीदमित्थमिति विशेषतो निरूप्यमाणं सहस्रशाखीभवति। यथोक्तमस्मत्परमगुरुभिः —[१४]

'तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके
कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं क्षमः।

---

१२. 'स्वशब्दानभिधेयत्वं हि रसादीनां ध्वनिकारादिभिर्दर्शितम्। तच्च मदीयादेव तद्विवरणात् सहृदयालोकलोचनादवधारणीयम्' अभिनवभारती, बडौदा सं. भागः १, पृ. ३४३।

१३. 'प्रत्यभिज्ञेयावित्यनेनेदमाह'--इति प्रतीकस्यावतरणिकायामुत्तुङ्गोदयः 'तर्हि' 'यत्नतः प्रतिपत्तव्या'विति वक्तव्ये 'प्रत्यभिज्ञेयौ' इति वदतः कोऽभिप्राय इत्याह [कुप्पुस्वामी संस्करणे, पृ. १७५]

१४. भट्टेन्दुराजस्य साक्षात् स्वगुरोर्गुरवोऽमीति परमगुरुत्वं प्रत्यभिज्ञाप्रस्थानप्रवर्त्तयितॄणामुत्पलदेवपादानाम् [कु. सं. पृ. १७५]

लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो
नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता ।। इति[१५]

तेन ज्ञातस्यापि विशेषतो निरूपणमनुसन्धानात्मकमत्र प्रत्यभिज्ञानम् । न तु तदेवेदमित्येतावन्मात्रम् ।"

साहित्यपदप्रयोगे पुनरकाण्डवाचंयमत्वमस्य कुत आपतितमिति प्रत्येतुं न प्रभवामः। 'शब्दार्थयोः साहित्येन काव्यत्वे' इत्यस्याः पङ्क्तेः काव्यत्वशब्दं व्युत्पादयन्—

'कवनीयं काव्यं तस्य भावः काव्यत्वम्,
न त्वयं भावप्रत्ययान्ताद् भावप्रत्यय इति शङ्कितव्यम् ।'[१६]--इति

संरम्भमाश्रयते, साहित्यपदं तु प्रतीकतोऽपि न स्पृशति। अभिनवभारत्यामपि साहित्यपदमस्माभिर्नैव लभ्यते। मम्मटः काव्यप्रकाशे काव्यपदमसकृत् प्रयुङ्क्ते साहित्यपदं तु नैकदापि। न चानयोः समये साहित्यपदं प्रसिद्धं नासीत्, अभिनवगुप्तस्यैव श्रीतन्त्रालोके—

'पित्रा स शब्दगहने कृतसंप्रवेशस्तर्कार्णवोर्मिपृषतामलपूतचित्तः ।
साहित्यसान्द्ररसभोगपरो महेशभक्त्या स्वयंग्रहणदुर्मदया गृहीतः ।।

(तन्त्रालोके ३७ आह्निके ५८ पद्यम्) इति

ईश्वरप्रत्यभिज्ञाविवृतौ च—

'पूर्णव्याकरणावगाहनशुचिः सत्तर्कमूलोन्मिष—
त्प्रज्ञाकल्पलताविवेककुसुमैरभ्यर्च्य हृद्देवताम् ।
पीयूषासवसारसुन्दरमहासाहित्यसौहित्यभाग्
विश्राम्याम्यहमीश्वराद्वयकथाकान्तासखः साम्प्रतम् ।।

(ई. प्र. वि. मङ्गलाचरणे ५ पद्यम्)

इति च साहित्यशब्दे दर्शितादरत्वात्। तच्छिष्यः क्षेमेन्द्रोऽपि साहित्यपदे दत्तावधानोऽस्ति। स हि बृहत्कथामञ्जर्या उपसंहारे ३७ तमे-

'श्रुत्वाऽभिनवगुप्ताख्यात् साहित्यं बोधसागरात्'—

इति पद्ये प्रागुद्धृते काव्यलक्षणे च साहित्यपदं प्रसिद्धपदत्वेनास्थाविशेषास्पदत्वेन चोपादत्ते । साहित्यमीमांसाकारश्च मम्मटं स्मरति । काव्यप्रकाशस्य —

'शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात् ।
काव्यज्ञशिक्षयाऽभ्यास इति हेतुस्तदुद्भवे ।।' इति कारिकां स

---

१५. 'यद्यपीयं श्रीमदीश्वरप्रत्यभिज्ञाशास्त्रान्ते सामान्यतोऽवगतस्यापीश्वरस्य विशेषावगममन्तरेण न फलपर्यन्तीभावलाभ इत्येतमर्थं निदर्शयितुं लोकप्रसिद्धतत्तादृशविषयप्रर्शदनपरोक्तिः, तथापि तुल्यविषयत्वात् प्रस्तुतार्थोपपादकतयात्रोदाहृता'–इति सङ्गतिः कौमुदीकृता श्रीमदुत्तुङ्गोदयेनात्र दर्शिता ।

१६. कोः कवतेर्वा कवनीयं काव्यम्–इत्यभिनवभारत्यां संवादिनी व्युत्पत्तिः—
(अ. भा. ब. सं. पृ. ३४३.)

'श्रुताभियोगप्रतिभाशक्तियुक्तः कविः स्मृतः' इति साहित्यमीमांसायाः सप्तमप्रकरणस्थस्य कविलक्षणस्य समर्थने वृद्धवाक्यत्वेनोद्धरति। मम्मटाच्छतकद्वयानन्तरीयः साहित्यदर्पणप्रणेता विश्वनाथो ग्रन्थनाम्नि साहित्यपदमभिषेचयति, यद्यप्येतदत्रातीव विस्मयावहं यत् साहित्यनाम्ना ग्रन्थमध्ये किञ्चिदपि न विमृशति। एतेनाभिनवगुप्तमम्मटयोः साहित्यपदप्रयोगाभावेन, विश्वनाथे च तत्सद्भावेनैतदुन्नेतुं सुकरं यदेतेषां मते 'काव्यनाट्ये मिलित्वा साहित्यपदव्यपदेश्यतामासादयतः, साहित्यमनयोर्व्यासज्य वर्त्तते, साहित्यमङ्गि काव्यनाट्ये चास्याङ्गभूते'। नाट्यशास्त्रे काव्यस्य निरूपणं नास्ति यत्राभिनवभारती, यत्र च लोचनं तत्र ध्वन्यालोके नाट्यस्य, काव्यप्रकाशोऽपि काव्यैकपरो विद्यते, साहित्यदर्पणे च तदुभयं प्रतिपादिते दृश्येते। ग्रन्थनाम कुर्वतो विश्वनाथस्य मनसि कदाचिदयं भावो भवेत्।

वस्तुतस्तु साहित्यदर्पणकृत एव काव्यनाट्ययोर्व्यासज्यवृत्तित्वं साहित्याभिमतं संभवति। अभिनवगुप्तमम्मटौ तु साहित्यशब्दस्य महत्त्वमनिभाल्य तत्पर्यायतया मतस्य काव्यशब्दस्यैव तन्निभालयतः। तन्मते काव्यपदमर्थद्वयवाचकं भवति दृश्यश्रव्योभयवाचकम्, श्रव्यमात्रवाचकञ्चेति। प्रथमे पक्षे काव्यपदं साहित्यपदार्थकमेव। एतच्च तत्तद्ग्रन्थैः स्पष्टतामञ्चति। भरतमुनिः स्वकीये नाट्यशास्त्रे नाट्यरसान् काव्यार्थमजूघुषत्। तद् यथा—

वागङ्गसत्त्वोपेतान् काव्यार्थान् भावयन्तीति भावाः' [७।१]

अत्र काव्यार्थपदेन रसा एव मुनेर्विवक्षिता। एतच्च तस्यैव—

'विभावेनाहृतो योऽर्थो ह्यनुभावैस्तु गम्यते।
वागङ्गसत्त्वाभिनयैः स भाव इति संज्ञितः॥
वागङ्गमुखरागेण सत्त्वेनाभिनयेन च।
कवेरन्तर्गतं भावं भावयन् भाव उच्यते॥
[17]नानाभिनयसंबन्धान् भावयन्ति रसानिमान्
यस्मात्तस्मादमी भावा विज्ञेया नाटचयोक्तृभिः॥

इत्यग्रिमेण कारिकाग्रन्थेन स्पष्टम्। एवमेव—

(१) क्रीडनीयकमिच्छामो दृश्यं श्रव्यं च यद् भवेत्। [१।११]

(२) एवमेते काव्यरसाभिव्यक्तिहेतव एकोनपञ्चाशद् भावाः। [पृ. ३४८]

(३) काव्यार्थसंश्रितैर्भावैरभिनिष्पद्यन्ते रसाः। [पृ. ३४८]

इत्येवंविधैरपि प्रयोगैः काव्यस्य नाट्यभिन्नत्वं नाट्यशास्त्रात् सिद्ध्यति। अत एवाभिनवगुप्तोऽपि रसानां काव्यार्थत्वमसकृदामनति। तथाहि—

(१) 'उक्तमेव मुनिना 'काव्यार्थान् भावयन्ति' इति। तत्काव्यार्थो रसः। [अध्यायः ६, पृ. २७८]

(२) 'तत्र (काव्ये) च पदार्थवाक्यार्थौ रसेष्वेव पर्यवस्यतः इत्यसाधारण्यात् प्राधान्याच्च काव्यस्यार्था रसाः। [अ. ७, पृ. ३४३]

(३) काव्यार्थान् रसान् भावयन्ति कुर्वते (,,)

---

१७. कारिकामिमां महिमभट्टोऽपि तस्य व्यक्तिविवेके समुद्दध्रे (व्य. वि. चौ. सं. पृ. ६८).

(४) विभावाः काव्यबलानुसन्धेयाः[१८]। (अ. ६, पृ. २७२)

(५) विभावाः काव्यादनुसन्धीयन्ते[१९]। (अ. ६, पृ. २७५) इति।

नाट्ये रूपग्राहितया प्रधानतमस्य चक्षुरिन्द्रियस्य गोचरत्वसत्त्वाद् विभावादिप्रत्यक्षजनित सूक्ष्मतमोऽनुभवो भवतीति तत्रैव रसास्वादजनकतां समर्थयतां तदभावाच्च काव्ये तां प्रत्यादिशता उपाध्यायादीनां मतानि—

'भावाभिनयसम्बन्धान् स्थायिभावांस्तथा बुधाः।
आस्वादयन्ति मनसा तस्मान्नाट्यरसा स्मृताः॥' [ना. शा. ६।३३]

इत्यस्याः कारिकाया व्याख्याने—

(१) 'तस्मात् नाट्यात् समुदायरूपात् रसाः। यदि वा नाट्यमेव रसाः। रससमुदायो हि नाट्यम्। नाट्य एव च रसाः। काव्येऽपि नाट्यायमान एव रसः। काव्यार्थविषये हि प्रत्यक्षकल्पसंवेदनोदये रसोदय इत्युपाध्यायाः। यदाहुः काव्यकौतुके—

"प्रयोगत्वमनापन्ने काव्ये नास्वादसंभवः।'
वर्णनोत्कलिता भोगप्रौढोक्त्या सम्यगर्पिताः।
उद्यानकान्ताचन्द्राद्या भावाः प्रत्यक्षवत् स्फुटाः॥" इति

(२) अन्ये तु काव्येऽपि गुणालङ्कारसौन्दर्यातिशयकृतं रसवर्णनामाहुः' इत्येवमुपस्थाप्य स्वमते नाट्यात् काव्यस्याभेदमेवं प्रत्यतिष्ठिपत्—

'वयं तु ब्रूमः—काव्यं तावन्मुख्यतो दशरूपात्मकमेव। तत्र ह्युचितैर्भाषावृत्तिकाकु-नेपथ्यप्रभृतिभिः पूर्यते रसवत्ता। सर्गबन्धादौ हि नायिकाया अपि संस्कृता एवोक्तिः, इत्यादि बहुतरमनुचितं केवलं शक्तिरहितत्वाद् व्यावर्ण्यते। तावतैव हृद्यमिति न्यायेनानौचित्यं न प्रतिजाहाति। तत एवोच्यते 'संदर्भेषु दशकरूपकं श्रेयः [वामनेन काव्या० १।३।३०] तेन तदङ्गं सन्ध्यादिसंघटनमुद्धृत्य सर्गबन्धादि यावन्मुक्तम्। यत्तु दशरूपकं तस्य योऽर्थस्तदेव नाट्यम्, यद् वक्ष्यते 'नाट्यस्यैषा तनूः' [ना. शा. १४।२] इति, तस्य हृदयसंवादतार-तम्यापेक्षया श्रोतृप्रतिपत्तृस्फुरणं स्फुटास्फुटत्वेनातिविचित्रम्। तत्र ये स्वभावतो निर्मलमुकुर-हृदयाः त एव संसारोचितक्रोधमोहाभिलाषपरवशमनसो न भवन्ति। तेषां तथाविधदशरूपका-कर्णनसमये साधारणरसनात्मकचर्वणग्राह्यो रससञ्चयो नाट्यलक्षणः स्फुट एव, ये त्वतथा-भूतास्तेषां प्रत्यक्षोचिततथाविधचर्वणालाभाय नटादिप्रक्रिया, स्वगतक्रोधशोकादिसंकटहृदय-ग्रन्थिभञ्जनाय गीतादिप्रक्रिया च मुनिना विरचिता, 'सर्वानुग्राहकं हि शास्त्रम्' इति न्यायात्। तेन नाट्य एव रसा न लोके। काव्यं च नाट्यमेव। चित्रपुस्ताद्यपि च नाट्य-स्यैवार्थभागाभिष्यन्दो यथा सर्गबन्धादि शब्दभागाभिष्यन्दः।'

एतदत्र स्पष्टं यत् काव्यशब्दोऽयं नाट्याभिन्नतया प्रयुक्तोऽपि श्रव्यत्वं न जहाति। अतएव 'वागङ्गे'त्यादेः पूर्वोद्धृतस्य पद्यस्य भावमाश्रित्य ततः पूर्वमेव सप्तमाध्यायारम्भे—

१८, १९. 'काव्यस्य स्थाने कार्यस्येत्यपि पाठो दर्शितोऽस्ति।

'अत्र आहार्यं तु यद्यपि नृत्यकलाध्रुवापातयोरन्तरङ्गं तथापि तदनन्तरचित्तवृत्त्यवगतौ वाचिकादीनामेवान्तरङ्गता। तथाहि काव्यादपि रसास्वादो भवतीत्युक्तम्।' [अ. भा. पृ. ३४४] इति

'नाट्यं नाम नटगताभिनयप्रभावसाक्षात्कारायमाणैकघनमानसनिश्चलाध्यवसेयः समस्तनाटकाद्यन्यतमकाव्यविशेषाच्च द्योतनीयः अर्थः। (६।१५ पृ. २६६)

इत्येवं च नाट्यात् काव्यस्य श्रव्यतामूलं भेदमपि स्वयमवोचत्। स्वयमभिनव एव काव्यं पठनीयत्वेन वाचिकाभिनयविषयमाम्नौ। ध्वन्यालोकेऽपि—

'काव्यप्रभेदाश्रयतः स्थिता भेदवती हि सा' (३।७)

इत्यस्याः कारिकाया वृत्तौ—'काव्यप्रभेद'शब्दस्य

'काव्यस्य प्रभेदाः मुक्तकं संस्कृतप्राकृतापभ्रंशनिबद्धम्, सन्दानितकविशेषककलापककुलकानि पर्यायबन्धः, परिकथा, खण्डकथासकलकथे सर्गबन्धोऽभिनेयार्थमाख्यायिकाकथे इत्येवमादयः'

इति व्याख्यानेऽभिनवगुप्तो निम्नाङ्किते लोचने—

'महाकाव्यरूपः पुरुषार्थफलः समस्तवस्तुवर्णनाप्रबन्धः संस्कृत एव। अभिनेयार्थं दशरूपकं नाटिकात्रोटकरासकप्रकरणिकाद्यवान्तरप्रपञ्चसहितमनेकभाषाव्यामिश्ररूपम्। इति

काव्यनाट्ययोरन्तरमपि दर्शयति।

मम्मटोऽपि काव्यस्य तथाविधोभयरूपतां कण्ठरवेण यद्यपि नोदीरयति तथापि दोषप्रसङ्गे नाट्यस्यापि संग्रहात् उभयरूपताम्,

(१) तानि चेन्नाट्यकाव्ययोः
(२) लोके प्रमदादिभिः स्थाय्यनुमानेऽभ्यासपाटववतां काव्ये नाट्ये च' (४ उल्लासः)
(३) अष्टौ नाट्ये रसाः स्मृताः—(४-उ.) इत्यादिषु च तस्य श्रव्यरूपतामपि न न प्रकटयति।

पूर्वापरवर्तिष्वपि नाट्यकाव्ययोरिमौ भेदाभेदौ बहुशः प्राप्येते। भामहेन काव्यालङ्कारे—

शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद् द्विधा। (१।१६)
सर्गबन्धोऽभिनेयार्थं तथैवाख्यायिकाकथे।
अनिबद्धं च काव्यादि तत्पुनः पञ्चधोच्यते। (१।१८)
सर्गबन्धो महाकाव्यं महतां च महच्च यत्। (१।१९)
नाटकं द्विपदी शम्या रासकस्कन्दकादि च।
उक्तं तदभिनेयार्थम्.................. । (१।२४)

इत्थं काव्यस्योभयरूपता प्रत्यपादि, श्रव्यरूपता च।

दण्डिनापि काव्यादर्शे—

शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली। (१।१०)

पद्यं गद्यं च मिश्रं च तत् त्रिधैव व्यवस्थितम् । (१ । ११)
मुक्तकं कुलकं कोषः संघात इति तादृशः
सर्गबन्धांशरूपत्वादनुक्तः पद्यविस्तरः । (१ । १३)
सर्गबन्धो महाकाव्यमुच्यते.................। (१ । १४)
अपादः पदसन्तानो गद्यम् । (१ । २३)
मिश्राणि नाटकादीनि तेषामन्यत्र विस्तरः । (१ । ३१)

इत्येवं काव्यस्योभयात्मकता श्रव्यरूपता चाऽदर्शिषाताम् ।

वामनोऽपि—

'काव्यं गद्यं पद्यं च । (१ । ३ । २१)
तद् (उभयम्) अनिबद्धं निबद्धं च । (१ । ३ । २७)
संदर्भेषु (निबद्धेषु) दशरूपकं श्रेयः । (१ । ३ । ३०)

इति काव्यस्य दृश्यश्रव्योभयत्वं केवलं श्रव्यत्वं चामनति ।

रुद्रटोऽपि—ननु शब्दार्थौ काव्यम् (२ । १) इति काव्यं लक्षयित्वा

'सन्ति द्विधा प्रबन्धा काव्यकथाख्यायिकादयः काव्ये, उत्पाद्यानुत्पाद्याः'। (१६।२)

इति काव्यस्य द्विविधत्वं प्रतिपाद्यादिपदेन—

'अन्यद् वर्णकमात्रं प्रशस्तिकुलकादि नाटकाद्यन्यत्, काव्यम्'। (१६ । ३६)

इति रूपकं संगृह्णाति । तदित्थमस्यापि द्वैविध्यमभिमतम् ।

महिमभट्टोऽपि स्वकीये व्यक्तिविवेकनाम्नि काव्यालङ्कारे—

'कविव्यापारो हि ...... काव्यम् । तच्च अभिनेयानभिनेयार्थत्वेन द्विविधम् । सामान्येन तत् शास्त्रवत् ...... व्युत्पत्तिफलम् । केवलं व्युत्पाद्य ... तारतम्यभेदात् काव्यनाट्यशास्त्ररूप उपायभेदः कृतः, न फलभेदः। (पृ. ९५-९६ चौ. सं.) इत्येवं काव्यस्योभयविधत्वमुरीकरोति ।

राजशेखरः काव्यविद्याया अष्टादशस्वधिकरणेषु रूपकनिरूपणीयं नामकमधिकरणं पृथगाम्नासीत्[२०]। वक्रोक्तिजीवितकारोऽपि रसवदलङ्कारनिरूपणे[२१] काव्यनाट्ययोर्भेदाभेदमेवं सकेतयति—

'रसवतोऽलङ्कार इति पक्षे सर्वेषामेव रूपकादीनां रसवदलङ्कारत्वमेव न्यायोपपन्नतां प्रतिपद्यते । (व. जी. ३ । ११ वृत्तिः)

चतुर्थे चोन्मेषे—

कथावैचित्र्यपात्रं तद् वक्रिमाणं प्रपद्यते ।
यदङ्गं सर्गबन्धादेः सौन्दर्याय निबध्यते । (४ । ९)

---

२०. काव्यमीमांसा-१ अ०
२१. नगेन्द्रसंस्करणस्य ३५२ पृष्ठे.

क्वचित् प्रकरणस्यान्तः स्मृतं प्रकरणान्तरम् ।
सर्वप्रबन्धसर्वस्वकलां पुष्णाति वक्रताम्[२२] । (४ । १३)

इत्येवं सर्गप्रबन्धरूपकप्रबन्धात्मना भेदं तदुभयात्मकतां च काव्यस्य ग्रन्थनाम्ना स्फुटमुल्लोचयति ।

साहित्यमीमांसाकारोऽपि नाटकमीमांसानाम्ना कंचिद् ग्रन्थं निर्ममे इति तस्य ग्रन्थान्तरेभ्यः प्रमाण्यते[२४] । स एव व्यक्तिविवेके व्याख्याननामकं व्याख्यानमपि चक्रे । तत्र—

'भावसंयोजनाव्यङ्ग्यपरसंवित्तिगोचरः ।
आस्वादनात्मानुभवो रसः काव्यार्थ उच्यते' ॥

अस्याः व्यक्तिविवेक उद्धृतायाः कारिकायाः काव्यार्थपदव्यावर्णने—

'काव्यार्थ इति व्यङ्ग्यतया वाक्यस्यार्थीभावनतोऽस्य काव्ये अवस्थानात्, काव्यग्रहणेन नाट्यमप्युपलक्षितम्[२५],

इत्येवं काव्यवन्नाट्यमपि रसावियोगित्वेनाभिमते परिष्कृतेऽतएव काव्यत्वभाजि साहित्ये संगृह्णाति । एवमन्यत्रापि काव्यनाट्ययोर्युग्मं निबध्नाति[२६] ।

हेमचन्द्राचार्यः—

'काव्यं प्रेक्ष्यं श्रव्यं च (८।१ काव्यानुशासने)
प्रेक्ष्यं पाठ्यं गेयं च (८।२ काव्यानुशासने)

पाठ्यं नाटकप्रकरणनाटिकासमवकारेहामृगडिमव्यायोगोत्सृष्टिकाङ्कप्रहसनभाणवीथीसट्टकादि । (८।३ काव्यानुशासने)

गेयं डोम्बिकाभाणप्रस्थानशिङ्गभाणिकाप्रेरणरामाक्रीडहल्लीसकरासकगोष्ठीश्रीगदितकाव्यादि । (८।४ काव्यानुशासनेन)

श्रव्यं महाकाव्यमाख्यायिका कथा चम्पूरनिबन्धं च (८।५ काव्यानुशासने)

इत्येवं वैदग्धीविशदेन पथा प्राञ्जलं प्रविवेकं च काव्यस्य तादृगुभयतां साधयाञ्चक्रे ।

पण्डितराजोऽपि रसगङ्गाधरे—

(१) **'काव्ये नाट्ये च कविना नटेन च प्रकाशितेषु विभावादिषु'**

---

२२. 'इदमत्र तात्पर्यम्–कुत्रचिदेव निरङ्कुशकौशलाः कुशीलवाः स्वीयभूमिकापरिग्रहेण रङ्गमलङ्कुर्वाणाः नर्तकान्तरप्रयुज्यमाने प्रकृतार्थजीवित इव गर्भवर्तिन्यङ्कान्तरे तरङ्गितवक्रतामहिम्नि सामाजिकीभवन्तो विविधाभिर्भावनाभङ्गीभिः साक्षात् सामाजिकानां किमपि चमत्कारवैचित्र्यमासूत्रयन्ति'–इति 'सर्वप्रबन्धसर्वस्वकलां = सकलरूपकप्राणरूपम्' इति वृत्त्या नाट्यपरत्वमस्याः स्फुटम् ।

२३. अस्य च विधेयाविमर्शस्यानन्तेतरप्रसिद्धलक्ष्यपातित्वेनास्माभिर्नाटकमीमांसायां साहित्यमीमांसायां च तेषु तेषु स्थानेषु प्रपञ्चः प्रदर्शितः—(व्यक्तिविवेकव्याख्याने चौ. सं. २४३ पृष्ठे) अलङ्कारसर्वस्वस्योत्प्रेक्षाप्रकरणे—७७ पृष्ठे (नि. सा. सं.) च ।

२४. व्य. व्याख्याने पृ. ६८ चौ. सं.

(२) 'यैरपि नाट्ये शान्तो रसो नाभ्युपेयते तैरपि बाधकाभावात् काव्ये सोऽवश्यं स्वीकार्य एव ।'

इति क्रमेण रसविषये नव्यमते शान्तरसप्रकरणे च काव्यनाट्ययोर्यौगपद्यं दर्शयति । यद्यपि स काव्यस्य शब्दमात्रतां साधयति तथापि हेमचन्द्राचार्यदिशा तन्मतेऽपि नाट्यस्य काव्यात्मकता न विखण्डयते

एवमन्यत्रापि प्रतापरुद्रयशोभूषणादिषु[२५] काव्यस्य सामान्यविशेषात्मना द्वैविध्यं भूम्ना चर्चितं लभ्यते ॰

तदित्थं सामान्यरूपं काव्यं साहित्यञ्चेत्यर्थान्तरं न भवतः । ततश्च साहित्यशब्दप्रयोग-पूर्वमकृतेऽपि साहित्यतत्त्वविवेचने काव्यनाम्नाऽभिनवगुप्तमम्मटयोस्तद्विवेचनमनुभूतिसाधितं दृश्यते । नामभेदे च प्रेक्षावन्तो न विवदन्ते । अयमत्रापरो लाभो यद् योऽयं द्वितीयतृतीययोर्मतयोः साहित्यशब्दव्युत्पत्तिसमुत्थापितः प्रायेण वाङ्मयमात्रसाधारणो मतिप्रसरोऽनुभूयते सोऽत्र काव्यशब्द-माश्रित्य कृते तत्त्वविचारे परिह्रियते । यैरपि साहित्यस्य सर्वातिशायित्वमुद्घोषि तैरपि कुन्तकाचार्यै-रात्मनो ग्रन्थरत्नं काव्यालङ्कारनाम्नैव व्यपादेशि । किञ्चामीषु वादेषु साहित्यस्य धर्मरूपतैव सिद्धयति, न तु तद्विशिष्ट(धर्मि)तापि । ततश्च शब्दार्थयोः काव्यत्वसंसिद्धयेऽतिरिक्तो विचारः क्रियते । न च मतुबर्थीयस्याच्प्रत्ययस्य विधानात् साहित्यशब्दस्य तादृशशब्दार्थपरता तेषामभिमता, तद्ग्रन्थेषु तादृशाया व्युत्पत्तेः क्वाप्यदृष्टत्वात् । न चैषाऽन्येष्वपि काव्यशास्त्रप्रमुखेष्वाचार्येषूपलभ्यते तेषु काव्यशब्दस्यैव दृष्टचरत्वात्, गुणालङ्कारसंस्कृतयोः शब्दार्थयोरेव च काव्यतया स्वीकृतत्वात् । तथाहि ध्वन्यालोकविधाता श्रीमानानन्दवर्धनः "**शब्दार्थशरीरं तावत् काव्यम् । तत्र शब्दगताश्चा-रुत्वहेतवोऽनुप्रासादयः, अर्थगताश्चोपमादयः, †संघटनाधर्माश्च . . माधुर्यादयः... प्रतीयन्ते,... वृत्तयोऽपि... उपनागरिकाद्या गताः श्रवणगोचरं रीतयश्च बैदर्भीप्रभृतयः**" इत्येवं पूर्वाचार्यमतोपस्थित्या तादृशशब्दार्थयुगमस्य काव्यत्वमुरीकरोति । एवमेव—

(१) **विविधवाच्यवाचकरचनाप्रपञ्चचारुणः काव्यस्य** । (पृ. ८७ चौ. सं.)

(२) **काव्यस्य हि ललितोचितसंनिवेशचारुणः** । (पृ. ४५ चौ. सं.)

इत्येवं तदेव मुहुः स्मरति । अभिनवगुप्तोऽपि लोचने—

(१) **शब्दार्थगुणालङ्काराणामेव शब्दार्थशोभाकारित्वाल्लोकशास्त्राति-रिक्तसुन्दरशब्दार्थमयस्य काव्यस्य न शोभाहेतुः कश्चिदन्योऽस्ति** । (पृ. १५)

(२) **गुणालङ्कारौचित्यसुन्दरशब्दार्थशरीरस्य सति ध्वननाख्यात्मनि काव्यरूपताव्यवहारः** । (पृ. ५८)

(३) **काव्यग्रहणात् गुणालङ्कारोपस्कृतशब्दार्थपृष्ठपाती ध्वनिलक्षण आत्मेत्युक्तम्** । (पृ. १०४–५)

इत्येवं तत्तत्सन्दर्भे प्रोक्तमेव पन्थानमाशिश्रिये ।

---

२५ श्रीशङ्कररामशास्त्रिप्रकाशिते प्रतापरुद्रयशोभूषणस्य मइलापुरसंस्करणे नाटच-काव्ययोः प्रकरणे भिन्नतया स्थापिते लभ्येते ।

† 'वर्णसंघटनाधर्मा' इति केचित् पठन्ति, तदशुद्धमेव सर्वथा ।

महिमभट्टोऽपि व्यक्तिविवेकापरनाम्नि स्वीये काव्यालङ्कारे पूर्वपक्षाधिकृतत्वेन

'गुणालङ्कारसंस्कृतशब्दार्थमात्रशरीरं काव्यम्' (पृ. ९८)

इति पूर्वमुद्धृतं वामनस्यैव काव्यलक्षणं ध्वनिकृदभिमततयोपस्थापयति। रुद्रटवामनभामहानाञ्च काव्यलक्षणानि प्रागुदाहृतांन्येव। कुन्तकभोजयोरपि शब्दार्थयोरेव काव्यत्वमभिमतमित्यपि नाविदितमिदानीम्। साहित्यमीमांसाकृदपि—'शब्दार्थौ दोषरहिता'वित्यादि पूर्वमुद्धृतमेव काव्यलक्षणमुरीकरोति। साहित्यविचारोऽपि कुन्तकभोजसाहित्यमीमांसाकृद्भिरङ्गतयैव काव्यस्य कृतः। अतः, अलङ्कारः, गुणः, रसादिः, एतदन्तःपातिन्यो रीतिवृत्तिप्रवृत्तयः एतत्सर्वाभिव्यापितया स्थितमौचित्यमिति सर्वैरेव यथासंभवं युक्तत्वमन्योन्यारहितत्वं च (परस्पर्धितयाऽन्योन्यसहितत्वं च वा) शब्दार्थयोः साहित्यपदेनाभिमतं भवति। ततश्च—

> **'सहितं रसेन युक्तं विशिष्टं साहित्यम्[२६], तस्य भावः साहित्यम्। अथवा हितेन निरतिशयप्रेमास्पदेन इतरेच्छानधीनेच्छाविषयेण रसेन सहितम्, उभयत्र व्यञ्जकत्वप्रतिपादकत्वान्यतरसम्बन्धेन विशिष्टं तस्य भावः। किंवा हितं पिहितम् आवृतं तत्सहितम्। अपि वा हितं सन्निहितं नेदिष्ठम् 'हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्' तद्दूरे चान्तिके च यत्' इति च श्रुतेः। सद्भिर्महाकविभिः सम्यक् निहितं रक्षितं वा, तत्सन्निवेशेनैव महाकवित्वलाभात्, प्रहितं प्रेषितं साक्षात्परमानन्दरूपेण, परमेश्वरेण वा; अवहितं निगृहीतेन मनसा ध्यातं प्राचेतसद्वैपायनप्रभृतिभिर्महर्षिभिर्वा; हितं सुहितम् 'यं लब्ध्वा चापरं लाभं मन्यन्ते नाधिकं ततः' इति स्मरणात् अक्षय्यतृप्तिसम्पादनं वा, तत्सहितं तस्य भावः। सर्वथा चेदृश्यो व्युत्पत्तयो रसरूपमर्थं न व्यभिचरन्ति।'**

इति यत् १९९७ विक्रमीये काशीतः प्रकाशिते ध्वन्यालोके तत्संपादकैः श्रीमद्भिः पट्टाभिरामशास्त्रिभिर्भूमिकायां साहित्यशब्दव्युत्पत्तयो दर्शितास्तत्सर्वमप्यसम्प्रदायशुद्धमिति सर्वथानुपजीव्यमेव। हितपदेन पिहितसन्निहितनिहितप्रहितावहितसुहितत्वानामवगमः किम्प्रमाणक इति तावदत्र न विज्ञातुं प्रभवामः, ततश्च योऽयं विभावादिजीवितावधित्वेन प्रसिद्धस्तस्य रसस्य पिहितत्वम्, निहितत्वम्, प्रेषितत्वं वा सुमनोऽननुमोदितं वर्त्म विहाय किमिवैते साधयेयुरिति न जानीमः। अयमत्रापरो गण्डे विस्फोटो यदिमेऽस्य स्वाकार इवाभिन्नतया गोचरीक्रियमाणस्यापि मनसा ध्यातत्वं व्युत्पादयन्ति, यद्यपि 'तत्तत्स्थाय्युपहितस्वस्वरूपानन्दाकारा समाधाविव योगिनश्चित्तवृत्तिरुपजायते' इति पण्डितराजस्य स्वकृतौ रसगङ्गाधर एवंविधः कल्पको दृश्यते, तथापि तत्र चित्तवृत्तिस्वरूपस्य स्थायिनो वृत्त्यन्तरविषयत्वे स्वीक्रियमाणे वेदान्तस्य चित्तवृत्तीनां साक्षिभास्यत्वसिद्धान्तो विहन्यते, ततो निवारिता चानवस्था लम्भितप्रसरा जायते। यच्चात्र 'हितपदेन' अक्षय्यतृप्तिसम्पादनरूपं सौहित्यमेभिरुपकल्पितं तदपि न न्याय्यम्, काव्यरसस्य साध्यावस्थत्वात् क्षणिकत्वस्य सर्वाभियुक्तसंमतत्वात्। न चास्य तृप्तिरपि तथा, तस्यास्तद्रूपत्वस्यैव सिद्धान्तितत्वात्[२७], भिन्नतायामपि तस्या अक्षय्यत्वे काव्यं प्रति पुनःप्रवृत्तेः

२६. विशिष्टं तस्येति भाव्यम्। साहित्यमिति तन्मध्ये भ्रान्तम्।

२७. 'आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्' इत्यत्र 'आह्लाद एव आह्लादकः' इत्यस्या व्युत्पत्तेर्माधुर्यस्य यथाऽऽह्लादरूपत्वमेवाङ्गीक्रियते तथैव रसस्यापि। अतएव 'रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम्' इति प्रयोजनकारिकावृत्तौ काव्यप्रकाशेऽपि ठक्कुरादिभिः तत्र कर्मधारयः समर्थितः।

असंभवात्, ब्रह्मास्वादसब्रह्मचारित्वस्य च निर्मूलनात्। काव्यनाट्यरसेनैव वा अक्षय्यायां तृप्तौ जनितायां कृतमष्टाङ्गयोगेन साधनचतुष्टयसम्पत्त्या ब्रह्मकैवल्यलाभेन वा। किं च रससहितत्वमात्रेण साहित्यवत्वे स्वीकृते नीरसे वस्त्वलङ्कारादिध्वनिसनाथे शब्दार्थालङ्कारचित्रे गुणीभूतव्यङ्ग्ये वा काव्ये स्फुटः साहित्यविगमः। न चात्र साहित्यशून्यता साधयितुं सुशका, संप्रदायविरोधात्, सहृदयनेदीयसो वर्त्मनोऽतिक्रमाच्च।

तदित्थं सर्वैरप्येभिराचार्यैः काव्यधर्मत्वमेव साहित्यस्य स्वीकृतम्, न काव्यत्वम्। 'साहित्य-दर्पण' इति स्वकाव्यालङ्कारनाम कुर्वतो विश्वनाथमहापात्रस्य धर्मितयापि तदभिमतं प्रतिभाति, किन्तु प्रतिभानमात्रमेतत्, तत्र स्फुटं किञ्चित् प्रमाणं न लभ्यते।

(५) काव्याभेदवादः

अच्प्रत्यययोगेन साहित्यशब्दस्य तादृशशब्दार्थरूपकाव्यपरत्वं यद्यपि प्रागुदाहृते काव्यशास्त्र-संप्रदाये न लभ्यते, तथापि कविषु तत्परत्वेनापि प्रयोगो बहुत्र दृश्यते। तथाहि—

दण्डिनो दशकुमारचरितस्य पूर्वपीठिकायां [यदि सा तन्निर्मितैव स्यात्] सर्वप्रथमं धर्मिपरत्वेन साहित्यपदप्रयोगो लभ्यते। तत्र राजकुमारस्य राजवाहनस्याधीतानां विद्यानां परिगणने लिपिः, निखिलदेशीया भाषाः, षडङ्गो वेदः, काव्यम्, नाटकम्, आख्यातम्, आख्यायिका, इतिहासः, चित्रकथाः, पुराणम्, धर्मशास्त्रम्, व्याकरणम्, ज्यौतिषम्, तर्कः, मीमांसा, कौटिल्यकामन्दकादी-नामर्थशास्त्राणि, वीणादिवाद्यम्, गजाश्वारोहणम्, विविधायुधप्रयोगः, चौर्यद्यूतादिकपटकलाः,—इत्येतेषु संगीतसाहित्ये अपि स्मृते स्तः। तत्र काव्यनाटकानां पृथगुल्लेखात् साहित्यपदं नृत्यादिकला-परतया टीकाकृता व्याकृतम्। वस्तुतः संगीतसाहचर्यात् साहित्यपदमत्र पद्यकाव्यैकपरतया नेयम्। प्रसिद्धं हि काव्यस्य पद्यमयत्वमेव प्रायेण। कालिदासः शाकुन्तले दुष्यन्तावदानं पद्येष्वेव गीतिक्षमेषु निबध्यमानमप्सरोभिराद्रियते। तथाहि--

'विच्छित्तिशेषैः सुरसुन्दरीणां वर्णैरमी कल्पलतांशुकेषु।
विचिन्त्य गीतिक्षममर्थबन्धं दिवौकसस्त्वच्चरितं लिखन्ति।'(७।५)

रामायणेऽपि गानमसौ न विस्मरति—

स्वकृतिं गापयामास कविप्रथमपद्धतिम्॥ (रघुवंशे १५।३३)
रामस्य मधुरं वृत्तं गायन्तौ मातुरग्रतः।
तद्वियोगव्यथां किञ्चिच्छिथिलीचक्रतुः सुतौ॥ (रघुवंशे १५।३४)
अथ प्राचेतसोपज्ञं रामायणमितस्ततः।
मैथिलेयौ कुशलवौ जगतुर्गुरुचोदितौ॥ (रघुवंशे १५।६३)
वृत्तं रामस्य वाल्मीकेः कृतिस्तौ किन्नरस्वरौ।
किं तद् येन मनो हर्तुमलं स्यातां न शृण्वताम्॥ (रघुवंशे १५।६४)
तद्गीतश्रवणैकाग्रा संसदश्रुमुखी बभौ।
हिमनिष्यन्दिनी प्रातर्निर्वातेव वनस्थली॥ (रघुवंशे १५।६६)
गेये को नु विनेता वां कस्य चेयं कृतिः कवेः।
इति राज्ञा स्वयं पृष्टौ तौ वाल्मीकिमशंसताम्॥' (रघुवंशे १५।६८) इति

अत्र च रामायणस्य कविप्रथमपद्धतित्वमपि तथ्यमिदं साधयति, तस्य पद्यमयत्वात्। 'आम्नायादन्यत्र नूतनश्छन्दसामवतार'[२८] इति भवभूतिवचनं तमिममर्थं द्रढयति। काव्यमीमांसायां काव्यपुरुषोत्पत्तिप्रकरणे राजशेखरोऽपि 'सरस्वती०० काव्यपुरुषं सुषुवे सोऽभ्युत्थाय सपादोपग्रहं छन्दस्वतीं वाचमुदचीचरत्—

'यदेतद् वाङ्मयं विश्वमर्थमूर्त्या विवर्तते।
सोऽस्मि काव्यपुमानम्ब पादौ वन्देय तावकौ॥' इति।

तामाम्नायदृष्टचरीमुलभ्य भाषाविषये छन्दोमुद्रां देवी०००तमुदपालयत्—'वत्स सच्छन्दस्काया गिरः प्रणेतः! वाङ्मयमातरमपि मां विजयसे...इति। त्वत्तः पूर्वे हि विद्वांसो गद्यं ददृशुर्न पद्यम्। त्वदुपज्ञमथातः छन्दस्वद् वचः प्रवर्त्स्यति।' इति काव्ये पद्यमयताया एवासाधारणधर्मत्वं प्रतिपाद्य तदनन्तरं—'स सारस्वतेयस्तस्मै [उशनसे] छन्दस्वतीं वाचं समचारयत्, अकस्माद् विस्मापयन् स चाभ्युवाच—

'या दुग्धापि न दुग्धेव कविदोग्धृभिरन्वहम्।
हृदि नः सन्निधत्तां सा सूक्तिधेनुः सरस्वती॥' इति

सा [सरस्वती] प्राचेतसायापि महर्षये सच्छन्दांसि वचांसि प्रायच्छत्। स निषादनिहतसहचरीकं क्रौञ्चयुवानं करुणक्रेङ्कारया गिरा क्रन्दन्तमुदीक्ष्य शोकवान् श्लोकमुज्जगाद—

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥' इति।

इति शुक्रवाल्मीकी अपि पद्यकर्तृत्वेनैव कवियशोभागिनावुरीकृत्य तदेव प्रमाणयति। चतुर्थेऽध्यायेऽपि कविभेदानामुदाहरणानि च श्लोकरूपाण्येव दर्शयति। अन्येष्वपि चाध्यायेषु श्लोकनिर्माणश्रममसौ कवेर्नित्यकर्मतया निर्दिशति। क्षेमेन्द्रोऽपि कविकण्ठाभरणे—

गीतेषु गाथास्वथ देशभाषाकाव्येषु दद्यात् सरसेषु कर्णम्।
वाचां चमत्कारविधायिनीनां नवार्थचर्चासु रुचिं विदध्यात्॥ [१।१७]
पठेत् समस्तान् किल कालिदासकृतप्रबन्धानितिहासदर्शी॥ [१।१८]

महाकवेः काव्यनवक्रियायै तदेकचित्तः परिचारकः स्यात्।
पदे च पादे च पदावशेषसंपूरणेच्छां मुहुराददीत॥ [१।२०]

अभ्यासहेतोः पदसन्निवेशैर्वाक्यार्थशून्यैर्विदधीत वृत्तम्।
श्लोकं परावृत्तिपदैः पुराणं यथास्थितार्थं परिपूरयेच्च॥ [१।२०]

शिक्षयानया कवित्वलाभाय श्लोकनिर्माणमेव प्रथमतयाऽजीगणत्। श्रीहर्षोऽपि नैषधे चिन्तामणिमन्त्रोपदेशफलं दर्शयन्—

'पुष्पैरभ्यर्च्य गन्धादिभिरपि सुभगैश्चारु हंसेन मां चे-
न्निर्यान्तीं मन्त्रमूर्त्तिं जपति मयि मतिं न्यस्य मय्येव भक्तः।
तत्प्राप्ते वत्सराब्दे शिरसि करमसौ यस्य कस्यापि धत्ते
सोऽपि श्लोकानकाण्डे रचयति रुचिरान् कौतुकं दृश्यमस्याः॥' [१४।९०]

---

२८. उत्तररामचरिते–२।५६ गद्यम्।

पद्येनानेन श्लोकपरिणतिमेव कवित्वपरिणतिमामम्नौ। अतएवालङ्कारिकशिरोमणिः श्रीमान् महिमाचार्यश्छन्दसोऽपि काव्यालङ्कारत्वमुरीचक्रे—

'यमकानुप्रासयोरिव वृत्तस्यापि शब्दालङ्कारत्वमुपगतमस्माभिः[२९]।' इति

एवंविधैरन्यैरपि सन्दर्भैः संगीतसंपुटिते काव्य एव दण्डिन उक्ते प्रयोगे साहित्यपदस्य तात्पर्यमुरीकर्तुमुचितम्। संगीतस्य साहित्यं वाद्यादिसहितत्वमिति तु तत्र कल्पनैकपदं व्याख्यानमुरीकर्तुं न युज्यते समित्युपसर्गेण वीणाद्यशेषवाद्यदाक्ष्यमिति विशेषणान्तरेण च तदर्थप्रत्यायनात् पौनरुक्त्यापत्तेः। रागान्तरसाहित्यं त्वकिञ्चित्करम्, तस्य शब्दं विनाप्युपलब्धेस्तादृशब्दप्रयोगेऽपुष्टिप्रसङ्गात्। संगीतसाहित्ययोर्यौगपद्यं प्रायेण—

'साहित्यसङ्गीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः।'[३०]

इत्यादिषु सर्वतः प्रसिद्धमपि वरीवर्त्ति।

अभिनवगुप्तस्य पूर्वोद्धृते विमर्शिनीपद्ये दर्शितं साहित्यपदं नियतमेव काव्यपरम्, सौहित्यपदसाहचर्यात्।

क्षेमेन्द्रः साहित्यपदं स्फुटं व्यवहरति—

'कुर्वीत साहित्यविदः सकाशे श्रुतार्जनं काव्यसमुद्भवाय।
न तार्किकं केवलशाब्दिकं वा कुर्याद् गुरुं सूक्तिविकासविघ्नम्[३१]॥' इति

एवमेव—

श्रुत्वाभिनवगुप्ताख्यात् साहित्यं बोधवारिधेः।
आचार्यशेखरमणेर्विद्याविवृतिकारिणः[३२]॥ इति

उभयत्रापि साहित्यपदं काव्यपरं काव्यशास्त्रपरं च संभाव्यते।

श्रीकण्ठचरितप्रणेता मङ्खोऽपि—

'विना न साहित्यविदा परत्र गुणः कथञ्चित् प्रथते कवीनाम्।
आलम्बते तत्क्षणमम्भसीव विस्तारमन्यत्र न तैलबिन्दुः॥' [२।१२]

साहित्यपदादत्र नूनं काव्यमेवाभिप्रैति।

श्रीहर्षोऽपि भगवतीं सरस्वतीं वर्णयन्—

मध्येसभं सावततार बाला गन्धर्वविद्याधरकण्ठनाला।
त्रयीमयीभूतवलीविभङ्गा साहित्यनिर्वर्तितदृक्तरङ्गा॥ [नैषधे १०।७३]

---

२९. व्यक्तिविवेकस्य १९१ पृष्ठे [चौ. संस्करणीयस्य]

३०. भर्तृहरिनाम्ना प्रसिद्धमेतत्। एवमेव—

'सङ्गीतमथ साहित्यं सरस्वत्या स्तनद्वयम्।
एकमापातमधुरमन्यदालोचनाऽमृतम्॥' इत्यादिष्वपि।

३१. कविकण्ठाभरणे – १।१५

३२. बृहत्कथामञ्जरी–उपसंहारे ३७ पद्यम्।

पद्येऽत्र काव्यार्थ एव साहित्यपदं प्रयुङ्क्ते । एवमेव—**साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले तर्के वा मयि संविधातरि समं लीलायते भारती**''ति स्वगर्वोक्तावपि ।

बिह्लणः स्वकृतौ विक्रमाङ्कदेवचरिते साहित्यपदं नैकधा प्रयुङ्क्ते—

साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः ।
यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवन्ति ॥ [१ । ११]

अत्र साहित्यपदं काव्यसामान्यार्थकमेव । म. म. भारतरत्नं श्रीमान् काणेमहोदयः पद्यस्यास्य साहित्यपदं वाङ्मयपरतया व्याकरोति । स्वकृतौ संस्कृतकाव्यशास्त्रेतिहासे लिखति—

'In the verse 'साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः । it will be noticed that साहित्य means 'Literature in General and Kāvya is said to arise like nectar from the ocean of साहित्य (i. e. काव्य is the quintessence of साहित्य[३३])'

एवमन्येऽपि कन्हैयालालपोद्दारप्रभृतयः[३४] पद्यस्यास्यैतत् पदं वाङ्मयपरमेव मन्वते। तत्र भावनया-नया निमीलितधियः केचन 'कर्णामृतमि'ति पदं 'काव्यामृत'मिति परिणमय्य योजयन्तो दृश्यन्ते[३५]। वस्तुतोऽत्रापि साहित्यपदं काव्यसामान्यार्थकं भवति । कर्णामृतपदेन निगीर्याध्यवसानयातिशयोक्त्यात्र श्रव्यकाव्यमात्रमभिप्रेतमस्ति । साहित्यपदेन वाङ्मये गृह्यमाणे नाटकस्य कर्णामृतत्वमपहस्तितं भवति । न च तल्लोचनामृतमस्तीति वाच्यम्, अभिनयमात्रस्य दृश्यतया स्थितेः शेषस्य श्रव्यत्वाविखण्डनात् । भवति चात्र तथैवाचार्यप्रतिपत्तिः पूर्वं हेमचन्द्रमते तस्या दृष्टचरत्वात् । न चात्र सर्गबन्धप्रकरणेऽनुत्थानपराहतैव नात्यकथेति वक्तव्यम्, हर्षचरितादिषु[३६] स्वप्नवासवदत्तादिस्मरणस्याप्रस्तुतत्वप्रसक्तेः । न चायमस्ति तत्राग्रहो यन्महाकाव्यकृतामेव काव्यारम्भे चर्चा स्यात्, तद्विरोधितया स्थितानामेव च खलानां निन्दा, प्रत्युतायमस्ति तत्राचार्याणां प्रणयो यत् काव्यसामान्यस्य प्रणेतॄणामपहर्तॄणां च तत्र ते स्यातामिति । किं च श्रव्यमपि कथाख्यायिकादिभेदेन गद्यरूपमनेकधा दृश्यते काव्यम्। तत् कर्णामृतपदेनात्र न स्मर्यते । स्मर्यते केवलं संगीतिमयं पद्यकाव्यमेव । अतएव तत्कविः—

'जयन्ति ते पञ्चमनादमित्रचित्रोक्तिसन्दर्भविभूषणेषु ।
सरस्वती यद्वदनेषु नित्यमाभाति वीणामिव वादयन्ती' ॥[३७] (१।१०)

इति पूर्वतनेऽस्मिन् पद्ये कोकिलालापं स्मरति । यदि वाङ्मयव्यतिरेकेण कर्णामृतपदोपलक्ष्यतयात्र केवलं पद्यमात्रमाद्रियते तर्हि

---

३३. History of Samskṛta Poetics, Page 328.

३४. 'संस्कृत साहित्य का इतिहास', कन्हैयालाल पोद्दार.

३५. 'काशी नागरी प्रचारिणी सभायाः' नागरीप्रचारिणीपत्रिकाया २०१७ संवत्सरीये द्वितीयेऽङ्के 'काव्यों में अन्योक्ति' इतिनामा लेखोऽत्र द्रष्टव्यः ।

३६. सूत्रधारकृतारम्भैः० इति प्रसिद्धं पद्यम् ।

३७. कादम्बर्याम् ।

'कटु क्वणन्तो मलदायकाः खलास्तुदन्त्यलं बन्धनशृङ्खला इव ।
मनस्तु साधुध्वनिभिः पदे पदे हरति सन्तो मणिनूपुरा इव ॥' [३८] इति

गद्यकाव्यविषयमाकर्षकत्वसंसाधनं दुरुपपादमुपपद्येत, कर्णामृतपदेन तदतिरिक्तस्यान्यस्य कस्यचिदपि धर्मस्य प्रतिपादनासम्भवात्, वाङ्मयातिरेकिणोऽस्य धर्मस्य गद्येऽपि संभवाच्च। उभयसाधारण्येन कर्णामृतत्वस्य स्थितौ तु काव्यामृतमित्येवोक्तं स्यात्, स्याच्च 'काव्यार्थचौरा' इत्यस्य स्थाने 'परार्थचौराः' इति पदान्तरप्रयोगः । ततश्चोपजातिसौन्दर्यमपि परार्धस्योपेन्द्रवज्रैकमयतया निष्पद्येत परिह्रियेत च समानश्रमोत्पन्नामृताधिकारिभिर्दैत्यैस्तथाविधानां खलानामुपनिबध्यमाने सादृश्ये जायमानस्यासामञ्जस्यस्य प्रसङ्गः, परार्थचौरत्वस्योपमेयोपमानोभयसाधारण्यस्य सिद्धेस्तत्कारित्वेनाभिव्यक्तस्यानौचित्यस्याप्युभयत्राप्यवस्थितत्वप्रत्ययात् । दृश्यश्रव्योभयं साहित्यतयादाय दृश्यव्यतिरेकेण श्रव्यमात्रे कर्णामृतत्वसाधने तु नायमुपप्लवः । नाटकं चाभिनयक्रियामात्रतो भिन्नम् । न चेयं केनाप्यपहर्तुं शक्या । शेषस्यास्य श्रव्याविशेषितयाऽपहरणस्य संभवे तदर्थं प्रबोधस्य विधानमुचितं भवति । न चात्र पक्षे पाथोनिधिसाम्यं विघटते, क्षारतयाऽमृततुल्येन साहित्येन पाथोधेर्वैषम्यात्- इति वाच्यम्, गाम्भीर्यमात्रस्यात्र साधारण्येन विवक्षितत्वात् । यद्वा पद्यापेक्षया गद्यस्यापातरमणीयत्वं नाधिकं भवतीति ततोऽस्य क्षारत्वप्रतिपादनेऽपि न दोषः । प्रतिपाद्यते हि पद्यस्य श्रुतिसुभगत्वं महद्भिः । जगद्धरः स्तुतिकुसुमाञ्जलौ काव्यस्य विशेषममुं निपुणं निर्वर्णयति —

'शब्दार्थमात्रमपि ये न विदन्ति तेऽपि
यां मूर्च्छनामिव मृगाः श्रवणैः पिबन्तः ।
संरुद्धसर्वकरणप्रसरा भवन्ति
चित्रस्थिता इव कवीन्द्रगिरं नुमस्ताम् ॥ [५।१७] इति ।

एवमेव—

अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ॥'

इत्यादयः सूक्तयो विषयेऽत्र प्रचलन्ति । पद्यस्य संगीतिसंभावनया सद्योहारितामुपलक्ष्यैव तदयुक्तस्य गद्यस्य कविनिकषत्वख्यातिः सत्सु प्ररोहति-'गद्यं कवीनां निकषं वदन्ती'त्यादिः ।[३९] ततोऽत्र क्षारत्वव्यक्तिरपि नासाधीयसी । किं च वामनप्रभृतिभिः, यथा पूर्वमस्माभिर्दर्शितं[४०], सन्दर्भेषु दशरूपकस्यैव श्रेयस्त्वमुदघोषि । सर्गबन्धप्रणेता बिल्हणस्तत् सोढुमसहो दृश्यकाव्यतोऽपि श्रव्यस्य श्रेयस्त्वं प्रतिपादयन्नेवमस्य कर्णामृतत्वमुल्लिखति । न चास्ति वाङ्मयार्थे साहित्यपदं क्वापि संस्कृतसाहित्ये प्रयुक्तम् । साहित्यमीमांसाकृतापि साहित्यस्य यद् वाङ्मयत्वं प्रत्यपादि तदपि परिष्कारत्वेनाभिमतेष्वेव सम्बन्धेषु तस्य संरम्भदर्शनात्--

'न च काव्ये शास्त्रादिवदर्थप्रतीत्यर्थं शब्दमात्रं प्रयुज्यते,
सहितयोः शब्दार्थयोस्तत्र प्रयोगात् ।
साहित्यं च तुल्यकक्षत्वेनान्यूनानतिरिक्तत्वम् ॥

---

३८. कादम्बर्यामेव ।

३९. काव्यालङ्कारसूत्रवृत्तावुद्धृतमेतत्–'

४०. ६६ पृष्ठे, ६४ पृष्ठे च

इति च तस्यैव परवर्त्तिनि[४१] ग्रन्थे व्यक्तिविवेकव्याख्यानाख्ये[४२] सिद्धान्तत्वेन [४३] कुन्तकमतस्यैवाङ्गीकृते-र्निर्मूलम्। भवतु च साहित्यमीमांसायां साहित्यपदस्य वाङ्मयपरत्वं तथापि नात्र काचन हानिः, तन्मतस्य सर्वैरप्यनङ्गीकृतत्वात्। स्वयं तेनापि स्वकीये[४४] श्रीकण्ठचरिते साहित्यपदस्य यस्मिन्नर्थे प्रयोगः कृतः स तस्य प्रागुदाहृते 'विना न साहित्यविदा' इति पद्ये स्पष्टं दृश्यते, यावदन्यैरपि तस्मिन्नेवार्थे साहित्यपदं प्रायोजीति तैस्तैः कालक्रमागतैः सन्दर्भैर्लभ्यते—

बिह्लणो विक्रमाङ्कदेवचरिते भूयोऽपि द्विः साहित्यपदं प्रायुणक्। तथाहि—

'कुण्ठत्वमायाति गुणः कवीनां साहित्यविद्याश्रमवर्जितेषु।
कुर्यादनार्द्रेषु किमङ्गनानां केशेषु कृष्णागरुधूपवासः॥ [१।१४]

अत्राङ्गनाकेशौपम्येन साहित्यस्य काव्यात्मकत्वमेव पुष्यति। अष्टादशे सर्गे स्वपरिचये—

अङ्गैस्त्वङ्गत्कनकरुचिभिः कामणं लोचनानां
सूरेस्तस्मादजनि जगतां शेखरो बिह्लणाख्यः।
सान्द्रैर्वेदध्वनिभिरनभिव्यक्तमञ्जीरनादा
मौञ्जीबन्धात् प्रभृति वदने यस्य वाग्देवतासीत्॥ ८१॥
साङ्गो वेदः फणिपतिदिशा शब्दशास्त्रे विचारः
प्राणा यस्य श्रवणसुभगा सा च साहित्यविद्या।
को वा शक्तः परगणयितुं श्रूयतां तत्त्वमेतत्
प्रज्ञादर्शे किमिव विमले नास्य सङ्क्रान्तमासीत्॥ ८२॥

इत्थं साहित्यविद्यां स्वप्राणतयाऽभिप्रैति। अत्रापि काव्यस्यैव तात्पर्यविषयता संभवति साहित्य-विद्यापदात्, तस्यैव प्राणत्वेन हार्दिकतायाः संभवात्, न तु शास्त्रस्य।

उद्भटकृतेः काव्यालङ्कारसारसङ्ग्रहस्य टीकिता प्रतीहारेन्दुराजोऽपि—

मीमांसासारमेघात् पदजलधिविधोस्तर्कमाणिक्यकोशात्
साहित्यश्रीमुरारेर्बुधकुसुममधोः शौरिपादाब्जभृङ्गात्।
श्रुत्वा सौजन्यसिन्धोर्द्विजवरमुकुलात् कीर्तिवल्ल्यालवालात्
काव्यालङ्कारसारे लघुविवृतिमधात् कौङ्कणः श्रीन्दुराजः॥[४५] 'इति

साहित्यपदं काव्यपरतयैव नियुङ्क्ते। काणेमहोदयः—

---

४१. व्यक्तिविवेकव्याख्याने साहित्यमीमांसाया उल्लेखो लभ्यते, स चात्रैव २३ तमायां पादटिप्पण्यां द्रष्टव्यः।

४२. व्यक्तिविवेकस्य चौखम्भासंस्करणे २९८ पृष्ठे।

४३. कुन्तकमतं पूर्वमुद्धृतम्।

४४. श्रीकण्ठचरितस्य प्रणेता मङ्ख एव रुय्यकालङ्कारसूत्राणां भाष्यस्यालङ्कारसर्वस्वस्य साहित्यमीमांसाया व्यक्तिविवेकव्याख्यानस्य च कर्त्तास्तीति सर्वसम्मतम्।

४५. टीकाया अन्ते।

Here obviously the word साहित्य stands for साहित्यशास्त्र as in the case of मीमांसा, व्याकरण and तर्क.[४६]"— इत्येवं साहित्यस्य शास्त्रपरतामामनति। तदपि नानुचितम्। केवलं श्रिय औपम्यं तत्र नातिघटते। शास्त्रान्तरापेक्षया सरलतामात्रेण तु तत् कथञ्चिन्नीयेत। शास्त्रान्तरेषु पठितेषु साहित्यस्य गतार्थतात्रागूर्यते चेत् तत्राप्याधारतया काव्यमवश्यमपेक्ष्येत। नास्ति नामात्र तत्प्रतिपादकं किञ्चिदप्यन्यत् पदं साहित्याद्दते। माघादीनां च काव्यानां शास्त्रात्मकताऽप्यस्त्येव सर्वबुधदृष्टचरा।

नीलकण्ठदीक्षितः साहित्यपदं शिवलीलार्णवे मुहुरादत्ते। तथाहि—

'साहित्यविद्याजयघण्टयैव सम्वेदयन्ते कवयो यशांसि।
यथा यथास्यां ध्वनिरुज्जिहीते तथा तथा सार्हति मूल्यभेदान्॥ (१।८)

साहित्यविद्यां पदमेकमेव सर्वानवद्यामपि हन्ति दुःस्थम्।
दन्तावलिं मौक्तिकदामरम्यां दंष्ट्रेव वक्त्राद् बहिरुल्लसन्ती॥ (१।३५)

तन्त्रान्तरेषु प्रतिपाद्यमानास्ते ते पदार्था ननु ते त एव।
निर्वेदभीशोकजुगुप्सितान्यप्यायान्ति साहित्यपथे रसत्वम्॥ (१।२२)

बाल्यं विदुः प्राकृतभाषितानि श्रुतिस्मृतीर्वृद्धदशां वदन्ति।
साहित्यमेकं तु गिरां सवित्र्यास्तारुण्यमुद्गाढमुशन्त्यभिज्ञाः॥ (१।२८)

एतेषु साहित्यं साहित्यविद्या साहित्यपथश्चेति काव्यमात्रं प्रतिपादयन्ति।

एवमादिषु प्रयोगेषु साहित्यपदस्य काव्यसामान्यपरत्वं प्रकामं पुष्यति।

(६) नाट्याभेदवादः

काव्यसामान्ये प्रागुक्तेन विधिना नाट्यमपि संगृह्यते, तथापि विशदतया व्याख्यानाय पृथगेतदुपन्यस्यते।

सर्वेश्वराचार्यः साहित्यसारनामकं[४७] षड्भिः प्रकाशैर्युक्तं ग्रन्थं विनिर्ममे। तत्र नाट्यमात्रं तेन विचारितम्। नाट्ये वाचिकाभिनयान्तःपातितया काव्यस्य दोषगुणालङ्कारा अपि संक्षिप्ताः। तत्र—

अशेषाख्यातसाहित्यसारनिष्णातमानसः।
सर्वेश्वर इति ख्यातः कविर्जयति भूतले॥ (१।५)

लसन्मृदुपदावल्या बालव्युत्पत्तिकारणम्।
तेन साहित्यसारोऽसौ क्रियते नाट्यलक्षणम्॥ (१।११) इति

कण्ठरवेण स्वयं तत्कृतैवेदं प्राकाशि। स हि साहित्यपण्डितमेवं लक्ष्यति—

'यः शब्दशास्त्रनिर्वृत्तः स्वभावविशदाशयः।
भरतादिषु निष्णातः स हि साहित्यपण्डितः॥ (१।१४) इति।

---

४६. History of samskṛta poetics, पृ. ३२८.

४७ केरलविश्वविद्यालय पाण्डुग्रन्थालयतः प्रकाशितः।

(७) काव्यशास्त्राभेदवादः

प्रागुदाहृतैः प्रायः सर्वैरेव साहित्यपदैः काव्यशास्त्रमप्यर्थतयाऽभिमन्तुं शक्यते। अन्यैरपि स्पष्टैः प्रमाणैरर्थोऽयं प्रमाणीक्रियते। सर्वप्रथमं राजशेखरस्य—

(१) '**पञ्चमी साहित्यविद्या। सा हि चतसृणामपि विद्यानां निष्यन्दः।**'

(२) **शब्दार्थयोर्यथावत्सहभावेन विद्या साहित्यविद्या--**' इमे वाक्ये यद्यपि काव्यमात्रपरे तथापि काव्यशास्त्रायापि मन्तुं शक्ये। महामहोपाध्यायकाणेप्रभृतयः प्रतीहारेन्दुराजस्य 'साहित्यश्रीमुरारेः'--इति प्रागुदाहृतं प्रयोगमपि तद्गुरोर्मुकुलभट्टस्य—

पदवाक्यप्रमाणेषु तदेतत्प्रतिबिम्बितम्।
यो योजयति साहित्ये तस्य वाणी प्रसिदति॥

इति कारिकाया व्याख्याने--

'**व्याकरणमीमांसातर्कसाहित्यात्मकेषु चतुर्षु शास्त्रेषूपयोगात्**' इत्यत्र शास्त्रार्थतया प्रयुक्तस्य साहित्यपदस्य प्रकाशे शास्त्रपरमेव मन्वते[४८]। अभिनवगुप्तस्यापि प्रागुद्धृते तन्त्रालोकपद्ये साहित्यपदं काव्यशास्त्रपरमेव प्रतीयते। रामचन्द्रगुणचन्द्रौ नाट्यदर्पणे साहित्ये हेमचन्द्रशिष्यतां गौरवेण प्रतिपादयतः--

शब्दप्रमाणसाहित्यच्छन्दोलक्ष्मविधायिनाम्।
श्रीहेमचन्द्रपादानां प्रसादाय नमो नमः॥ (पुष्पिका)

क्षेमेन्द्रोऽपि स्वं प्रागुक्तदिशा साहित्येऽभिनवगुप्ताल्लब्धदीक्षं मनुते।

नीलकण्ठदीक्षितः—'**मुधैव वाक्येषु पदेष्वधीतं मुधैव दीर्घं कवितापथेऽस्मिन्।**
आवश्यकं यत् किल पामराणामावर्जनं तन्न किमप्यधीतम्॥ (१।६६)
घट्टोपविष्टानिव वाग्भिरर्थैः काव्यागमज्ञानुपसान्त्वयामः।
आप्लुत्य भल्लूकवदापतन्तः कथं नु जय्या इह गौतमीयाः॥ (१।७१) इति

शिवलीलार्णवे काव्यशास्त्रपरत्वेन कवितापथकाव्यागमपदे प्रयुङ्क्ते। वस्तुतः शास्त्रार्थे काव्यसाहित्यशब्दौ तदैव नान्तरीयकौ यदैते लक्षण-लक्ष्मालङ्कारादिशब्दैर्युज्येते। अद्यत्वे तु संस्कृतसंस्थाभिः साहित्यपदस्य काव्यं तच्छास्त्रञ्चेति द्वितयमपि वाच्यतयाऽस्त्यङ्गीकृतम्। अस्याः शताब्द्याः परम्परापारदृश्वभिर्महद्भिर्विद्वद्भिरेवैष व्याहारः साम्प्रतं प्रवर्त्तित इति नूनमत्र प्राचामप्यनुरोधोऽनुमातुं शक्यते।

तदित्थं काव्यनाट्यतदुभयशास्त्रप्रतिपादकस्य साहित्यपदस्य धर्मिपरत्वमवसीयते। शेषविषयकस्य च धर्ममात्रपरत्वम्। तदत्र प्रथमे पक्षे मतुवर्थीयस्याचोऽपि विधानं परम्परानुमोदितं तिष्ठति। सेयमुपस्थापिता साहित्यपदप्रयोगपूर्वे संस्कृतकाव्यशास्त्रे लभ्यमाना विचारसन्ततिः।

साम्प्रतं तत्रैव कांश्चनात्मनोऽपि निष्कर्षानुपच्छन्दयामः।

'**यो यो यं यमवाप्नुयादवयवोद्देशं स्पृशन् पाणिना**
तत्तन्मात्रकमेव यत्र स स ते रूपं परं मन्यते।

---

४८. History of Samskṛta Poetics-by Kaṇe. Page-३२८

अन्यासक्तदृशां पुरं करिपते ! नीतोऽसि हा वेधसा
को नामात्र भवेद् बताखिलभवन्माहात्म्यवेदी जनः ।।'

इत्युक्तिदिशा तत्त्वान्वरविषक्तधिषणा हि भरतप्रभृतयो मुनयः काव्यविषयकं यदृच्छया कंचिदेव विशेषमापुः। तत्रैव च साकल्यधिया भामहदण्डिप्रभृतयः प्रववृतिरे। तत्र वामनानन्दवर्धन-प्रभृतिभिः कृत्स्नवेदिभिरुद्धृतां संविदर्माधिष्ठाय विमृश्यमानेऽवश्यमेव क्रमप्राप्तो हृदयङ्गमो निष्कर्षः प्राप्तुं सुशकः।

भरतमुनेः समयो वस्तुतः सम्मुग्धज्ञानसमयो दृश्यते। तत्र तद्विषयतासिद्धान्तानुसारं[49] भरतनाम्नैव तन्नाट्यशास्त्रे तच्छिष्यैर्यो विमर्शो घटितस्तत एव काव्यशास्त्रविषये मुनेरस्य सर्वज्ञत्वं पण्डितराजादिभिरङ्गीचक्रे[50]। अस्मन्मते भरतस्य स्वोपज्ञो विचारः स एव यत्रासौ 'नाट्यालङ्कारचतुराः' (१।४७) इत्यादिषु स्थलेष्वलङ्कारशब्दं प्रयुङ्क्ते। अत्र वस्तुतोऽलङ्कारशव्दस्य योगशक्तिलभ्य एवार्थो विवक्षितः। सोऽपि च भावार्थमात्रकः, न तु करणार्थोऽपि। यथा ध्वनितत्त्वेऽन्वेषिते त्रिधा पूर्वपक्षाः समजनिषत [(१) पूर्वाचार्यप्रतिपादितकाव्यतत्त्वव्यतिरिक्तः कोऽयं ध्वनि'रिति प्रथमः संशयात्मा (२) नास्त्येव ध्वनिरिति द्वितीयः (३) 'प्रवादमात्रं ध्वनिः, कामनीयकमनतिवर्त्तमानस्य तस्योक्तेष्वेव चारुत्वहेतुष्वन्तर्भावात्'—इति तृतीयश्च वादात्मकौ] तथैव वाङ्मयान्तरवैलक्षण्यं काव्यस्यानुसंधित्सुभिरपि पुरा प्रश्ना उत्थाप्येरन्। तदुत्तरतया च प्राक् काव्यस्पृष्टत्वमात्रेण वाङ्मयान्तरलभ्यस्य वस्तुमात्रात्मनोऽर्थस्य व्याससमासाभ्यां न्यूनातिरिक्तभावशून्यतया योऽयमन्तः-करणावर्जकत्वमहिमा जायते तत्पिशुने 'अलम्' इति पदे भावार्थकस्य 'कार'—पदस्य योगाद् 'अलङ्कार' इति नवनिर्मितेन पदेन गम्योऽर्थः 'सहृदयहृदयावर्जनक्षमत्व'रूपः प्रतिष्ठापितः स्यात्। ततश्च यथाहि बीजस्य शतशाखीभवनं तस्यालङ्कारः, बन्धुरायाः प्रस्तरशिलायाष्टङ्किकासंस्कारेण प्रतिमात्वापत्तिर्वा तस्याः तथैव वाङ्मयान्तरे सूत्रात्मनेङ्गितस्य वस्तुनः काव्ये तूलिकया चित्रोन्मीलनमिव व्यक्ततमीकरणम्, आख्यानात्मना प्रपञ्चिततमस्य वा तस्य बृंहिष्टस्य वनखण्डस्य छायाग्राहिकया[51] चित्रितीकरणमिव यद् हृदयङ्गमनीयतापादनं तत् तस्यालङ्कारः। तस्य च ये चतुर्विधा आङ्गिकवाचिकसात्त्विकाहार्या अभिनया नाट्ये हेतुतया अभिमताः त एव काव्येऽपि वर्णनात्मनाऽभिव्यक्ता हेतुतां प्रतिपद्यन्ते। करणव्युत्पत्त्या तेषामपि 'अलङ्कार'नाम्ना व्यपदेशः कर्तुं शक्यते। तत्राङ्गिकोऽभिनयोऽनुभावतया सात्त्विकः सात्त्विकभावतया, आहार्यश्चोद्दीपनविभावानुभावान्यतरतया परिणमते, यश्चायमपरो वाचिको नामाभिनयस्तस्यास्यात्र तदितरत्रितयाश्रयत्वमनुभावरूपत्वं च संभवति। आश्रयभावेऽपि स्वभावात्मता, वक्रात्मता चास्य संभाव्येते। ततश्च यथास्य स्वभावात्मता वक्रात्मता चाऽलङ्कार-तयाऽभिमते तथैव विभावानुभावसात्त्विकभावताऽपि तत्तया स्वीकर्तुं नानुचिता। अत एव च 'स्वभावोक्तिश्च वक्रोक्ती रसोक्तिश्चेति वाङ्मयम्' (५।८) इति सरस्वतीकण्ठाभरणकृताऽभ्य-मानि, उद्भटादिभिरपि च तत्पूर्वैं रसस्यालङ्कारतया व्यपदेशोऽक्रियत। अनुभूतिदृष्ट्या य एव रसो

---

४९. यस्य गुरोः कुलेऽधीतं स्वनिर्मितस्य शास्त्रस्य तन्नाम्नैव ख्यापनं तद्विषयता—द्रष्ट० डॉ० वासुदेवशरणाग्रवालस्य 'पाणिनिकालीनभारतवर्ष' इति ग्रन्थः।

५०. रसगङ्गाधरे नि. सा. संस्करणस्य पृ. ५७.

५१. कैमरापदवाच्यया।

वेद्यान्तरस्पर्शशून्यतया प्राधान्यं ध्वनिरूपतां चार्हति व्यञ्जकत्वावच्छिन्नकाव्यनाट्यादिदृष्ट्या स एव भावसाधनोऽलङ्कारोऽपि भवितुं नानर्हः । मन्यते च सम्बन्धभेदेन विषयविषयिणोरन्योन्यनिष्ठता विमर्शकैः । किं च रसो वस्तुतः सामाजिकात्मरूपः, स चास्यात्मा शब्दार्थात्मनि स्थातुं न संभाव्यते, अतः किमिवास्य काव्यवृत्तित्वमाद्रियेत । व्यञ्जकत्वसम्बन्धेनेति चेत्, एवं हि दीपादिष्वपि घटादिवृत्तित्वमभ्युपेतं स्यात् । न चैतत् सत्तात्रितयेनापि स्पृष्टम् । ततो येयं विभावादियोजना काव्ये नाट्ये चोपनिबध्यते तस्या एवौपचारिकं रसत्वमुरीक्रियेत । तस्याश्च विभावादियोजनायाः स्वभावोक्त्यव्यभिचारेण स्वभावोक्तिरूपतैव स्वीक्रियेत, ततो रसोक्तेरप्यत्र नास्ति पृथगाम्नानस्यावश्यकता । सेयमापन्ना रसस्याप्यलङ्कारता ।

इयमेव सहृदयावर्जनक्षमता काव्यनाट्ययोः सौन्दर्यपदेनोच्यते । अस्याश्चोद्भूततमं रूपमुपमारूपकोत्प्रेक्षादिषु दृश्यते, अतो भामहादिभिस्तेषामेव प्रतिपादनं प्रायेण कृतम् । नास्त्येषां रसादिष्वन्येषु धर्मेषु विमानना काचित् । सम्मुग्धिम्ना कवलितारचेमेऽपि सुव्यक्तं किञ्चिदुदीरयितुमशक्नुवाना सौन्दर्यस्यैव हेतुभूतान् तत्त्वविशेषान् यथाकथञ्चित् परामृशन्तो दृश्यन्ते । अयमत्र विशेषो यदिमे काव्यशरीरनिष्ठानेव धर्मान् बहुलं प्रपञ्चयन्ति । अतएवैषां रसादिविषयेऽपि स्थिरो बहुमानः परवर्त्तिभिरागूरितः । पण्डितराजो रसगङ्गाधरे पर्यायोक्तालङ्कारप्रकरणे स्पष्टमुल्लिखति—

> **'ध्वनिकारात् प्राचीनैर्भामहोद्भटप्रभृतिभिः स्वग्रन्थेषु कुत्रापि ध्वनिगुणीभूतव्यङ्ग्यादिशब्दा न प्रयुक्ताः इत्येतावतैव तैर्ध्वन्यादयो न स्वीक्रियन्त इत्याधुनिकानां वाचोयुक्तिरयुक्तैव । यतः समासोक्तिव्याजस्तुत्यप्रस्तुतप्रशंसाद्यलङ्कारनिरूपणे कियन्तोऽपि गुणीभूतव्यङ्ग्यभेदास्तैरपि निरूपिताः। अपरश्च सर्वोऽपि व्यङ्ग्यप्रपञ्चः पर्यायोक्तकुक्षौ निक्षिप्तः । न ह्यनुभवसिद्धोऽर्थो बालेनाप्यपह्नोतुं शक्यते । ध्वन्यादिशब्दैः परं व्यवहारो न कृतः । न ह्येतावतानङ्गीकारो भवति ।'** (पृ. ५५५–६ नि. सा. सं)

अत एव च वामनस्यालङ्कारपरिभाषा महामाहेश्वरैरानन्दवर्धनाभिनवगुप्तैरपि नावधीरयितुं शक्या। स हि

> **'काव्यं ग्राह्यम् अलङ्कारात्** (१।१।१ काव्यालङ्कारसूम्)
> **सौन्दर्यम् अलङ्कारः'** (१।१।२ ")

---

५२. स्वभावोक्तिलक्षणं व्यक्तिविवेककृता—'…वस्तुनस्तावद् द्वैरूप्यमिह विद्यते ।
तत्रैकमस्य सामान्यं यद्विकल्पैकगोचरः ।
स एव सर्वशब्दानां विषयः परिवर्तितः ।
विशिष्टमस्य यद् रूपं तत्प्रत्यक्षस्य गोचरः।
स एव सत्कविगिरां गोचरः प्रतिभाभुवाम् ।
अर्थस्वभावस्योक्तिर्या सालङ्कारतया मता ।
यतः साक्षादिवाभान्ति तत्रार्थाः प्रतिभार्पिताः ।।—इति
(चौ.सं. पृ. ३९०) यत् कृतं ततो वक्रोक्तिजीवितकृतस्तस्यास्तिरस्कारोऽवधीर्यते। अतएव 'नवोर्थो जातिरग्राम्या' इत्यादिषु जातिनाम्ना स्वभावोक्तिरूप एवालङ्कारः सुकविभिरप्यादृतः ।

इत्येवं तत्त्वमिदं विशदया धिया स्फीतं विवेचयति । आनन्दवर्धनोऽपि[५३] शोभाचारुत्वादिपदैस्तदिदं मतं तथैवाद्रियते । अभिनवगुप्तोऽपि[५४] च तमनुसरति । मम्मटोऽपि[५५] च सौन्दर्यतत्त्वमिदं नोत्पाटयति। असौ च सौन्दर्यरूपो धर्मो यादृशोऽत्रास्माभिर्व्याक्तितस्तादृक्तया कं वा काव्यधर्मविशेषं स्प्रष्टुं नार्हति। रसोऽपि हि सौन्दर्यतयाऽभिमत एव प्राचाम् । व्यक्तिविवेके महिमाचार्यः —

'सौन्दर्यातिरेकनिष्पत्तयेऽर्थस्य काव्यक्रियारम्भः कवेः, न त्वलङ्कार–(उपमादि) निष्पत्तये, तेषां नान्तरीयकतयैव निष्पत्तिसिद्धेः, भङ्गीभणितिभेदानामेवालङ्कारत्वोपगमात्'[५६] इति प्रतिपाद्यामुमेवार्थं

'न चालङ्कारनिष्पत्त्यै रसवन्धोद्यतः कविः ।
यतते ते हि तत्सिद्धिनान्तरीयकसिद्धयः ।।'[५६]

इत्यनया कारिकया सङ्गृह्णाति । अत्र हि सौन्दर्यस्यैव कृते कारिकायां रसशब्दः प्रयुज्यत इति स्पष्टमेव ।

तदित्थं भरतेन प्रयुक्तोऽलङ्कारशब्दः सामान्यार्थवाचकतयैव स्थिरः सर्वानपि काव्यधर्मानभिव्याप्तुं क्षमते । अस्यैवार्थस्य सूचनं भरतस्यैव-

'यदा समुदिताः सर्व एकीभूता भवन्ति हि ।
अलङ्कारः स तु तदा मन्तव्यो नाट्यसंश्रयः ।।' (ना. शा. २७।१३)

इत्यनया कारिकया कैश्चित्[५७] स्वीक्रियते । ततो यन्नाम षोडशाध्याये लक्षणगुणालङ्काराणां विवेचनं लभ्यते तद् वस्तुतो भरतशिष्यस्य कस्यचित् परिशेषणम् । तत्र लक्षणानामेव लक्षणानि भरतोक्तानि मन्तव्यानि । अतएव तयोः पार्थक्येन विवेचनं परवर्त्तिभिराचार्यैर्न कृतम् । यैरपि कृतं तैरप्येषामलङ्कारत्वाविशेषो न विखण्डितः । भावाध्यायेऽपि योऽयं 'रसः काव्यार्थः' इति ग्रन्थो दृश्यते तत्रापि क्षेपकत्वमुन्नीयतेऽस्माभिः । यद्यप्यसौ भागो महिमभट्टाभिनवगुप्तकालपर्यन्तं भरतनाम्नैव प्रसिद्धिमीयिवान् दृश्यते । एवमेव भागान्तराण्यपि नाट्यशास्त्रेऽस्मिन् मूलग्रन्थस्य व्याख्यानात्मकानि परवर्त्तिभिर्विनेयैः संकलितानि भवन्ति । तेषां विचारः पृथक् कदाचित् करिष्यते।

ततश्च भरतोक्तोऽलङ्कारपदार्थोऽपि परवर्त्तिभिरुन्नीतेन साहित्यपदार्थेनानर्थान्तरत्वमश्नुते। एवमन्यैरपि ये रीतयो, वृत्तयो, गुणाश्च प्रवर्त्तितास्तेषामपि शब्दार्थान्यतरधर्मतया कर्तृत्वेन पोषकत्वेन वा शोभां प्रति हेतुत्वस्याविच्छेदात् साहित्यतयाऽभ्युपगतिर्न दुष्करा, कामं तत्र साहित्यमिति पदं प्रयुक्तं मा भूत् ।

---

५३. पूर्वं ६८ पृष्ठे उद्धृतम्.

५४. ,, ,,

५५. ३४१ पृष्ठे चौ. संस्करणस्य.

५६. ३४२ पृष्ठे चौ. संस्करणस्य.

५७. गणेशत्र्यम्बकदेशपाण्डेयमहोदयैः स्वकीये भारतीयसाहित्यशास्त्रे कारिकेयमेवमेव पठितास्ति तस्याः सन्दर्भोऽपि तेन '२७।९२' इत्थं दर्शितः । बडौदासंस्करणीये नाट्यशास्त्रे कारिकाया उत्तरार्धे 'अलङ्काराः सकुतपा मन्तव्या नाट्यसंश्रयाः' इति पाठो लभ्यते। सन्दर्भश्च '२७।१०३' इति । वस्तुतोऽयमेव बडौदासंस्करणीयः पाठो मूलभूतः पाठः स्यात् ।

इदमत्रान्यदुपक्षिप्यते यत् साहित्यनाम्ना येयं कुन्तकभोजमङ्खानां विचारत्रयी लभ्यते तत्र वस्तुतः कुन्तकस्यैव विचारा विचारसहाः, चालनीन्यायेन साहित्यतया दोषाभावरसगुणालङ्काराणामेव वाङ्मयान्तरव्यतिरेकेण काव्यैकवृत्तितायाः संभवात्। यच्च मङ्खेन साहित्यस्य वाङ्मयान्तरसाधारणं सम्बन्धमात्रत्वमुरीकृत्य तत्परिष्कारत्वेनोक्ताश्चत्वारोऽपि धर्माः प्रतिपादितास्तत्रापीयमेवारुचिर्मन्ये मूलम्। अतएवोक्तक्रमेणात्मनः[५८] परवर्तिनि सन्दर्भे व्यक्तिविवेकव्याख्यानाभिख्ये प्रागुक्तरीत्या[५९] कुन्तकमतमेवैतेन सिद्धान्ततयोद्धृतम्, न तु स्वकीयम्। यच्च काव्यनाट्ययोर्द्वयोरेव धर्मयोः साहित्यत्वेनाभिमतत्वम् तत्रापि प्रयोगरूपेणाभिनयेनैव भिन्नतामादधति नाट्येऽङ्गान्तराणां काव्यसाधारण्यस्य सर्वाभिमतत्वे नाभ्युदेति काचनानुपपत्तिः।

धर्मितया च काव्यनाट्यतच्छास्त्राणां यत् साहित्यमुपगतं तदपि मुकुलभट्टतोऽद्य यावत् साहित्यपदस्य तादृशव्यवहारान्नानुपपन्नम्।

अयमत्रापरः प्रश्नो यद् यदिदं कुन्तकेन वाच्यस्य वाच्यान्तरेण वाचकस्य च वाचकान्तरेण साहित्यमुपगतम्, प्रत्यादिष्टं च वाच्यस्य वाचकेन वाचकस्य वा वाच्येन, यच्च तदन्यैः पर एव पक्ष उपादायि तत्र किं नु खलु मान्यमिति। वस्तुतः पर एव पक्षोऽत्र मान्यः अत्र च हेतुः कुन्तकोपपत्तेरसाधुत्वम्, सुजनसंप्रदायाननुरोधश्च। तथाहि वाचकस्य वाचकान्तरेणेत्यादिपक्षमुपस्थापयता कुन्तकेन पक्षान्तरप्रत्याख्याने द्वावेव हेतू दर्शितौ—(१) प्रयोजनाभावः (२) असमन्वयश्चेति—

'ननु वाचकस्य वाच्यान्तरेण, वाच्यस्य वाचकान्तरेण कथं न साहित्यम्' इति चेत्, तन्न, क्रमव्युत्क्रमे प्रयोजनाभावादसमन्वयाच्च'।। इति।

तत्र योऽयं प्रयोजनाभावरूपः प्रथमो हेतुः 'प्रथमेनैव पक्षेण कार्ये सिद्धे किं द्वितीयेने'तिरूपः प्रतीयते। कार्यसिद्धिश्चात्र वाङ्मयान्तरव्यतिरेकः काव्यशब्दार्थयोः। अत्र नेदमसत्यं यत् 'प्रथममरुणच्छायस्तावत्ततः कनकप्रभः' इत्यादिषु—

'उन्नीलल्लीलनीलोत्पलदलदलनामोदमेदस्विपूर-
क्रोडक्रीडद्द्विजालीगरुदुदितमरुत्स्फालवाचालवीचिः।
एतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमाली-
व्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तडागः[६१] ।।—

इत्यादिषु च शब्दार्थयोर्यथास्वं योजनेनैव काव्यस्य तदितरलोकव्यतिरेकः सिद्धः तथापि मृदङ्गमुरलीमार्जनातः, वीणाक्वणितात् स्तनयित्नुनिःस्वनाद् वा तत्र व्यतिरेकलाभायात्र शब्दानामर्थापेक्षिताऽकामेनापि मान्या। स्वीकरोति च कविरेवैतत् 'लौकिकानां हि साधूनामर्थं वागनुवर्तते'[६२] इति। एवमेव लौकिकेभ्योऽपि प्रमाणान्तरवेद्येभ्योऽर्थेभ्यः काव्यार्थव्यतिरेकाय तेषां शब्दैकवेद्यत्वमाश्रयणीयमेव। उच्यतेऽपि चैतत्—

५८. पूर्वोद्धृते—'काव्ये००सहितयोः शब्दार्थयोः प्रयोगः। 'साहित्यं च तुल्यकक्षत्वेनान्यूनानतिरिक्तत्वम्' इति ग्रन्थे

५९. ५८ टिप्पणी दर्शित—लक्षणाभिधानरूपया।

६०. वक्रोक्तिजीविते १।१७ वृत्तिः।

६१. नैषधे १२।१०१ पद्यम्।

६२. उत्तररामचरिते १।१०।

'शब्दप्रमाणवेद्योऽर्थ '[६३] इति। किं च सरसे काव्ये येयं परुषमधुरादिरनुप्रासवृत्तिराद्रियते सापि रसाव्यभिचारिणां गुणानामेवाभिव्यञ्जनाय। अतएव ध्वनिकृताऽपि तृतीय उद्योते सङ्घटनाया गुणाश्रितत्वमेव सिद्धान्तितम्। अतएव च 'अनु = रसाद्यनुगुणः, प्र = प्रकृष्टः, आसः = न्यासः' इति व्युत्पत्त्या अनुप्रासस्यानुप्रासता[६४] काव्यप्रकाशकृताभिमता, तद्वैपरीत्येन च अकुण्ठोत्कण्ठयेत्यादौ प्रतिकूलवर्णता[६५]। ततश्च स्थितं शब्दसन्निवेशस्यापि काव्येऽर्थमुखापेक्षितैव। न चैवं नीरसेषु स्वच्छन्दोच्छलदच्छकच्छेत्यादिषु चित्रकाव्येषु स्थितायाः शब्दच्छटायाः, सरसेष्वपि वा 'कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकम्' इत्यादिषु निरनुप्रासेषु काव्येषु किमुक्तं स्यादिति वाच्यम्, सा हि कवेरशक्तिः[६६] अतएव तत्काव्यस्य चित्रत्वं निरनुप्रासत्वं वा मन्यते। अत्रोत्कटैकशब्दकोटिकतयाऽर्थानुरोधः काव्ये न्यक्कृत एव। अतएव च कुन्तकोऽपि—

> **शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।**
> **अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः[६७]॥**

इति स्वयमप्यर्थानुरोधं शब्दानां व्याजह्रे, अर्थानां च सौन्दर्यानुभूतावन्तरङ्गत्वम्।

यश्चायमपरः 'असमन्वय'रूपो हेतुः तत्र पुरोद्धृतया माणिक्यचन्द्रोक्त्या 'मुखे शब्दमुपलभामहे भूमौ चार्थम्' इति विप्रतिपत्तिमेव मूलमुन्नीयेत। अन्यदपि चाऽत्र शब्दार्थयोः क्षणप्रध्वंसवादः, त्रैकालिकाभाववादः, इत्यादिकमङ्गीकर्तुं सुशकम्। एतदपि च नासत्यम्। अथापि शब्दादर्थक्रियानिष्पत्तिमनुभवसाक्षिकामनुरुन्धानैस्तयोः सम्बन्धोऽवश्यमभ्युपेयः। स चाभिधादिरूपः स्वीकृत एव। न चासावन्वयः केवलः, अपितु समन्वयः साहित्यरूपः, लक्षणाव्यञ्जनारूपाभ्यामतिरिक्ताभ्यां व्यापाराभ्यां तस्यापि तद्रूपताया अक्षुण्णत्वात्। अतएव—

> **अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः।**
> **वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ॥ (१।२)**
> **प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्**
> **यत्तत् प्रसिद्धाऽवयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥ (१।४)**
> **सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम्।**
> **अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥ (१।६)**
> **प्रतीयमानच्छायैषा भूषा लज्जेव योषिताम्। (३।३७)**

---

६३. काव्यप्रकाशे ३।३ कारिका.

६४. वर्णसाम्यमनुप्रास इति १०४ सूत्रस्य वृत्तौ (९ उल्लासे)

६५. रसानुगुणत्वं वर्णानां वक्ष्यते (९ उल्लासे) तद्विपरीतं प्रतिकूलवर्णम्। यथा शृङ्गारे--

> अकुण्ठोत्कण्ठया तूर्णमाकण्ठं कलकण्ठि! माम्।
> कम्बुकण्ठि! क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर॥ इति (७ उल्लासेऽर्थदोषेषु)

६६. रसगङ्गाधरे रौद्ररसोदाहरणे 'कृतमनुमतमित्यत्र रौद्ररसव्यञ्जनक्षमा नास्ति वृत्तिः अतस्तत्कवेरशक्तिरेव' इति पंडितराजोऽपि।

६७. पूर्वमुद्धृतम्।

इति महता प्रबन्धेन ध्वनिकृद्भिर्व्यापान्तरप्रतिपाद्य एवार्थे महतां संरम्भं प्रतिपाद्य 'काव्यस्यात्मा स एवार्थः' (१।५) इति स एवार्थः काव्यात्मतया स्थापितः। स्वयं कुन्तकोऽपि चामुमर्थं स्वालङ्कारे प्रथमोन्मेष एवाभिजात्यवर्णनावसरे प्रसङ्गेनानन्दवर्धनस्य 'प्रतीयमानमि'त्यादि पद्ये "न पुनः सकललोकलोचनसंवेद्यस्य ललनालावण्यस्य सहृदयहृदयानामेव संवेद्यं प्रतीयमानं समीकर्तुं पार्यते' इति विप्रतिपाद्य 'विभाति सौभाग्यमिवाङ्गनासु' इति योजनया लावण्यपदे सौभाग्यमभिप्रेक्ष्य 'प्रतीयमानं पुनः काव्यपरमार्थज्ञानामेवानुभवगोचरतां प्रतिपद्यते, यथा कामिनीनां किमपि सौभाग्यं तदुपभोगोचितानां नायकानामेव संवेद्यतामर्हति'–इत्येवं समर्थयते।

संप्रदायविरोधश्चात्र महाकविपरम्परामनुपेक्षमाणो यः कोऽपि समुन्नेतुं क्षमः। कालिदासो वागर्थयोर्दाम्पत्यमुरीकरोत्येव, यावदन्येऽपि

'सव्यं वपुः शब्दमयं पुरारेरर्थात्मकं दक्षिणमामनन्ति।
अङ्गं जगन्मङ्गलमैश्वरं तदर्हन्तिकाव्यं कथमल्पपुण्याः॥' (शिवलीलार्णवे १।१५)

इत्येवमेतदुरीकृत्यैव क्रमन्ते। साहित्यमीमांसाकारः पुनः–

निदानं जगतां वन्दे वस्तुनी वाच्यवाचके।
ययोः साहित्यवैचित्र्यात् सतां रसविभूतयः॥

इति मङ्गलात्मना ग्रन्थारम्भ एवामुमभिप्रायमार्षेणेव सौष्ठवेनाबध्नाति।

किं च काव्यस्य शिवरूपता कलाविद्भिरिवालङ्कारिकैरप्युपेता। काव्यप्रकाशादिशब्देषु तेषां 'काव्यं काव्यो वा शिवः, तस्य प्रकाशः परामर्शकला' इत्येवम्विधानि व्याख्यानानि दृश्यन्ते[६८]। नीलकण्ठदीक्षितस्य 'सव्यं वपुरित्यनुपदोद्धृते पद्ये काव्यस्य शिवता मुखरतयोच्यत एव, लोचनान्ते श्रीमदभिनवगुप्ताचार्या अपि–

'वस्तुतः शिवमये हृदि स्फुटं सर्वतः शिवमयं विराजते।
नाशिवं क्वचन कस्यचिद्वचस्तेन वः शिवमयी दशा भवेत्॥

इति स्फुटं काव्यस्य शिवप्रतिष्ठां संकेतयन्ते। एवमेव

समस्तगुणसम्पदः सममलङ्क्रियाणां गणैः
भवन्ति यदि भूषणं तव तथापि नो शोभसे।
शिवं हृदयवल्लभं यदि यथा तथा रञ्जये-
स्तदेव ननु वाणि! ते भवति सर्वलोकोत्तरम्॥[६९] इति–

स्थायी प्रबुद्धहृदये व्यभिचारिभूतः कामाकुलासु जनतासु महानुभावः।
अन्तर्विभावविषयो रसमात्रमूर्तिः श्रीमान् प्रसन्नहृदयोऽस्तु मम त्रिणेत्रः॥[७०]

---

६८. सरस्वतीसुषमायाः प्रथमेऽवर्षीये प्रथमेऽङ्के 'दर्शनेषु साहित्यस्य स्थानम्' इति नाम्नः पद्मभूषण पण्डितराजराजेश्वरशास्त्रिद्रविडलेखस्यान्ते भावोऽयमुदीरितो लभ्यते।

६९. ध्वन्यालोकस्य २।५ कारिकाया रसालङ्कारलोचनेऽभिनवगुप्तस्यव।

७०. अभिनवभारत्यां सप्तमाध्यायमङ्गलम्।

इति च साहित्यस्य मूलभूतं रहस्यबीजमसावुन्मीलयति। न केवलं कविकर्मणो फलभूतस्य काव्यस्य यावत् प्रतिभाया अपि शिवात्वमेतैरङ्गीकृतम्–

यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्।
स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्[७१] ॥ इति

तन्त्रान्तरेष्वपि परापश्यन्तीमध्यमावैखरीरूपतया वाण्याः शिवरूपत्वमभ्युपगतमेव। नादनाम्नी काचन कलापि नूनं परमेश्वरस्य शब्दरूपैव। तदित्थं काव्यरहस्यमुपजीव्यापि कुन्तकमतमभ्युपेतुं न शक्यते। किं च नानार्थशब्दप्रयोगस्थलेऽर्थानां शब्दमुखापेक्षिता शब्दानाञ्चार्थाश्रितता किमिवान्यथा योजयितुं शक्येत? अतएव च ध्वनिकारिकेयं–

वाच्यानां वाचकानां च यदौचित्येन योजनम्।
रसादिविषयेणैतत् कर्म मुख्यं महाकवेः॥ (३।३२)

अत्र निजमौदार्यं विवृणोति।

एवमिह प्रथमपक्षस्य द्वितीयपक्षाविनाभावित्वाद्, द्वितीये च पक्षे प्रथमपक्षस्यान्तर्भावाद् उदारतमः सम्प्रदायरहस्यदक्षिणो द्वितीय एव वाच्यवाचकयोरन्योन्यसाहित्यात्मा स्वीकर्तुं युज्यते।

साहित्यस्य निष्कृष्टं लक्षणं चेत्थमिव किञ्चिन्निष्पद्यते–

'शब्दार्थयोरन्योन्यं गुणालङ्कारादिभिश्च परस्परस्पर्धितया यत् साम्यसुभगमवस्थानं तत्, तद्युक्तं च साहित्यमिति।'

अत्र शब्दार्थान्यतरप्रतियोगिकस्तदन्यतरानुयोगिकः, तदुभयानुयोगिको गुणालङ्कारादिप्रतियोगिकश्चेत्युभयविधोऽपि सम्बन्धः, तत्र च सम्बद्धानां समभावेन साहचर्येण च स्थितिप्रत्यययोः समन्वयश्चेति सर्वं साहित्यं सम्पद्यते। तदत्र—

'रेवाप्रसादेन मयाऽल्पबुद्ध्या साहित्यतत्त्वस्य यथाप्रमाणम्।
सोऽयं कणेहत्य कृतो विमर्शो मेधाञ्चितानां शिवतातये स्तात्॥'

---

७१. लोचने प्रथमोद्योतान्तमङ्गलम्।

पाणिनीयोपसर्गगतिः

श्रीकृष्णशास्त्री कानिटकरः

वाङ्मये पदानि कतिविधानि भवन्तीत्यत्र विप्रतिपद्यन्ते विविधाः सूरयः चिरन्तनसमयात्। यथोक्तं भर्तृहरिणा—

" द्विधा केचित् पदं भिन्नं, चतुर्धा, पंचधाऽपि वा " (वाक्य० ३।१)

केचित् नामाख्याते इति द्विविधं पदमिति वदन्ति। अपरे उपसर्गनिपातयोः उक्तद्वाभ्यां सह सङ्कलने पदानि चतुर्धा भवन्ति इत्याचक्षते। अन्ये पुनः कर्मप्रवचनीयानां पृथक् सत्तामङ्गीकृत्य नामानि, आख्यातानि, उपसर्गाः, निपाताः, कर्मप्रवचनीयाश्चेति पञ्च पदजातानि उदाहरन्ति।

वार्ताक्षौदुम्बरायणौ आचार्यौ उल्लिख्य नामाख्याते इति द्वे पदे स्तः इति तयोर्मतं भर्तृहरिः वाक्यपदीये (२.३४७) निर्दिशति। सुप्तिङन्तं पदम् (अष्टा. १।४।१४) इति सूत्रे सूत्रकारः सुबन्तम् (देवदत्त इत्यादि)—नाम, तिङन्तम् (गच्छति इत्यादि)—आख्यातम् इति समस्तं पदजातम् द्विधैव विभजति। उपसर्गनिपातकर्मप्रवचनीयानामपि प्रातिपदिकत्वेन सुबन्तत्वात् ते सुबन्ते एव अन्तर्भवन्ति इति मन्यते पाणिनिः। लाघवात् तत्त्वतश्चैष विभागः न्याय्य एव अतः नात्र कस्यापि विमतिः, सुबन्त तिङन्तयोरेव समस्त वाङ्मयस्य सुतराम् समावेशात्।

संस्कृतवाङ्मये प्राचीनतमः पदविभागस्तु "चत्वारि वाक्परिमिता पदानि" (१।१६४।४५ ऋग्वेदः) इति, "चत्वारि शृङ्गा" (ऋग्. ४।५८।३) इति च ऋग्वेदमन्त्रयोः दृश्यते इति पस्पशानामके महाभाष्यस्य प्रथमाह्निके पतञ्जलिकृततद्व्याख्यानुसारेण उपलभ्यते। तत्र हि चत्वारि वाक्परिमिता पदानि=चत्वारि पदजातानि "नामाख्यातोपसर्गनिपाताश्च" तथा शृङ्गाणि=चत्वारि पदजातानि "नामाख्यातोपसर्गनिपाताश्चेति" पूर्वोक्तयोः मन्त्रयोः विवरणावसरे भाष्यकारः सुस्फुटं व्याख्यात् द्विवारम्।

निरुक्तकारो यास्कोऽपि तयोरेव द्वयोर्मन्त्रयोः व्याख्यावसरे "नामाख्यातोपसर्गनिपाताश्चेति वैय्याकरणाः" (१३.९) इति प्राचीनवैय्याकरणमतम् आविष्करोति। निरुक्तग्रन्थस्य उपोद्घाते एव "तद्-यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति" (१.१.१) इति एतानि चत्वार्येव पदसामान्यानि सन्त्यस्मिन्निघण्टुशास्त्रे इति प्रतिजानीते यास्कः।
ऋग्वेदप्रातिशाख्ये शौनकोऽपि—

" **नामाख्यातमुपसर्गोनिपातश्चत्वार्याहुः पदजातानि शाब्दाः** " (१२.१७)

इति चतुरः पदगणान् निर्दिशति। अत्र "शाब्दाः–शब्दविद आहुः" इति उवटभाष्ये।

इत्थमेव शुक्लयजुःप्रातिशाख्ये (८।४७) कात्यायनीये, अथर्वप्रातिशाख्ये (१।१), अमरेशस्य वर्णरत्नदीपिकाशिक्षायाम् (पृ. २३६) प्रातिशाख्यप्रदीपशिखायाम् (पृ. २७०) कौटिल्यस्यार्थशास्त्रे (२।१०) सर्वदर्शनसंग्रहे (पृ. १४०) वेङ्कटमाधवस्य ऋग्भाष्ये (अष्टकम् २।१) सायणस्य ऋगुपोद्घाते (पृ. २१) च शब्दानां चतुर्विधत्वं निर्दिष्टम्।

एषोऽत्र निष्कर्षः—स्त्रीपुंनपुंसकप्रविभागेन श्रीकृष्णज्ञानादिनानासुबन्तपदगता, स्वार्थद्रव्य-लिङ्गसंख्याकारकार्थप्रतिपादिका "नामजातिः" स्वतन्त्रा एका अवश्यमेव स्वीकर्तव्या। कर्तृभावकर्म-प्रविभागेन पचति, भूयते, पच्यते इत्यादिनानातिङन्तपदेषु व्याप्ता, क्रियाकालकारकसंख्यार्थ-प्रातिपादिका "आख्यातजातिः" पृथगङ्गीकरणीयैव। एतयोः नामाख्यातयोः अस्ति स्वतन्त्रो वाच्यार्थः, वाक्ये च परस्परं निरपेक्षः सापेक्षश्च भवति एनयोः प्रयोगः, अतः स्वभावत एव तयोः सर्वत्र वाक्येषु स्वातन्त्र्यं प्राधान्यं चाश्रीयते। वाक्येषु नामाख्यातयोः विद्यमानयोरपि क्रियायाः अर्थविशेषद्योतकाः प्रादयः उपसर्गाः, नाम्नः क्रियायाश्च अर्थवैलक्षण्यद्योतकाश्चादयो निपाताः अर्थपूर्त्यर्थं परमावश्यकाः सन्ति इति व्यावहारिकबुद्धिमाश्रित्य उपसर्गनिपातानां नामाख्यातयोः पृथक् संख्यानमस्ति परमसारवत्। अतएव नामाख्यातोपसर्गनिपाताश्चेति चतुर्विधा शब्दानां वर्णनं बहुसम्मतम् आपामारजनानुभूत्यनुसारेण सामञ्जस्यमर्हत्येव। एतदेव उद्दिश्य महाभाष्यप्रदीप-व्याख्याने उद्योते—"नामशब्देन सुबन्तम् नमत्याख्यातार्थं प्रति विशेषणीभवति" इति व्युत्पत्तेः। आख्यातम् तिङन्तम्। उपसर्गनिपातयोः पृथगुपादानं गोबलीवर्दन्यायेन[1] "त्युद्बोधितं नागेशभट्टेन।

तत्र वाक्येषु बहूपकुर्वतां क्रियाविशेषकाणामेतेषाम् उपसर्गाणां संस्कृतवाङ्मये विभिन्नार्थेषु प्रवृत्तिं प्रदर्श्य पाणिनीयशास्त्रे तेषां कीदृशी गतिरिति ससंक्षेपमत्र विवेचनीयम्।

तत्र (१) उपसर्गशब्दस्य प्रवृत्तिः (२) उपसर्गशब्दव्युत्पत्तिः (३) उपसर्गाणां संख्या (४) उपसर्गाणामर्थाः (५) उपसर्गाणां द्योतकत्वम् (६) उपसर्गाणां धातोः प्रागेव प्रयोगः लौकिक-साहित्ये, वेदे तु परत्रापिव्यवहितेऽपि च (७) उपसर्गस्य त्रिधा चतुर्धा वा गतिः (८) एकतः पञ्चाना-मुपसर्गाणाम् एकदा प्रयोगः (९) उपसर्गपदघटितानां पाणिनिसूत्राणाम् अर्थोदाहरणसहिता सूची (१०) अनुपसर्गपदघटितानां पाणिनिसूत्राणाम् अर्थोदाहरणसहिता सूची (११) प्रत्येकं प्रपराद्युपसर्ग-घटितानां पाणिनिसूत्राणां संक्षिप्तार्थोदाहरणसहिता सूची इत्येते विषयाः यथायथम् उपनिबध्यन्ते।

(१) सर्वतः प्रथममुपसर्गशब्दः ऐतरेयब्राह्मणे—

"महानाम्नीनामुपसर्गानुपसृजति" (अ. १६, खं. ४) इत्यत्र उपलभ्यते। अत्राह व्याख्याकारः सायणः "विदामघवन्नित्यस्मिन्ननुवाके प्रोक्ता ऋचो महानाम्न्यः तासां सम्बन्धिनः उपसर्गाः पञ्चविधाः। तेचाश्वलायनेन दर्शिताः (१) प्रचेतन (२) प्रचेतया (३) आयाहि पिबमत्स्व (४) क्रतुश्छन्द ऋतं बृहत् (५) सुम्न आधेहि नो वसो इति पश्चम उपसर्गः"। अत्रोपसर्गशब्दस्य "तदेतत्संयोजनमत्रोपसृजतिशब्दे विधीयते" (तत्रैव सायणः) इत्यनु-सारेण संयोजनम्, आधिक्यकरणम् (addition) इत्यर्थो बोध्यते। दर्शनीयमत्र यत् पञ्चसु

---

(१) सामान्येन विधानं कृत्वा, तत्रैव केषाञ्चित् वैशिष्ट्यदर्शनार्थं पृथग् विधानं क्रियतेऽस्मिन्न्याये। यथा–गाः (पशून्) आनय, बलीवर्दानपि आनयेति।

प्रचेतनादिपूर्वोक्तेषूपसर्गेषु—प्रथमे द्वितीये च "प्र" इति, तृतीये-पञ्चमे च "आ" इति दैववशात् उपसर्गौ द्वौ समागतौ इति।

आयुर्वेदे–उपसर्गाः उपद्रवरोगकृताः सुश्रुते कथिताः—

राजीमद्वा चन्द्रकैः सन्ततं वा पूयप्रख्यं कर्द्दभाभं तथोष्णम्।
हन्यादेतद्यत्प्रतीपं भवेच्च "क्षीणं हन्युश्चोपसर्गाः प्रभूताः॥"

(उत्तरतन्त्रे अ. ४०, श्लो. २०)

"उपसर्गाः उपद्रवाः, ते च तन्त्रान्तरे पठिताः ज्वरशोफादयः। एते उपद्रवाः क्षीणम् अतीसारिणं हन्युरिति योजनीयम्" इति तट्टीकायाम्।

योगशास्त्रे उपसर्गशब्दस्य विघ्न इत्यर्थ। यथा—"ते समाधा उपसर्गा व्युत्थाने सिद्धयः" (योगसूत्रे ३. ३९)

धर्मशास्त्रे–दिव्य, नाभस, भूमिजभेदेन त्रिविधः उत्पातरूपः उपसर्गः रुढ एव।

मार्कण्डेयपुराणे—"उपसर्गानशेषांस्तु महामारीसमुद्भवान्" (९२. ७) इति श्लोके उपसर्गस्य उपप्लवोऽर्थः।

(२) उपसर्गशब्दः (उप + सृज् + घञ्) उप-इत्युपसर्गपूर्वकात् तुदादिगणस्थात् सृज्धातोः (३।३।१८, ३।३।१९) घञि, कुत्वेन जकारस्य गकारे, गुणे, रपरत्वे च निष्पन्नः। तस्य च उपसर्जनम् – उपसर्गः, उपसृज्यते इति उपसर्गः इति वा व्युत्पत्तिः। "ते प्राग् धातोः" (१।४।८०) इति पाणिनिसूत्रेण भाषायां सर्वत्र क्रियावाचकाद् धातोः पूर्वमेव उपसर्गस्य प्रयोगः अनुशिष्यते। ततश्च निपातस्य प्रादेः–उपसर्जनम्=संयोजनम्, मेलनं वा क्रियावाचकात् प्राग्भवति उतवा सः क्रियावाचकात् पूर्वम् उपसृज्यते=संयोज्यते (यथा प्रभवति इत्यादौ) अतः उपसर्ग इत्युच्यते। एवं च वस्तुतः प्रादयः (१।४।५८) इति सूत्रेण निपातसंज्ञकानामपि प्रपरादीनां यदा धातुभिः सह पूर्वं संयोगो भवति तदैव ते "उपसर्गाः क्रियायोगे" (१।४।५९) इति सूत्रेण उपसर्गसंज्ञका भवन्ति इति अन्वर्था एव संज्ञा उपसर्ग इति पाणिनिना समाश्रीयते। तथा च सायणः—"प्रागुपसृजत आख्यातपदस्येत्युपसर्गः" (१।१६४।४५) ऋग्वेद मन्त्रे अभिदधाति। "पदान्तैरुपसृज्यन्ते इत्युपसर्गाः। व्याकरणे तु क्रियायोगमात्रनिमित्तेयं संज्ञोक्ता" इति वैदिकाभरणे प्रतिपादितम्।

उपसृजतीत्युपसर्गः इति "पुंसि संज्ञायां घः प्रायेण" (३।३।११८) इति कर्तरि प्रत्ययं स्वीकृत्यापि व्युत्पाद्यते उपसर्गशब्दः। यथाचोक्तं निरुक्ते (१।१।३) दुर्गाचार्यकृतभाष्ये—"उप –उपगृह्य आख्यातं, तस्यैवार्थविशेषं सृजन्तीत्युपसर्गाः" इति। तत्रैव निरुक्तस्य स्कन्दकृतभाष्ये– "उपेत्य, नामाख्यातयोरर्थस्य विशेषं सृजन्त्युत्पादयन्तीत्युपसर्गाः" इति प्रतिपादितम्। नाट्यशास्त्रे च

"प्रातिपदिकार्थयुक्तं धात्वर्थमुपसृजति ये स्वार्थैः।
उपसर्गा उपदिष्टास्तस्मात्संस्कारशास्त्रेऽस्मिन्॥"

(१४–२६ निर्णयसा०)

इत्यत्र ये नामार्थयुक्तं धात्वर्थमुपसृजन्ति = विशिंषन्ति ते उपसर्गाः उपदिष्टाः इत्यभिहितम्। हेमचन्द्रन्यास—"उपसृज्य धातुमर्थविशेषं सृजतीत्युपसर्गः" इति प्रोक्तम्।

एवंच ये निपाताः प्रादयः धातुमुपेत्य विविधान् अर्थान् सृजन्ति = द्योतयन्ति (गार्ग्यमते-उत्पादयन्ति) ते उपसर्गाः इति कर्तृवाच्यप्रत्ययाश्रयणे निर्गलितोर्थः उपसर्ग इत्यन्यर्थसंज्ञायाः।

पाणिनिशासने—उपसर्गाः क्रियायोगे (१।४।५९) इति सूत्रेण उपसर्गसंज्ञा विधीयते। निपातसंज्ञकाः प्रपरादयः क्रियायोगे = क्रियया अन्वये सति, उपसर्गसंज्ञका भवन्ति इति तस्यार्थः। तेन प्र + नमति इत्यत्र नम्धात्वर्थप्रह्वीभावरूपक्रियया अन्वये सति प्र इत्यस्य उपसर्ग-संज्ञायाम् "उपसर्गादसमासेऽपिणोपदेशस्य" (८।४।१४) इति णकारे प्रणमति इति णकारसहितं रूपं सिद्ध्यति।

अत्र लाघवात् "उपसर्गाः क्रियायाम्" इत्येवोक्तौ पूर्वोक्तार्थलाभे सति सूत्रे योगग्रहणम्-प्रत्यासत्तिन्यायेन प्रादयः यया क्रियया युक्ताः = अन्विताः भवन्ति तत्क्रियावाचकधातुमाश्रित्यैव तेषामुपसर्गसंज्ञा इत्यर्थं बोधयति। तेन प्रगताः नायकाः अस्माद् ग्रामात् सः "प्रनायकः" ग्रामः इत्यत्र प्र इत्यस्य उपसर्गत्वं गृहीत्वा नायक इति नकारस्य "उपसर्गाद्" (८।४।१४) इति णत्वं न भवति। अत्र प्र इत्यस्य गम्धातुनैव अन्वयात्, नायक इत्यस्य नीधातुना सह अन्वयाभावात् प्र इति उपसर्गः गम्धातुनिरूपितं उपसर्गत्वं गृहीत्वा नायकशब्दे नकारे णत्वं विधातुं सर्वथा असमर्थः इति भावः। एष एवार्थः "गतिश्च" (१।४।६०) इति सूत्रे "गत्युपसर्गसंज्ञाः क्रियायोगे यत्क्रियायुक्तास्तं प्रतीतिवचनम्" इति वार्तिकव्याख्यया वचनेन साधितो भाष्ये।

(३) विंशतिः उपसर्गा इति प्रायोवादः। तत्र यास्केन (१) आ-(विरुद्धार्थौ)— (२) प्र (३) परा। (४) अभि-(विरुद्धार्थः)—(५) प्रति। (६) अति (७) सु-(विरुद्धार्थौ)— (८) निर् (९) दुर्। (१०) नि (११) अव-(विरुद्धार्थः)—(१२) उद्। (१३) सम्- (विरुद्धार्थौ) (१४) वि (१५) अप। (१६) अनु (१७) अपि (१८) उप (१९) परि (२०) अधि इति केषुचिदुपसर्गेषु विरुद्धार्थप्रदर्शनानुरोधेन यथेष्टं क्रममाश्रित्य उपसर्गाणां विंशतिः कथिता।

ऋक्प्रातिशाख्ये शौनकेन विंशतेः उपसर्गाणां क्रमः ईदृशः प्रदर्शितः—

[१]प्र[२]अ[३]भ्या[४]परा [५]नि[६]दु[७]रनु[८]व्यु[९]पा[१०]प
[११]सं [१२]परि [१३]प्रति [१४]न्य[१५]त्य[१६]धि [१७]सू[१८]द[१९]वा[२०]पि
उपसर्गा विंशतिरर्थवाचकाः
सहेतराभ्याम् ॥ (पट. १२ सू. २०)

("इतराभ्याम्-नामाख्याताभ्यां सह विंशतिरुपसर्गा, अर्थवाचका = अर्थवाचिन" इति भाष्य-कृदुवटः) अस्मिन् प्रातिशाख्यसूत्रेऽपि छन्दोनुसारेण यथेप्सितमेव विंशतेः उपसर्गाणां क्रमोऽभि-लक्ष्यते।

तैत्तिरीय प्रातिशाख्ये—

"[१]आ [२]प्रा [३]वा [४]पो [५]पा [६]भ्य [७]धि [८]प्रति [९]परि [१०]वि [११]नित्युपसर्गाः" (१।१५)

इति सूत्रे एकादश एव उपसर्गाः उपदिष्टाः। "आप्रावोपाभ्यधि" इति तत्रैव पाठभेदे "अप" इत्यस्य त्यागाद् दश इत्येव उपसर्गाणां संख्या अवशिष्यते।

वाजसनेय प्रातिशाख्ये (६।२४)—परा, उप, अप, अव, प्रति, परि, अनु, अपि, अति, अधि, आङ्, प्र, सम्, निर्, दुर्, उप, नि, वि, सु, अभि इति विंशतिः संख्या प्रदर्शिता। (६।२४)

बृहद्देवतायां शौनकः—"उपसर्गास्तु विज्ञेया क्रियायोगेन विंशतिः" इति उपसर्गाणां विंशतिमेव संख्याति। तत्रैव शौनकः

"अच्छश्रदन्तरित्येतानाचार्यः शाकटायनः
उपसर्गान् क्रियायोगान्मेने ते तु त्रयोधिकाः॥".

इत्युक्त्वा शाकटायनमते-अच्छ, श्रद्, अन्तर इति त्रीन् उपसर्गान् अधिकान् गृहीत्वा त्रयोविंशतिम् उपसर्गान् सूचयति।

प्रादयः (१।४।५८) इति पाणिनिसूत्रविषयके गणपाठे-(१) प्र (२) परा (३) अप (४) सम् (५) अनु (६) अव (७) निस् (८) निर् (९) दुस् (१०) दुर् (११) वि (१२) आङ् (१३) नि (१४) अधि (१५) अपि (१६) अति (१७) सु (१८) उद् (१९) अभि (२०) प्रति (२१) परि (२२) उप इति द्वाविंशतेः उपसर्गाणां सर्वमान्यः क्रमः उपलभ्यते। अत्र-निस् निर्, दुस्, दुर्-इत्यस्य स्थाने निस्, दुस्, निर्, दुर् इति पाठः शब्देन्दुशेखरकृत्संमतः। तदुक्तम् शेखरटीकायां पायगुण्डे-निर्मितायां चिदस्थिमालायाम् "निस्दुसिति" प्रतीकावसरे-"एतेन मूले एवमेव पाठः सूचितः, एकस्या आकृतेरितिन्यायात्। एतेनान्यथा पठन् दण्डी प्रत्युक्तः"।

सर्वविधानामुपसर्गप्रयुक्तकार्याणां कृते एतेषां द्वाविंशतेः उपसर्गाणां ग्रहणं सर्वत्र इति पाणिनिसम्मतमनुशासनम्।

उपसर्गाः क्रियायोगे (१।४।५९) इतिसूत्रस्थवार्तिकयोः भाष्ये च (१) मरुत् (२) श्रत् (३) अन्तर् इति त्रयाणां तदर्थे निर्दिष्टेषु विधिषु कर्तव्येषु सत्सु एव उपसर्गसंज्ञा विधीयते। तद्यथा-"मरुच्छब्दस्योपसंख्यानम्-मरुद्त्तो मरुत्तः। (अत्र मरुच्छब्दस्य उपसर्गसंज्ञाविधानसामर्थ्यात् अजन्तत्वाऽभावेऽपि दा इत्यस्य अचः स्थाने तादेशे, चर्त्वे च मरुत्तः इति प्रयोगः सिद्धयति)। श्रच्छब्दस्योपसंख्यानम् श्रद्धा। (अत्र श्रत् इत्यस्य उपसर्गसंज्ञायां, धाधातोः अङ्प्रत्ययः (३।३।१०६) सिद्धयति।)

"अन्तरपरिग्रहे" (१।४।६५) इति गतिसंज्ञाविधायके सूत्रे—"अन्तःशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानम्" इति वार्तिकम्। तत्र भाष्ये—अङ् (३।३।१०६) अन्तर्धा, किविधिः (३।३।९२)—अन्तर्धिः, समासः (२।२।१८) अन्तर्हत्य, णत्वम् (८।४।२२) अन्तर्हण्याद् गोभ्यो गाः" इति तद् व्याख्यातम्।

"आतश्चोपसर्गे" इति अङ् विधायके (३।३।१०६) सूत्रे काशिकावृत्तौ—"श्रदन्तरोपसर्गवद्वृत्तिः" इत्युक्तम्। तस्याप्युपर्युक्तमेव तात्पर्यम्।

इत्थं च कतिपयकार्याणि उद्दिश्य श्रदन्तरादीनामुपसर्गत्वेऽपि सर्वविधोपसर्गप्रयुक्तकार्याणां कृते पाणिनिशास्त्रे द्वाविंशतिः गणपाठनिर्दिष्टाः उपसर्गाः गृह्यन्ते। तथा चात्र-"अव्ययशब्दरूपावलिसंख्यारहस्यम्" इति मम पुस्तके कृतः उपसर्गसंग्रहः—

१ २ ३ ४ ५ ६ ७ ८
उपसर्गाः—प्र पराप, समन्वव च निस् च निर्।
९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२
दुस् दुर् व्याङ् न्यध्यप्यति सूद्-अभि प्रति च पर्युप ॥ इति।

(१) उपसर्गपाठे अष्टादशः "उद्" इत्युपसर्गः दकारान्तः। "उदश्चरः सकर्मकात्" (१।३।५३) "उदि कूले रुजिवहोः" (३।२।३१) "उदः स्थास्तम्भोः पूर्वस्य" (८।४।६१) इत्यादिसूत्रनिर्देशात्। तेन "उत्" इति तकारान्तपाठः लेखकप्रमादज एव इति ध्येयम्।

(२) "आ" इति निपातोऽस्ति द्विविधः, एकोऽस्ति उपसर्गसंज्ञकः निपातः आङ् इति। अत्र "ङ्" इत्यस्य अनुबन्धस्य हलन्त्यम् (१।३।३) इति इत्संज्ञायां "तस्यलोपः" (१।३।९) इति तस्य लोपः (अदर्शनम्) भवति। ततः आङ् इत्यस्य "आ" इत्येव रूपम् अवशिष्यते। अयमेवोच्यते ङित् = ङकारेत्संज्ञक इति। द्वितीयोऽस्ति निपातः आ इति। अत्र ङकारानुबन्धस्य अविद्यमानत्वात् अयम् अङित् इत्युच्यते। अयं केवलं (१) वाक्यद्योतकः (२) स्मरणद्योतकश्चास्ति। तत्र आद्योऽर्थः–"आ एवं नुमन्यसे" इत्यत्र (अब तू ऐसा क्यों मानता है) पूर्वमेवं नामंस्थाः सम्प्रति तु एवं मन्यसे इति पूर्वं प्रक्रान्तस्य वाक्यस्य अनभिमततत्वार्थद्योतकता प्रदर्श्यते आ इत्यनेन। द्वितीयोऽर्थः–"आ एवं किल तत्" (अरे, ऐसा है भला वह) इत्यत्र। कस्यचिद्वस्तुनः विशेषरूपेण स्मरणे प्रयुज्यते वाक्यमिदम्। अत्र आ इत्यस्य स्मरणद्योतकता। तदुक्तम् भाष्ये "निपात एकाजनाङ्" (१।१।१४) इति सूत्रे "ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः।

"ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः
एतमातं ङितं विद्याद्, वाक्यस्मरणयोरङित्" इति।

अस्य अङितः आकारस्य उपसर्ग संज्ञा न भवति। आङ् इति ङकारानुबन्धस्यापि आ+इहि=एहि इत्यादौ क्रियायोगे एवोपसर्गसंज्ञा भवति। आ+उष्णम् = ओष्णम् इत्यत्र क्रियायोगस्य अभावात् उपसर्गसंज्ञाऽभावे केवलं निपातसंज्ञक एवात्र "आ" इति। अस्य विविधार्थाः अनुपदमेव वक्ष्यन्ते। केचनार्थास्तु भाष्यकारिकायामेवाद्यचरणे निर्दिष्टाः।

(३) निस्–निर् इत्यनयोः, दुस्–दुर् इत्यनयोश्च अस्ति अर्थसाम्यं सर्वतोभावेन। परं प्रयोगमूलकस्यास्य व्याकरणशास्त्रस्य निर्वाहार्थं निस् इत्यपेक्षया निर् इति, दुस् इत्यपेक्षया दुर् इति च स्वतन्त्रौ एवोपसर्गौ अत्र सम्मतौ। तेन निस् इत्यस्य निरयते, दुसः–दुरयते, निरः–निलयते, दुरः च–दुलयते इति प्रयोगाः सिद्ध्यन्ति। अत्र केवलं निस्दुसोरेवाश्रयणे तयोः सकारस्य "ससजुषो रुः" (८।२।६२) इति रुत्वे, तस्य पूर्वत्रासिद्धम् (८।२।१) इत्यधिकारबलात्, उपसर्गस्यायतौ (८।१।१९) (अयतिपरस्य उपसर्गस्य यो रेफस्तस्य लत्वविधायक) सूत्रदृष्ट्या असिद्धत्वात् लकाराभावे निरयते–दुरयते इति रेफसहिते रूपे एव भविष्यतः, न पुनः निलयते–दुलयते इति लकारसहिते अपि रूपे। निर्दुरोः रेफान्तयोरपि स्वीकारे तु तयोः मूलत एव विद्यमानस्य रेफस्य "उपसर्गस्यायतौ" इति लत्वे निलयते–दुलयते इति लकारसहितं रूपद्वयम् अपि सिद्ध्यति। अतः निस्दुसोः सकारस्यैव रुत्वे (८।२।६२) सति निर्दुरौ भवतः इति कः स्वतन्त्रयोर्निर्दुरोरुपयोगः इति न कदाप्याशङ्कनीयम्।

तत्र "निसस्तपतावनासेवने (८।३।१०२) इत्यत्र सान्तस्य–निस् इत्यस्य, "निरः कुषः (७।२।४६) इत्यत्र रान्तस्य–निर् इत्यस्य, अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः (३।२।४२)

इति सूत्रस्थे " सुदुरोरधिकरणे " इति वार्तिके रेफान्तस्य दुर् इत्यस्य च स्फुटं पृथङ्निर्देशं कृत्वा स्वतन्त्राण्यपि कार्याणि उपलभ्यन्ते। दुसः पाठस्तु दुरयते इति ल्त्वाभावार्थः। स्पष्टं चेदं सर्वं काशिकायां, हरदत्तस्य पदमञ्जर्यां, सिद्धान्तकौमुद्यां, शब्देन्दुशेखरे चेति दिक्।

(४) अथोपसर्गाणामर्थाः सोदाहरणम् विचारणीयाः। तत्र यास्केन विंशतेः उपसर्गाणां केचनार्थाः " उच्चावचाः पदार्था भवन्तीति गार्ग्यः " (निरु. १।३) इति गार्ग्याचार्यमत-प्रस्तावावसरे स्फुटं प्रतिपादिताः। अत्र गार्ग्यमते उपसर्गाणां वाचकत्वमेव न द्योतकत्वम्। उदाहरणानि तत्र न निर्दिष्टानि। दुर्गाचार्यस्कन्दविरचितनिरुक्तभाष्यात्तानि उद्धृत्य, कानिचिदन्यतोऽपि गृहीत्वा अधस्तात् प्रदर्श्यन्ते निरुक्तवाक्यानुसारेण।

(१) " आइत्यर्वागर्थे "। आ इत्युपसर्गः मर्यादां बोधयति। यथा आपर्वतात्।

(२) "प्रपरेत्येतस्य प्रातिलोम्यम्"। प्रपरेत्येतावुपसर्गौ एतस्यैव अर्वाग् इत्यस्य प्रातिलोम्यम् =विपरीतमर्थमाहतुः। यथा प्रगतः, परागतः। उल्लङ्घ्य गत इत्यर्थः।

(३) " अभीत्याभिमुख्यम् "। यथा–अभिगतः। साम्मुख्येन गत इत्यर्थः।

(४) " प्रतीत्यस्य प्रातिलोम्यम्"। प्रति इत्ययम् अभेः विरुद्धमर्थमाह। यथा—प्रतिगतः। परावृत्य गत इत्यर्थः।

(५) "अति सु इत्यभिपूजितार्थे"। यथा–अतिधनः, सुब्राह्मणः। अत्राभिपूजितस्य प्रशस्तोर्थः।

(६) "निर्दुरित्येतयोः प्रातिलोम्यम्"। यथा—निर्धनः, दुर्ब्राह्मणः। अत्र निर्दुरौ निन्दामाहतुः।

(७) " न्यवेति विनिग्रहार्थी यौ "। यथा–निगृह्णाति (शास्ति) अवगृह्णाति (अवरुणद्धि)

(८) " उदित्येतयोः प्रातिलोम्यम् "। उद् इत्यनवरोधमाह। यथा—उद्गृह्णाति।

(९) " समित्येकीभावम् "। यथा–संगृह्णाति। अनेकस्य एकभवनमेकीभावः।

(१०) "व्यपेत्येतस्य प्रातिलोम्यम्"। यथा–विगृह्णाति अवगृह्णाति। विच्छेदेन गृह्णातीत्यर्थः।

(११) " अन्विति सादृश्यापरभावम् "। अनु इत्ययं सादृश्यम्, अपरभावं चाह। यथा क्रमेण अनुरूपमस्येदम्–सादृश्ये, अनुगच्छति-पश्चाद्गमने।

(१२) " अपीति संसर्गम् "। संसर्गः सम्बन्धः। यथा–सर्पिषोऽपि स्यात्। अपि शब्दबलात् सर्पिषोपीत्युक्ते सर्पिषोऽवयवो बिन्दुरपि स्यादिति अवयवावयविभावसम्बन्धः प्रदर्श्यत। अत्राह स्कन्दः – संसर्गः – समुच्चयः। यथा–अपिसिञ्च, अपिस्तुहि।

(१३) " उपेत्युपजनम् "। उपजनम्–आधिक्यम्। यथा–उपजायते।

(१४) " परीति सर्वतोभावम् "। यथा–परिधावति। सर्वतो धावतीत्यर्थः।

(१५) " अधीत्युपरिभावमैश्वर्यं वा "। यथा–अधितिष्ठति लोकम्। लोकस्योपरि तिष्ठतीत्यर्थः। अधिपतिः ऐश्वर्ये।

" एवमुच्चावचानर्थान् प्राहुस्त उपेक्षितव्याः " (१।३ निरु.) एवमुपसर्गाणां बहुविधानर्थान् वदन्ति। ते–कः कस्मिन्नर्थे वर्तते इत्येवम्–उपेक्षितव्याः – उपेत्य द्रष्टव्या इत्यर्थः।

अथ रामचन्द्राचार्यकृतप्रक्रियाकौमुद्याः विठ्ठलाचार्यकृतप्रसादटीकायाम् उपसर्गाणां प्रसिद्धाः अर्थाः सोदाहरणं संगृहीताः उपलभ्यन्ते। तेऽर्थाः रामचन्द्राचार्यभ्रातृसुतैः कृष्णाचार्यैः श्लोकेषूपनिबद्धाः इति तत्रस्थप्रथमश्लोकादेव ज्ञायते। तेऽत्र तथैवोद्ध्रियन्ते—

कृष्णाचार्यैं रामचन्द्राचार्यभ्रातृसुतैः कृताः।
सोदाहृत्युपसर्गार्थश्लोका ये तांल्लिखाम्यहम् ॥१॥

(प्र) **प्र–आदिकर्म, दीर्घे, शे, भृश, सम्भव, तृप्तिषु।**
वियोग, शुद्धि, शक्ती, च्छा, शान्ति, पूजा, ग्र, दर्शने ॥१॥

(१) आदिकर्मणि क्तः — प्रयातः (२) दीर्घे–प्रबला मूषकाः (३) ईशे–प्रभुर्देशस्य (४) भृशार्थे–प्रवदन्ति दायादाः (५) सम्भवे–हिमवतो गङ्गा प्रभवति (६) तृप्तौ–प्रभुक्तमन्नम् (७) वियोगे–प्रोषितः (८) शुद्धौ–प्रसन्नमुदकम् (९) शक्तौ–प्रशक्तो विप्राय (१०) इच्छायाम् प्रार्थयते कन्याम् (११) शान्तौ–प्रशान्तोऽग्निः (१२) पूजायाम्–प्राञ्जलिः स्थितः (१३) अग्रे-प्रवालम् (प्रपदम्–पादाग्रम्) (१४) दर्शने–प्रलोकयति।

(परा) **वधे, गतौ, दर्शने, च विक्रमा, भिमुखे, भृशे।**
अधीन, मोक्षण, प्रातिलोम्यकेषु परा स्मृतः ॥२॥

(१) वधे—पराहतः (२) गतौ–परागतः (३) दर्शने–परादृष्टः (४) विक्रमे–पराक्रान्तः (५) अभिमुखे–परावृत्तः (६) भृशे–पराजितः (७) अधीने–पराधीनः (८) मोक्षणे–पराकृतः (९) प्रातिलोम्ये–पराङ्मुखः।

(अप) **अपो–वियोगे, विकृतौ, विपरीते, निदर्शने।**
आनन्दे, वर्जने, चौर्ये, वारणे, सम्यगीरितः ॥३॥

(१) वियोगे–अपयाति (२) विकृतौ–अपकृतवान् (३) विपरीते–अपशब्दः (४) निदर्शने–अपदिशति (५) आनन्दे–अपहसति (६) वर्जने–अपत्रिगर्ताद् वृष्टो देवः (७) चौर्ये-अपहरति (८) वारणे–अपसरति।

(सम्) **संयोग, ऐक्य, प्रभव, सत्य, प्रत्यक्ष, सिद्धिषु।**
भूषा, श्लेष, स्वीकरण, क्रोधा, भिमुख, वाचि-सम् ॥४॥

(१) संयोगे–संगतः पुत्रेण (२) ऐक्ये–संवदन्ति सख्यः (३) प्रभवे–सम्भवत्यग्निः (४) सत्ये–गोष्ठे गां संजानाति (५) प्रत्यक्षे– संपश्यते (६) सिद्धौ–संसिद्धिः (७) भूषायाम्–संस्कृता कन्या (८) श्लेषे–संधत्ते (९) स्वीकरणे–संगृह्णाति (१०) क्रोधे–संक्रुद्धः (११) अभिमुखार्थे-संयाति।

(अनु) **वेदा,धिष्ठान, सामीप्य, पश्चाद्भावा, नुबन्धने।**
साम्या,भिमुख, हीनेषु, विसर्गे, लक्षणे--त्वनु ॥५॥

(१) वेदे–अनुवाकमधीते (२) अधिष्ठाने–अनुष्ठानं देशे (३) सामीप्ये–अनुमेघं वर्षति (४) पश्चाद्भावे–अनुरथम् (५) अनुबन्धने–अनुशयः (६) साम्ये–अनुकृतिः (७) अभि-

मुखार्थे-अनु वत्सो मातरं धावति (८) हीने-अन्वर्जुनं योद्धारः (९) विसर्गे-अनुज्ञातः (१०) लक्षणे-अनुधनमसतां गतिः ।

(अव) ज्ञाना,वलम्ब, शुद्धी, षदर्थे, व्याप्ति, पराभवे ।
अवो-ज्ञेयो वियोगे, च लोकयोगानुसारतः ॥६॥

(१) ज्ञाने-अवगतोऽर्थः (२) अवलम्बे-अवलम्ब्य यष्टिं गतः (३) शुद्धौ-अवदातम् (४) ईषदर्थे -अवलम्बते (५) व्याप्तौ-अवकीर्णम् (६) पराभवे-अवघ्नन्ति (७) वियोगे-अवयातः ।

(निस् निर्) निर्-वियोगा, त्यया, देशा,तिक्रमे, लोभ, निश्चिते ।

(१) वियोगे-निःसङ्गो ब्रवीति (२) अत्यये-निर्मेघम् (३) आदेशे-निर्दिष्टम् (४) अतिक्रमे-निष्क्रान्तः (५) लोभे-निर्वेशः (६) निश्चितार्थे-निश्चितम् ।

(दुस्-दुर्) दुर्-ईषदर्थे, कृच्छ्रेर्थे, कुशा, सम्पत्ति, संकटे ॥ ७ ॥

(१) ईषदर्थे-दुर्गतः (२) कृच्छ्रे-दुर्जीवनः (३) कुशे-दुर्बलः (४) असम्पत्तौ-दुर्गतः (५) संकटे-दुर्दिनम् ।

(वि) नाना, वियोगा, तिशय, भृश, मोहे, श, वाङ्मृधे ।
पैशुन्या, स्मरणे, भूषे, षदर्थे, नाभिमुख्यके ॥ ८ ॥
अनवस्था, मुख्य, शौर्य, दर्शने, विः-उदाहृतः ।

(१) नानार्थे-विचित्रा सूत्रस्य गतिः (२) वियोगे-वियुक्तः (३) अतिशये-विकीर्णः (४) भृशे-वितटा नद्यः (५) मोहे-विमनस्कः (६) ईशे-विभुः (७) वाग्युद्धे-विवदन्ति (८) पैशुन्ये-विगायति (९) अस्मरणे-विस्मृतः (१०) भूषायाम्-विभूषितः (११) ईषदर्थे-विलोपितः (१२) आभिमुख्याभावे-विमुखः (१३) अनवस्थायाम्-विभ्रान्तः (१४) मुख्यार्थे-विशिष्टः (१५) शौर्ये-विक्रान्तः (१६) दर्शने-विलोकयति ।

(आङ्) आङ्-इच्छा, भय, वाक्ये, षदर्था, श्लेषा, दिकर्मणि ॥ ९ ॥
बन्धने, भिविधौ, शाठच, कच्छ्र, सामीप्य, संश्रये ।
अभिमन्त्र, निवृत्या, शा, दाना, नुभव, विस्मये ॥ १० ॥
प्रतिष्ठा, देश, मर्यादा, स्पर्धा, मुख्यो, ध्वंकर्मणि ।

(१) इच्छा-आकाङ्क्षते (२) भये-आविग्नः (३) वाक्ये-आजानासि (४) ईषदर्थे-भाताम्रा नखाः (५) आश्लेषे-आलिङ्गति (६) आदिकर्मणि-आरभते (७) बन्धने-कवचमा-वध्नाति (८) अभिविधौ-आकुमारं यशः (९) शाठ्ये-आचरति कपटेन (१०) कृच्छ्रे-आहूक्तः (आपद्) (११) सामीप्ये-आसन्ना वयम् (१२) संश्रये-आवसथः (१३) अभिमन्त्रे-आमन्त्र-णम् (१४) निवृत्तौ-आधावति (१५) आशायाम्-आशास्ते (१६) आदाने-आदत्ते (१७)

अनुभवे-आशीतम् (१८) विस्मये-आ एवं किल तत् (१९) प्रतिष्ठायाम्-आस्पदम् (२०) आदेशे-आदिष्टः (२१) मर्यादा-आभक्तेर्दुःखम् (२२) स्पर्धायाम्-आह्वयन्ते रथिनो रथिनः (२३) मुख्ये-आगच्छति (२४) ऊर्ध्वकर्मणि-आरोहति पर्वते।

(नि) **राश्य, धस्त्व, भृशा, देश, नित्य, कौशल, बन्धने ॥ ११ ॥**
अन्तर्भावे, समीपे, निर्-दर्शने, परमाश्रये।

(१) राशौ-निकरो मणीनाम् (२) अधोभावे-निपतितम् (३) भृशार्थे-निगृहीतः (४) आदेशे-निदेशितम् (५) नित्ये-निविशते (६) कौशले-निपुणः (७) बन्धने-निबद्धः (८) अन्तर्भावे-निपीतमुदकं सिकताभिः (९) समीपे-निकृष्टः (१०) दर्शने-निदर्शनम् (११) परमार्थे-निवृत्तः पापात् (१२) आश्रये-निलयः।

(अधि) **अधिर्-अध्ययनै, श्वर्य, वशित्व, स्मरणा, धिके ॥ १२ ॥**

(१) अध्ययने-उपाध्यायादधीते (२) ऐश्वर्ये-अधिपतिः (३) वशित्वे-अधीनः (४) स्मरणे-मातुरध्येति (५) अधिके-अधिकृतम्।

(अपि) **अपिः-सम्भव, गर्हा, शी, मृति, भूषा, समुच्चये।**

(१) सम्भवे-अपि योजनमस्ति (२) गर्हायाम्-अपि पापिन् (३) आशीरर्थे-भद्रमपि (४) मृतौ-मरणमपि (५) भूषा-अपि नह्यति हारम् (६) समुच्चये-तदपि।

(अति) **विक्रमातिक्रमे, बुद्धौ, भृशार्था, तिशये-त्वतिः ॥ १३ ॥**

(१) विक्रमे-अतिरथः (२) अतिक्रमे-अतिक्रामति (३) बुद्धौ-अतिगहनम् (४) भृशार्थे-अतितप्तम् (५) अतिशये-अतिमनुते ज्ञानम्।

(सु) **प्रशंसा, नुमते, पूजा, भृश, कृच्छ्र, शुभेषु-सुः।**

(१) प्रशंसायाम्-सुरूपः (२) अनुमते-सुकृतम् (३) पूजायाम्-सुसाधुः (४) भृशे-सुतप्तः (५) कृच्छ्रे-सुदुष्करम् (६) शुभे-सुगन्धः।

(उद्) **उत्-प्राबल्य, वियोगो,र्ध्वकर्म, लाभ प्रकाशने ॥ १४ ॥**
आश्चर्य, मोक्षणे,ऽभावे, बल, प्राधान्य, शक्तिषु।

(१) प्राबल्ये-उद्बलः (२) वियोगे-उद्गच्छति (३) ऊर्ध्वकर्मणि-उत्तिष्ठति शयनात् (४) लाभे-उत्पन्नम् (५) प्रकाशने-उच्चरति (६) आश्चर्ये-उत्सुकः (७) मोक्षणे-उद्गतोऽश्व (८) अभावे-उत्पथः (९) बले-उत्कः (१०) प्राधान्ये-उद्दिष्टः (११) शक्तौ-उत्साहः।

(अभि) **अभिः-पूजा भृशार्थे, च्छा, व्याधि, साम्या, भिमुख्यके ॥ १५ ॥**
सौरूपा, वचना, हार, स्वाध्यायेषु निरूपितः।

(१) पूजायाम्–अभिवदति गुरुम् (२) भृशार्थे–अभियुक्तः (३) इच्छायाम्–अभिलिप्सते (४) व्याधौ–अभिस्यन्दो व्याधिः (५) साम्ये–अभिजातः (६) आभिमुख्ये–अभिमुखम् (७) सौरूपे–अभिरूपः (८) आवचने–अभिधानम् (९) आहारे–अभ्यवहरति (१०) स्वाध्याये–अभ्यस्यति ।

(प्रति) **सादृश्या, दान, हिंसा, ङ्गीकृतौ, प्रतिनिधौ क्वचित् ॥ १६ ॥**
व्याध्या, भिमुख्ययो, र्व्याप्तौ, वारणे प्रतिरुच्यते ।

(१) सादृश्ये–प्रति देवदत्तस्य (२) आदाने–प्रतिगृह्णाति (३) हिंसायाम्–प्रतिहन्ति (४) अङ्गीकृतौ-प्रतिज्ञानम् (५) प्रतिनिधौ–अभिमन्युः अर्जुनतः प्रति (६) व्याधौ–प्रतिश्यायः (७) आभिमुख्ये–प्रति सूर्यं गच्छति (८) व्याप्तौ–प्रतिकीर्णं पांशुभिः (९) वारणे–प्रतिषिद्धः ।

(परि) **परिः—समन्ततोभाव, व्याप्ति, दोषकथासु च ॥ १७ ॥**
भूषा, श्लेषे, पूजने, च वर्जने, वसने,ऽशुभे ।

(१) समन्ततोभावे–परिभ्रमति (२)–व्याप्तौ परिगतोऽग्निर्ग्रामम् (३) दोषकथासु-परिवादः (४) भूषायाम्–परिकरोति कन्याम् (५) आश्लेषे–परिष्वजते (६) पूजने–परिचरति गुरुम् (७) वर्जने–परित्रिगर्तेभ्यो वृष्टो देवः (८) वसने–परिधत्ते वासः (९) अशुभे–परिदेवनम् ।

(उप) **उपः—सामीप्य, सामर्थ्य, व्याप्त्या, चार्यकृतौ, मृतौ ॥ १८ ॥**
दोषा, दान, क्रिया, वीप्सा, रम्भा, ध्ययन, पूजने ।

(१) सामीप्ये–उपकुम्भं तिष्ठति (२) सामर्थ्ये–उपकरोति मित्रेभ्यः (३) व्याप्तौ—उपकीर्णः पांशुभिः (४) आचार्यकरणे–उपदिशति शिष्येभ्यः (५) मृतौ–उपरतः (६) दोषे—उपघातः (७) आदाने–उपहरत्यर्थम् (८) क्रियायाम्–उपचारः (९) वीप्सायाम्–देवं देवमुपचरति (१०) आरम्भे–उपक्रमते भोक्तुम् (११) अध्ययने–उपाध्यायादधीते (१२) पूजने-उपचितः पिता पुत्रेण ।

कृष्णाचार्यैः कृताः श्लोका उपसर्गार्थसंग्रहे ॥ १९ ॥
" समाप्ता सोदाहरणोपसर्गवृत्तिः ।

(५) व्यवहारे यः परमनाश्रित्यापि स्वाधीनतया आत्मानं प्रख्यापयति सः स्वतन्त्र इति कथ्यते । यः सदैव परमाश्रित्य जीवति सः अर्थादेव पराधीनतया परतन्त्र इत्युच्यते । शब्दस्य विषये यः शब्दः स्वतन्त्रः सन् साक्षात् अर्थं बोधयति सः तस्यार्थस्य वाचकः इत्युच्यते । यश्च स्वातन्त्र्येण अर्थं बोधयितुं न पारयति, किन्तु अन्यं कंचन अवलम्ब्यैवार्थं प्रतिपादयति सः द्योतको वा व्यञ्जको वा इति कथ्यते ।

देवदत्तः इत्यादि नामानि । पचतीत्यादि क्रियापदानि च वाक्ये स्वतन्त्रतया प्रयुज्यन्ते, अतः तानि स्वार्थस्य वाचकानीत्युच्यन्ते । उपसर्गाणां तु न क्वापि स्वतन्त्रः प्रयोगः क्रियते, ते हि सर्वदा धातुमाश्रित्यैव अर्थं बोधयन्ति अतः ते धात्वर्थस्य द्योतकाः व्यञ्जका वा भवन्ति न वाचकाः । द्योतका नाम–समभिव्याहृतस्य धातोः या तत्तदर्थनिरूपिता शक्तिः तस्या उद्बोधकाः इत्यर्थः ।

वैय्याकरणाः, तार्किकाश्च उपसर्गाणां द्योतकत्वमेव स्वीकुर्वन्ति न वाचकत्वम्। पाणिनीयैः एतदेव विविधाभिः उपपत्तिभिरपि साधितम्। तथाहि—देवदत्तः भवतीत्यत्र भूधातोः केवलं सत्तारूपोऽर्थः। देवदत्तः सुखमनुभवति इत्यत्र भूधातोरेव सत्त्वेऽपि अनुभवार्थः प्रतीयते। अथ किं स अनुभवार्थः (१) भूधातोरेव (२) उतवा सः अनुभवार्थः उपसर्गस्य अनोः (३) अथवा सः धातूपसर्गविशिष्टस्य "अनुभू" इत्यस्य इति विचारणीयम्। तत्र तावत् [१] न सः अनुभवः अनुभवतीतिप्रयोगघटकस्य भूधातोरर्थः, तथा सति केवलस्य भूधातोः प्रयोगे भवतीत्यत्रापि अनुभवादिप्रतीत्यापत्तेः। [२] नापि अनुभवः उपसर्गस्य अनोः अर्थः सम्भवति, अनुभवस्य उपसर्गार्थत्वे, भूधातोः धातुसंज्ञा न स्यात्, तस्य क्रियावाचकत्वाभावात् क्रियावाचकस्यैव च "भूवादयो धातवः" (१।३।१) इति धातुसंज्ञाविधानात्। अनोरनुभवार्थत्वे धातुं विना केवलात्तस्मात् अनुभवार्थप्रतीतेरनुभूतिविरुद्धत्वात्, तदनुरोधेन च अनुगच्छतीत्यादावपि तस्यैव अनोः सत्त्वेन, तत्रापि अनुभवार्थप्रत्ययापत्तेश्च [३] न चैव धातूपसर्गविशिष्टस्य "अनुभू" इति समुदायस्य अनुभवार्थः स्वीकर्तुं शक्यते, "अनुभू" इति विशिष्टस्य शक्यतावच्छेदकत्वे गौरवात्, समुदायार्थस्यानुभवस्य "भू" इति प्रकृत्यर्थत्वाभावेन तत्र प्रत्ययार्थानन्वयापत्तेः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात्, धातुपाठे भू अनुभवे इति पाठस्य अभावात्, अन्वभवत् इत्यादौ "अनुभू" इत्यस्य धातुत्वे अडागमादेः अव्यवस्थापत्तेश्च।

एवं च अनुभवतीत्यादौ धातूपसर्गविशिष्टानां त्रयाणामपि प्रतीयमानानुभवार्थवाचकत्वासम्भवात्, धातोरेव सत्तादिवाचकस्य अनुभवादिरूपार्थे अस्तु लक्षणा। अनेकार्थशब्दात् एकस्यार्थस्य प्रतीतौ तात्पर्यग्राहकस्यावश्यमपेक्षा इति "अनु" इत्यस्य तात्पर्यग्राहकत्वं स्वीक्रियते। तथाच—अनोः तात्पर्यग्राहकत्वरूपमेव द्योतकत्वमाश्रीयते। तथाच-अनुभवतीत्यादौ अनुसमभिव्याहारेण भूधातौ विद्यमाना या अनुभवानुकूलव्यापारनिरूपिता शक्तिः सा उद्बुध्यते (उद्बोध संस्कारवती भवति) ततस्तस्मात् स्मरणम्, ततोऽनुभवानुकूलव्यापारोपस्थितिः ततश्च शाब्दबोधः इत्येवं सर्वत्रोपसर्गस्य द्योतकत्वं विज्ञेयम्।

तदेवं भूधातोः सर्वत्र अनुभवार्थाभावात् श्रोतुः अनुभवतीत्यतः अनुभवार्थस्य बोधः क्लेशेन स्यादिति अन्वाद्युपसर्गस्य श्रोतुर्द्योत्यार्थबोधाय प्रयोगः इति बोध्यम्।

न च अनुभवति, प्रजपति, प्रणमति इत्यादौ अनुप्रादिशब्दानामेव अनुभव-प्रकर्षजपनत्यादिरूपेऽर्थे लक्षणा, भू, जप, नमादीनां च तात्पर्यग्राहकत्वमस्तु इति वाच्यम्, प्रत्ययानां प्रकृत्यर्थान्वित स्वार्थबोधकत्वनियमात्, अनुप्रशब्दलक्ष्यार्थे प्रत्ययार्थानन्वयप्रसङ्गाच्च।

न च अनुप्रादीनां शक्यार्थाभावेन "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (१।४।४५) इति प्रातिपदिकत्वं न स्यादिति शङ्क्यम्, शक्तिलक्षणाद्योतकतान्यतमसम्बन्धेन बोधकस्यैवार्थवत्वात्, द्योतकत्वरूपार्थवत्त्वमादाय प्रातिपदिकत्वसिद्धेः।

किंच अनोः अनुभवार्थवाचकत्वे "अनुभूयते सुखम्" इति कर्मणि लकारो नैव सिद्ध्येत्। तथाहि— यदि अनुभूयते इत्यादौ अनुभवार्थोऽनुवाच्य एव, तथा सति भूधातोः अकर्मकत्वेन तस्य कर्मरूपकारकेण सह योगस्य खपुष्पायितत्वात्, कर्मसाधनप्रयुक्तः कर्मणिलकारः असम्भव्येव। अनोः

द्योतकत्वे, भूधातोरेवचानुभवार्थकत्वे तु, उपसर्गयोगात् पूर्वमपि भू इत्यस्य अनुभवार्थकत्वात्, अनुभवार्थस्य धात्वर्थत्वेन, धातोः सकर्मकत्वेन कर्मणि लकारः सुकर एव ।

अथ तिष्ठतीत्यत्र गतिनिवृत्तिवाचकस्य (ष्ठा-गतिनिवृत्तौ) स्थाधातोः, प्रतिष्ठते इत्यत्र कथं तद्विरुद्धगत्यर्थबोधकता इति चेत् अत्रोच्यते–भवन्ति हि धातवः अनेकार्थाः, तेन एकस्यैव स्थाधातोः तथाविधविपरीतार्थबोधकत्वे न कापि विप्रतिपत्तिः । स्पष्टं चेदं "भूवादयो धातवः" (१।३।१) सूत्रे भाष्ये । तत्रहि उपसर्गविशिष्टस्य क्रियावाचकत्वं कुतोनेत्याक्षिप्य तन्निरसनार्थं "क्रियाविशेषक उपसर्गः" इति वार्तिकम् उद्धृत्य "पचतीति क्रिया गम्यते, तां प्रो विशिनष्टि" इत्युक्तम् । एवंच अन्वयव्यतिरेकाभ्याम् उपसर्गः क्रियाविशेषस्य द्योतक एव विशिष्टपाकाद्यर्थबोधकस्तु धातुरेवेति प्रतिपादितम् ।

ततोऽग्रे "इह तर्हि व्यक्तमर्थान्तरं गम्यते । तिष्ठति प्रतिष्ठते इति । तिष्ठतीति व्रजिक्रियाया निवृत्तिः, प्रतिष्ठत इति व्रजिक्रिया गम्यते, ते मन्यामहे उपसर्गकृतमेतद्येनात्र व्रजिक्रिया गम्यते इति" इति भाष्येण पुनरपि उपसर्गविशिष्टस्य धातुत्वमाक्षिप्य "न चेदं नास्ति बह्वर्था अपि धातवो भवन्तीति । तद्यथा—वपिः प्रकिरणे दृष्टश्छेदने चापि वर्तते । एवमिहापि तिष्ठतिरेव व्रजिक्रियामाह, तिष्ठतिरेव व्रजिक्रियाया निवृत्तिम्" इति सिद्धान्तितम् । एवं च धातूनामनेकार्थत्वात् तिष्ठतीत्यत्र गतिनिवृत्तिवाचकस्यापि स्थाधातोः प्रतिष्ठते इत्यत्र गतिवाचकत्वे न कापि बाधा इति स्थाधातुरेव गतिवाची । प्रशब्दस्तु तदर्थगत्यादिमत्त्वस्य द्योतक एव इति तत्त्वम् ।

एतदेवोपसर्गाणां द्योतकत्वम्—"न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः" (१।३ निरुक्तम्) इति शाकटायनमतप्रस्तावावसरे स्फुटं प्रदर्शितं निरुक्तकृता यास्काचार्येण । उपसर्गाः नामाख्यातमध्यात् निष्कृष्य पदवाक्यरूपेण रचिताः सन्तः, साक्षादर्थबोधने अशक्ताः सन्तीति तदर्थः ।

ऋक्प्रातिशाख्ये—**क्रियाविशेषमाख्यातम् "उपसर्गो विशेषकृत्"।**
तत्त्वाभिधायकं नाम निपातः पादपूरणः ॥ (१२।२५)

इति पद्येनाप्युपसर्गाणां क्रियाविशेषकत्वमेव प्रतिपादितम् ।

इत्थमेव–शुक्लयजुःप्रातिशाख्ये (८।४६), प्रातिशाख्यप्रदीपशिक्षायाम् (पृ. २३७) चोक्तम् ।

"क्रियाविशेषिताः प्रादय उपसर्गाः" इति अर्थशास्त्रे (२।१०) कौटिल्यः । "विवेचयन्ति तेह्यर्थं नामाख्यातविभक्तिषु" इति बृहद्देवतायां शौनकश्च ।

वेङ्कटमाधवेन तु स्फुटमेवोक्तम्–उपसर्गनिपातानां न स्वतन्त्रस्थितिरिति ऋग्भाष्ये—

"आख्यातस्य च नाम्नश्च सम्बन्धाः स्वार्थदर्शिनः ।
उपसर्गानिपाताश्च न स्वतन्त्रा इति स्थितिः ॥ (२।१ अष्ट.)

(एवमेव ३।१, ३।३, ३।६, ३।७ तत्रैव)

शिशुपालवधे माघेनाप्युपवर्णित एषोऽर्थः —

सन्तमेव चिरमप्रकृतित्वादप्रकाशितमदिद्युतदङ्गे ।
विभ्रमं मधुमदः प्रमदानां 'धातुलीनमुपसर्ग इवार्थम्' ।। (१०।१५)

"धातौ भूवादिके लीनं गूढमर्थमभिधेयम् उपसर्गः प्रादिरिव" इति, "उपसर्गस्य धातुलीनार्थद्योतकत्वमादानसन्दानादावनुसन्धेयम्" इति च तत्रैव मल्लिनाथव्याख्यायाम्।

"तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव" (१।२५ कु. सं.) इति श्लोकव्याख्यानावसरे नारायण आह "धातूनामुपसर्गेण येऽर्थाः प्रतीयन्ते, ते सर्वेऽपि तेषां स्वार्था एव । उपसर्गाणां पुनरभिव्यञ्जकत्वम् । यदाह माघः - धातुलीन उपसर्ग इवार्थम्" इति ।

(६) लौकिकभाषायाम् उपसर्गस्य सर्वत्र धातोः प्रागेव प्रयोगः । तदुक्तम्—"ते प्राग्धातोः (१ । ४ । ८०) तेगत्युपसर्गसंज्ञाः धातोः प्रागेव प्रयोक्तव्याः इति सूत्रार्थः । तद्यथा—तां भूपतिरन्वगच्छत् । (रघु० २।६)

वेदे तु उपसर्गाणां धातोः (१) पूर्वम् (२) परत्र (३) व्यवधानेऽपि च भवति प्रयोगः। तद्यथा—(१) "मरुद्भिरग्न आगहि" इत्यत्र आ इत्युपसर्गस्य धातोः पूर्वं प्रयोगः (२) "हरिभ्यां याह्योक आ" इत्यत्र याहीत्यतः परत्र आ इत्यस्य प्रयोगः (३) "आमन्द्रैरिन्द्र हरिभिर्याहि" इत्यत्र आ-याहि इत्यनयोर्मध्ये मन्द्रादिभिः व्यवधानेऽपि प्रयोगः । तदुक्तम् पाणिनिना—छन्दसि परेऽपि (१ । ४ । ८१) व्यवहिताश्च (१ । ४ । ८२) इति ।

(७) एकस्यैव धातोः अनेकार्थद्योतने अस्ति उपसर्गाणां सामर्थ्यम्। तदुक्तम् भर्तृहरिणा—

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
प्रहाराहारसंहारविहारपरिहारवत् ।।

अत्र—प्रहारः-कशाद्याघातः, आहारः—भक्षणम्, संहारः-वधः, विहारः क्रीडा, परिहारः-परित्यागः इत्यर्थः । मुग्धबोध टीकायां दुर्गादासोप्यवमेवाह । अतएवामरकोषेप्युक्तम्—

स्यादाभाषणमालापः, प्रलापोऽनर्थकंवचः ।
अनुलापोमुहुर्भाषा, विलापः परिदेवनम् ।।
विप्रलापोविरोधोक्तिः संलापो भाषणं मिथः ।
सुप्रलापः सुवचनम्, अपलापस्तु निह्नवः ।। इति

(शब्दादिवर्गे, प्रथमकाण्डे १५-१७)

उपसर्गस्य त्रिधाप्रवृत्तिः इति शाकटानीयधातुपाठे उक्तम्।

धात्वर्थं बाधते कश्चित्, कश्चित्तमनुवर्तते ।
तमेव विशिनष्टयन्य, उपसर्गगतिस्त्रिधा ।।

(१) कश्चिदुपसर्गः धात्वर्थं बाधते । यथा गच्छति-आगच्छति, स्मरति-विस्मरति । (२) कश्चित् धात्वर्थमनुसरति । यथा सूते-प्रसूते, चष्टे-आचष्टे । (३) कश्चिच्च उपसर्गः धात्वर्थमेव विशिनष्टि । यथा भवति-प्रभवति, उद्भवति, ईक्षते-निरीक्षते, नमति-प्रणमति ।

वर्धमानाचार्येण—कातन्त्रविस्तरे उपसर्गाश्चतुर्धा भवन्तीत्युक्तम्।

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते।
तमेवविशिनष्टचन्योऽनर्थकोन्यः प्रयुज्यते॥

तत्राद्यानां त्रयाणामुदाहरणानि प्रागेव प्रदर्शितानि। (४) चतुर्थः प्रकारः कश्चिदुपसर्गः अनर्थकः अपि प्रयुज्यते इति। यथा-प्रलम्बते, निमीलति, अध्यागच्छति, पर्यागच्छति। अत्रोपसर्गाणाम् अर्थान्तरद्योतकत्वाभावेन अनर्थकत्वव्यवहारः। तदुक्तम् "अधिपरी अनर्थकौ" (१।४।९३) इति सूत्रे भाष्ये। तत्र—"अनर्थान्तरवाचिनावनर्थकौ। धातुनोक्तां क्रियामाहतुः। तदविशिष्टं भवति। यथा शङ्खे पयः" इत्युक्तम्। यथा शङ्खे स्थापितं दुग्धं नाधिकं श्वेतं भवति, तथैव, अध्यागच्छतीत्यादौ अधिपर्यादीनां प्रयोगेऽपि न धात्वर्थक्रियायां किमपि वैशिष्ट्यं भवतीति भाष्यार्थः।

नचोक्तार्थानामप्रयोगः इति न्यायात् धातुनैवार्थबोधे पुनः अधिपर्यादीनां प्रयोगोऽनुचित इति शङ्क्यम्, अपूपौ द्वौ आनय, ब्राह्मणौ द्वौ आनय इत्यादौ द्विवचनेनैव अभिहितायामपि द्वित्व-संख्यायां, पुनस्तस्यैव प्रदर्शनार्थं द्विशब्दस्य प्रयोगदर्शनेन क्वचिदुक्तार्थनामपि प्रयोगो भवतीत्यस्य स्वीकारात्। स्पष्टञ्चेदं (१।४।९४) सूत्रे भाष्ये।

(८) धातोः पूर्वम् एकतः आरभ्य पञ्चपर्यन्तमुपसर्गाणां प्रयोगो दृश्यते। यथा (१) आहरति (२) व्याहरति (३) अभिव्याहरति (४) समभिव्याहरति (५) प्रसमभि-व्याहरति इति। तदुक्तम् वर्धमानाचार्यैः

"**आपञ्चभ्यः प्रयुज्यन्ते प्रायेणैते प्रयोक्तृभिः**" इति।

(९) अथेतः प्रारभ्य क्रमेण (३३) उपसर्गपदघटितानि पाणिनिसूत्राणि प्रतिपाद्यविषयविभाग-सहितानि पूर्वं व्याख्याय, ततः (१४) अनुपसर्गपदघटितान्यपि पाणिनिसूत्राणि तथैव व्याख्यायन्ते।

ततः परम् प्रत्येकं प्रपराद्युपसर्गघटितानि सूत्राणि संक्षिप्तार्थोदाहरणसहितानि दीयन्ते। यदा अत्र एकस्मिन्नेव सूत्रे बहवः प्रादय उपसर्गाः आगच्छन्ति यथा—"समवप्रविभ्यः स्थः" इति तदा तेन तेनोपसर्गेण सह तत्तत्सूत्रं बहुवारम् अपि लिखितमिति बोध्यम्।

अस्मिन् सूत्रसंग्रहे कर्मधारयसंज्ञकत्वात् स्वरद्वित्वादिविषयकत्वाञ्च उपसर्गसंज्ञाभाववन्ति अपि सूत्राणि संचितानि, सामान्यतः प्रपरादिविषयकव्याख्यानार्थं तेषामावश्यकत्वात्।

एतेषां सूत्राणां विस्तृतं समीक्षणम् अधिककालस्थानापेक्षित्वाद् अग्रिमे लेखे करिष्यते।

(९) उपसर्गपदघटितानि सूत्राणि

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
उपसर्गसंज्ञासूत्रम्—			
१. उपसर्गाः क्रियायोगे	१।४।५९	निपातसंज्ञकाः प्रादयः क्रियायोगे उपसर्गसंज्ञकाः भवन्ति	प्रणयति (उपसर्गसंज्ञाया "उपसर्गाद्" इति णत्वम्)
कारकविषयकं सूत्रम्—			
२. विभाषोपसर्गे	२।३।५९	अक्षक्रीडायां, क्रयविक्रयव्यवहारे च सोपसर्गाद् दिव्धातोः कर्मणः विकल्पेन षष्ठी भवति	शतस्य, शतं वा प्रति दीव्यति
कृत्प्रत्ययविषयकाणि-सूत्राणि—			
३. आतश्चोपसर्गे	३।१।१३६	उपसर्गे उपपदे आकारान्ताद् धातोः कप्रत्ययः	प्रस्थः, सुग्लः
४. सत्सूद्विषद्रुहदुहयुजविद-भिदच्छिदजिनीराजामुप-सर्गेऽपि क्विप्	३।२।६१	सत्, सू, द्विष, द्रुह्, दुह्, युज्, विद्, भिद्, छिद्, जि, नी, राज्, एभ्यो धातुभ्यः उपसर्गे उपसर्गभिन्ने-वा सुबन्ते उपपदे क्विप्	अन्तरिक्षमत् – उपनिषत्, अण्डसूः प्रसूः, मित्रद्विट्-प्रद्विट्, मित्रध्रुक् प्रध्रुक्, गोधुक्–प्रधुक्, अश्वयुक्-प्रयुक्, वेदवित् – प्रवित्, काष्ठभित् – प्रभित् – रज्जुच्छित्-प्रच्छित्, शत्रुजित्-प्रजित् सेनानीः – प्रणीः, राट्–विराट्
५. उपसर्गे च संज्ञायाम्	३।२।९९	उपसर्गे उपपदे जन्धातोः डप्रत्ययः संज्ञाशब्दे सति	प्रजा
६. देविक्रुशोश्चोपसर्गे	३।२।१४७	उपसर्गे उपपदे देवक्रुश्धात्वोः तच्छील तद्धर्म तत्साधुकारिषु अर्थेषु कर्तरि वुन्	आदेवकः, आक्रोशकः
७. उपसर्गे रुवः	३।३।२२	उपसर्गे उपपदे रुधातोः घञ्प्रत्ययः भावे, अकर्तरि च कारके	संरावः, उपरावः
८. उपसर्गेऽदः	३।३।५९	उपसर्गे उपपदे अद्धातोः अप्प्रत्ययः भावे, अकर्तरि च कारके	विघसः, प्रघसः

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
९. उपसर्गे घोः किः	३।३।९२	उपसर्गे उपपदे घुसंज्ञक धातुभ्यः भावे अकर्तरिच्च कारके किप्रत्ययः	प्रदिः, प्रधिः
१०. आतश्चोपसर्गे	३।३।१०६	उपसर्गे उपपदे आकारान्ताद् धातोः अङ्प्रत्ययः भावे अकर्तरि च कारके	प्रदा, उपधा
११. उपसर्गस्यघञ्यमनुष्ये बहुलम्	६।३।१२२	घञ्प्रत्ययान्ते उत्तरपदे पूर्वस्य उपसर्गस्य बहुलं दीर्घः अमनुष्ये अर्थे गम्यमाने	परीपाकः, परिपाकः (मनुष्ये तु-निषादः)
१२. छादेर्घेऽद्व्युपसर्गस्य	६।४।९६	ण्यन्तच्छादिधातोः उपधायाः ह्रस्वः घप्रत्यये परे, पूर्वे द्वयोः उपसर्गयोः अविद्यमानयोः, ततोधिकेषु वा उपसर्गेषु अविद्यमानेषु सत्सु	दन्तच्छदः, प्रच्छद (द्विप्रभृत्युपसर्गेषु तु समुपच्छादः)
१३. अच उपसर्गात्तिः	७।४।४७	अजन्तोपसर्गात् परस्य घुसंज्ञकदाधातोः आकारस्य तकारः भवति, तकारादौ किति प्रत्यये परे	प्रत्तम्, अवत्तम्
१४. उपसर्गात्खल्घञोः	७।१।६१	उपसर्गादेव परस्य लभ्धातोः नुम् खलि, घञि च परे	सुप्रलम्भः, प्रलम्भः
तिङ्कृत्साधारणे सूत्रे			
१५. उपसर्गाद्ध्रस्वऊहतेः	७।४।२३	उपसर्गात्परस्य ऊह्धातोः ऊकारस्य ह्रस्वः यकारादौ किति ङिति च प्रत्यये परे	समुह्यते, समुह्य गतः
१६. उपसर्गस्यायतौ	८।२।१९	अय्धातौपरे उपसर्गस्थरेफस्यलकारः	पलायते, पलायनम्
समाससम्बद्धानि सूत्राणि			
१७. उपसर्गादध्वनः	५।४।८५	समासे उपसर्गात्परात् अध्वन्शब्दात् समासान्तः अच् प्रत्ययः भवति	प्रगतः अध्वानं प्राध्वः रथः
१८. उपसर्गाच्च	५।४।११९	बहुव्रीहौ उपसर्गात् परात् नासिकाशब्दात् अच्प्रत्ययः समासान्तः नासिकाशब्दस्य नस्आदेशश्च भवति	उन्नता नासिका यस्य सः उन्नसः
१९. द्व्यन्तरुपसर्गेभ्योऽपईत्	६।३।९७	द्वि, अन्तर्, उपसर्ग एतेभ्यः अकारप्रत्ययान्तस्य अपशब्दस्य आदेः अकारस्य दीर्घः	द्वीपम्, अन्तरीपम्, प्रतीपम्, समीपम्

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
सन्धिविषयकाणि सूत्राणि			
२०. उपसर्गादृतिधातौ	६।१।९१	अवर्णान्ताद् उपसर्गाद् ऋकारादौ धातौ परे पूर्वपरयोः स्थाने वृद्धिः एकादेशः	प्रार्च्छति, उपार्च्छति
२१. वासुप्यापिशलेः	६।१।९२	अवर्णान्तादुपसर्गाद् ऋकारादौ नाम-धातौ परे आपिशलेः आचार्यस्यमते विकल्पेन वृद्धिः अन्येषामाचार्याणां मते न वृद्धिः भवति	प्रार्षभीयति, प्रर्षभीयति (प्र + ऋषभीयति)
२२. एङि पररूपम्	६।१।९४	अवर्णान्तादुपसर्गाद् एकारादौ, ओकारादौ वा धातौ परे पूर्वपरयोः स्थाने पररूपं भवति	प्रेजते (प्र + एजते) उपोषति (उप+ ओषति)
वैदिक सूत्राणि			
२३. उपसर्गाच्छन्दसि धात्वर्थे	५।१।११८	वेदे उपसर्गाद्वतिप्रत्ययः तदुपस-गार्थयुक्तक्रियायाः साधने इत्यर्थे	उद्वतः (अत्र उद्वत् इति नाव्ययम् अतोविभक्ते र्न लोपः)
२४. निष्ठोपसर्गपूर्वमन्य-तरस्याम्	६।२।११०	उपसर्गपूर्वं निष्ठान्तं यत् पूर्वपदं तस्यान्तः बहुव्रीहौ उदात्तः भवति	प्रधौतमुखः
२५. उपसर्गात्स्वाङ्गं ध्रुवमपर्शु	६।२।११७	उपसर्गात्परं यत् पर्शुभिन्नं ध्रुवस्वाङ्ग-वाचकमुत्तरपदं तस्यान्तः बहुव्रीहौ उदात्तः (ध्रुवमेकरूपमुच्यते)	प्रोदरः
२६. उपसर्गव्यपेतं च	८।१।३८	यावद्यथाभ्यां युक्तमुपसर्गेण व्यय-हितमपि तिङन्तं, पूजायां विषये अनुदात्तं न भवति इति न, किन्तु अनुदात्तमेव भवति। पूजायां नान-न्तरमिति पूर्वसूत्रेण अव्यवहितमि-त्युक्तम्। अयं सूत्रारम्भः उपसर्ग-व्यवधानार्थः।	यावत् प्रपचति शोभनम्, यथा प्रपचति शोभनम्
२७. विभाषितं सोपसर्ग-मनुत्तमम्	८।१।५३	लोट्प्रत्ययान्तगत्यर्थधातुना युक्तम् उत्तमपुरुषभिन्नं लोडन्तं सोपसर्गं पदम् विकल्पेन अनुदात्तं न भवति, उभाभ्यां लोडन्ताभ्यां प्रदर्शितं कारकं परस्परं सर्वं पृथग् न भवेत् चेत्।	आगच्छ देव ग्रामं प्रविश

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
षत्वविषयकाणि सूत्राणि			
२८. उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्	८।३।६५	उपसर्गस्थनिमित्ताद् इणः परेषाम् सुञ्, सू, सो, स्तु, स्तुभ्, स्था सेनय (णिजन्तोनामधातुः) सिध्, सिच्, सञ्ज, स्वञ्ज् इत्येतेषां धातूनां सकारस्य षकारः भवति	अभिषुणोति, अभिषुवति अभिष्यति, अभिष्टौति परिष्टोभते, परिष्ठास्यति अभिषेणयति, निषेधति परिषिञ्चति, परिषजति, परिष्वजते
२९. सदिरप्रतेः	८।३।६६	प्रतिभिन्नोपसर्गस्थाद् इणः परस्य सद्धातोः सकारस्य षकारः	विषीदति (प्रतेस्तु–प्रतिसीदन्ति)
३०. स्तम्भेः	८।३।६७	उपसर्गस्थाद् इणः परस्य सौत्रस्य स्तम्भ्धातोः सकारस्य षकारः	परिष्टभ्नाति
३१. उपसर्ग प्रादुर्भ्यामस्तिर्यच्परः	८।३।८७	उपसर्गस्थाद् इणः अथवा प्रादुस्शब्दात्परस्य अस्धातोः सकारस्य षकारः भवति यदि सकारादग्रे यकारः, स्वरो वा भवेत्	अभिषन्ति, प्रादुःषन्ति अभिष्यात्, प्रादुःष्यात्
णत्वविषयके सूत्रे			
३२. उपसर्गादसमासेऽपि णोपदेशस्य	८।४।१४	उपसर्गस्थरेफषकाराभ्यां परस्य णोपदेशस्य धातोः नकारस्य णकारः समासे असमासेऽपि	प्रणमति (असमासे) प्रणामः (समासे)
३३. उपसर्गादनोत्परः	८।४।२८	उपसर्गस्थरेफषकाराभ्यां परस्य नसः नकारस्य णकारः बहुलम् (ओत्परस्य णकारस्यणत्वं न इति सूत्रकारमते अर्थः, तेन प्रनोमुञ्चतम् इत्यत्रन णत्वम्)	प्रणसः

(१० अनुपसर्गपदघटितानि सूत्राणि)

आत्मनेपदविधायके सूत्रे			
३४. अनुपसर्गाद्वा	१।३।४३	क्रम्धातोः विकल्पेनात्मनेपदम् भवति पूर्वम् उपसर्गे असति	क्रामति, क्रमते (उपसर्गे तु संक्रामति) अप्राप्तविभाषेयम्
३५. अनुपसर्गाज्ज्ञः	१।३।७६	कर्तृगामिनि क्रियाफले सति ज्ञा- (जानातेः) धातोः आत्मनेपदम् पूर्वम् उपसर्गे असति (सकर्मकार्थमिदम्। अकर्मके अकर्मकाच्च इति सिद्धम्)	गां जानीते (उपसर्गे तु स्वर्गं लोकं न प्रजानाति मूढः)

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
कृत्प्रत्ययविषयकाणि सूत्राणि			
३६. गदमदचरयमश्चानुपसर्गे	३।१।१००	गद्, मद्, चर्, यम् एभ्यः धातुभ्यः कृत्यसंज्ञकः यत्प्रत्ययः पूर्वमुपसर्गे असति ।	गद्यम्, मद्यम्, चर्यम्, यम्यम् (उपसर्गे तु प्रगाद्यमादि)
३७. अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसाति साहिभ्यश्च	३।१।१३८	लिम्प्‌विन्द धातुभ्याम्, धारिपारि वेदि, उदुपसर्गपूर्वकः एजिः चेति साति साहि एभ्यः सप्तभ्यः णिजन्तधातुभ्यः च कर्तरि शप्रत्ययः पूर्वम् उपसर्गे असति	लिम्पः, विन्दः, धारयः, पारयः, वेदयः, उदेजयः, चेतयः, सातयः: साहयः (उपसर्गे तु–प्रलिम्पः आदि)
३८. दुन्योरनुपसर्गे	३।१।१४२	दुनीधातुभ्यां णप्रत्ययः भवति पूर्वम् उपसर्गे असति	दावः नायः (उपसर्गे तु प्रदवः प्रणयः)
३९. आतोऽनुपर्गे कः	३।२।३	कर्मकारके उपपदे आकारान्तधातुभ्यः कप्रत्ययः पूर्वम् उपसर्गे असति	गोदः (उपसर्गे तु गोसन्दायः
४० श्रिणीभुवोऽनुपसर्गे	३।३।२४	श्रि, नी, भू एभ्यो धातुभ्यो घञ् प्रत्ययः पूर्वम् उपसर्गे असति	(श्रायः, नायः, भावः उपसर्गे तु प्रश्रयः आदि)
४१. व्यधजपोरनुपसर्गे	३।३।६१	व्यध् जप् धातुभ्याम् अप्रत्ययः पूर्वम् उपसर्गे असति	व्यधः जपः (उपसर्गे तु आव्याधा, उपजापा)
४२. मदोऽनुपसर्गे	३।३।६७	मद्धातोः अप्रत्ययः पूर्वम् उपसर्गे असति	विद्यामदः (उपसर्गे तु उन्मादः)
४३. भावेऽनुपसर्गस्य	३।३।७५	ह्वधातोः भावे अप्स्यात् धातोः वकारस्य च सम्प्रसारणम् पूर्वमुपसर्गे असति	हवः (उपसर्गे तु आह्वायः)
४४. अनुपसर्गात् फुल्ल क्षीब्र-कृशोल्लाघाः	८।२।५५	फुल्लः, क्षीब्रः, कृशः, उल्लाघः एते निष्ठायां निपाद्यन्ते, पूर्वम् उपसर्गे असति	फुल्लः, क्षीब्रः, कृशः, उल्लाघः (उपसर्गे तु प्रफुल्तः, प्रक्षीब्रितः, प्रकृशितः प्रोल्लाघितः)
श्यन्‌विकल्पविधायकं सूत्रम्			
४५. यसोऽनुपसर्गात्	३।१।७१	दिवादिगणस्थात् यस् धातोः कर्तरि सार्वधातुके श्यन्‌विकरणं विकल्पेन भवति पूर्वम् उपसर्गे असति	यस्यति, यसति (शप्) (उपसर्गे तु नित्यमेव श्यन् प्रयस्यति)

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
वैदिकसूत्रे			
४६. मिश्रं चानुपसर्गमसन्धौ	६।२।१५४	तृतीयान्तात्परस्य उपसर्गरहितस्य मिश्रशब्दस्य अन्तः उदात्तः सन्धौ अर्थे गम्यमाने (प्रस्तावादिषु-यदि भवानिदं कुर्यादहमपि भवतः कार्यं करिष्यामीति परिभाषणं सन्धिः)	गुडमिश्राः (उपसर्गे तु गुडसंमिश्राः) सन्धौ–ब्राह्मणमिश्रोराजा (परिभाषणं कृत्वा ब्राह्मणैः सह सम्मिलित इत्यर्थः। नात्रान्तोदात्तः)
४७. किंक्रियाप्रश्नेऽनुपसर्गम-प्रतिषिद्धम्	८।१।४४	क्रियाप्रश्ने वर्तमानेन किं शब्देन युक्तं तिङन्तम् उपसर्गरहितं न अनुदात्तं, तस्याः क्रियाया निषेधे गम्यमाने असति	किं देवदत्तः पचति आ-होस्विद् गच्छति ? (उप-सर्गे तु किं प्रपचति उत प्रकरोति ?)

(११) (१ प्र)

१. समवप्रविभ्यः स्थः	१।३।२२	स्थाधातोः आत्मनेपदम्	प्रतिष्ठते
२. प्रोपाभ्यां समर्थाभ्याम्	१।३।४२	क्रम्धातोः आत्मनेपदम्	प्रक्रमते भोक्तुम्
३. प्रोपाभ्यां युजेरयज्ञेपात्रेषु	१।३।६४	अकर्त्रभिप्राये आत्मनेपदम्	प्रयुङ्क्ते (यज्ञपात्रेतु द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति)
४. प्राद्वहः	१।३।८१	परस्मैपदम्	प्रवहति
५. प्रेदाज्ञः	३।२।६	कप्रत्ययः	सर्वप्रदः, पथिप्रज्ञः
६. प्रेलपसृद्रुमथवदवसः	३।२।४५	घिनुण्प्रत्ययः	प्रलापी प्रसारी आदि
७. विप्रसंभ्योड्वसंज्ञायाम्	३।२।१८०	डुप्रत्ययः	प्रभुः
८. प्रेद्रुस्तुस्रुवः	३।३।२७	घञ्	प्रद्रावः, प्रस्तावः, प्रस्रावः
९. प्रेस्त्रोऽयज्ञे	३।३।३२	घञ्	शङ्खप्रस्तारः
१०. प्रेलिप्सायाम्	३।३।४६	घञ्	पात्रप्रग्राहेण चरति भिक्षुः
११. प्रे वणिजाम्	३।३।५२	घञ्	तुलाप्रग्राहः, तुलाप्रग्रहः
१२. प्रसंभ्यांजानुनोर्ज्ञुः	५।४।१२९	जानुशब्दस्य ज्ञुः	प्रज्ञुः
१३. प्रनिरन्तः शरेक्षुप्लक्षाम्र-कार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि	८।४।५	प्राद् वनस्य णत्वम्	प्रवणम्
१४. संप्रोदश्च कटच्	५।२।२९	कटच् प्रत्ययः	प्रकटम्
१५. प्राद्स्वाङ्गं संज्ञायाम्	६।२।१८३	अस्वाङ्गवाचि अन्तोदात्तम्	प्रगृहम् (स्वाङ्गे प्रपदम्)
१६. प्रसमुपोदः पादपूरणे	८।१।६	पादपूरणे द्वित्वम्	प्रप्रायमग्निर्भरतस्य शृण्वे

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
(२ परा)			
१. विपराभ्यां जेः	१।३।१९	आत्मनेपदम्	पराजयते
२. उपपराभ्याम्	१।३।३९	वृत्त्यादिष्वर्थेषु क्रम्धातोः आत्मनेपदम्	पराक्रमते
३. अनुपराभ्यां कृञः	१।३।७९	कृञः परस्मैपदम्	पराकरोति
४. पराजेरसोढः	१।४।२६	पराजेः प्रयोगे असह्योर्थः अपादानम्	अध्ययनात्पराजयते
(३ अप)			
१. अपाद्वदः	१।३।७३	आत्मनेपदम्	न्यायमपवदते
२. अपे क्लेशतमसोः	३।२।५०	डप्रत्ययः	क्लेशापहः, तमोपहः
३. अपे च लषः	३।२।१४४	घिनुण्	अपलाषी
४. अपाच्चतुष्पाच्छकुनिष्वालेखने	६।१।१४२	कात्पूर्वः सुट्	अपस्किरते कुक्कुटः
५. अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः	८।३।९७	अम्बादिभ्यः परस्य स्थाधातोः षत्वम्	द्विष्ठः
६. अपपरी वर्जने	१।४।८८	कर्मप्रवचनीयः	अपत्रिगर्तेभ्यः
७. अपपरिबहिरञ्चवः पञ्चम्या	२।१।१२	अव्ययीभावः	अपविष्णु संसारः
८. पञ्चम्यपाङ्परिभिः	२।३।१०	कर्मप्रवचनीयैर्योगे पञ्चमी	अपहरेः संसारः
९. परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु	६।२।३३	उत्तरपदे प्रकृतिस्वरः	अपसौवीरम्
१०. अपाच्च	६।२।१८६	अपात्परं मुखमन्तोदात्ताम्	अपमुखः
(४ सम्)			
१. क्रीडोऽनुसम्परिभ्यश्च	१।३।२१	आत्मनेपदम्	संक्रीडते
२. समवप्रविभ्यः स्थः	१।२।२२	आत्मनेपदम्	सन्तिष्ठते
३. समो गम्यृच्छिभ्याम्	१।३।२९	आत्मनेपदम्	सङ्गच्छते, समृच्छते
४. निसमुपविभ्योह्वः	१।३।३०	आत्मनेपदम्	संह्वयते
५. संप्रतिभ्यामनाध्याने	१।३।४६	जानातेः आत्मनेपदम्	शतं संजानीते

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
६. समः प्रतिज्ञाने	१।३।५२	गिरतेः आत्मनेपदम्	शतं संगिरते
७. समस्तृतीयायुक्तात्	१।३।५४	चरतेः आत्मनेपदम्	अश्वेन सञ्चरते
८. समः क्ष्णुवः	१।३।६५	क्ष्णुधातोः आत्मनेपदम्	संक्ष्णुते शस्त्रम्
९. समुदाङ्भ्यो यमोऽग्रन्थे	१।३।७५	यम्धातोः आत्मनेपदम्	व्रीहीन् संयच्छते
१०. समिख्यः	३।२।७	कप्रत्ययः	गोसंख्यः
११. विप्रसम्भ्यो ड्वसंज्ञायाम्	३।२।१८०	डुप्रत्ययः	संभुः
१२. समि युद्रुदुवः	३।३।२३	घञ्	संयावः, संद्रावः संदावः
१३. यज्ञे समिस्तुवः	३।३।३१	घञ्	संस्तावः छन्दोगानाम्
१४. समि मुष्टौ	३।३।३६	ग्रहेर्घञ्	मल्लस्य संग्राहः
१५. यमः समुपनिविषु च	३।३।६३	अप्, घञ्च विकल्पेन	संयमः संयामः
१६. समुदोरजः पशुषु	३।३।६९	अप्प्रत्ययः	समजः पशूनाम्
१७. प्रसंभ्यां जानुनोर्ज्ञुः	५।४।१२९	जानुशब्दस्य ज्ञुः	संज्ञुः
१८. संपरिभ्यां करोतौ भूषणे	६।१।१३७	सुट्	संस्कर्ता
१९. समः समि	६।३।९३	अञ्चतौ समः सम्यादेशः	सम्यङ्
२०. अर्देः संनिविभ्यः	७।२।२४	निष्ठायामिडागमो न	समर्णः
२१. समः सुटि	८।३।५	रुत्वम्	सँस्कर्ता
२२. मो राजि समः क्वौ	८।३।२५	समो मकारस्य मकारः	सम्राट्
२३. मातुरुत्संख्यासंभद्रपूर्वायाः	४।१।११५	अण्प्रत्ययः उकारश्चान्तादेशः	सांमातुरः
२४. संपूर्वात्ख च	५।१।९२	खः छः च प्रत्ययः	संवत्सरीणः, संवत्सरीयः
२५. सम्प्रोदश्च कटच्	५।२।२९	कटच् प्रत्ययः	संकटम्
२६. अवसमन्धेभ्यस्तमसः	५।४।७९	अच् समासान्तः	सन्तमसम्
२७. प्रसमुपोदः पादपूरणे	८।१।६	पादपूरणे द्वित्वम्	संसमिद्युवसे वृषन्

(५ अनु)

१. अनोरकर्मकात्	१।३।४९	वद् धातोः आत्मनेपदम्	अनुवदते
२. नानोर्ज्ञः	१।३।५८	सन्नन्तात् ज्ञाधातोरात्मनेपदम् न	पुत्रमनुजिज्ञासति
३. अनुपराभ्यां कृञः	१।३।७९	कृधातोः परस्मैपदम्	अनुकरोति
४. अनुप्रतिगृणश्च	१।४।४१	सम्प्रदानसंज्ञा	होत्रेनुगृणाति
५. उपान्वध्याङ्वसः	१।४।४८	वसतेराधारः कर्म	ग्राममनुवसति
६. अच्प्रत्यन्ववपूर्वात् सामलोम्नः	५।४।७५	समासान्तः अच्	अनुसामम्, अनुलोमम्
७. अन्ववतप्ताद्रहसः	५।४।८१	समासान्तः अच्	अनुरहसम्

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
८. अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु	८।३।७२	ठञ् तद्धितः	अनुष्यन्दते, अनुस्यन्दते
९. लक्षणेत्थंभूताख्यान भागवीप्सासुप्रतिपर्यनवः	१।४।९०	सकारस्य विकल्पेन षत्वम्	वृक्षमनु इत्यादि
१०. तप्रत्यनुपूर्वमीपलोम-कूलम्	४।४।२८	कमप्रवचनीयः	आन्वीपिकः
११. ग्रामात्पर्यनुपूर्वात्	४।३।६१	ठक् तद्धितः	आनुग्रामिकः

(६ अव)

१. परिव्यवेभ्यः क्रियः	१।३।१८	आत्मनेपदम्	अवक्रीणीते
२. समवप्रविभ्यः स्थः	१।३।२२	आत्मनेपदम्	अवतिष्ठते
३. अवे यजः	३।२।७२	ण्विन् प्रत्ययः	त्वं यज्ञे वरुणस्यावया असि
४. अवोदोर्नियः	३।३।२६	घञ्	अवनायः
५. आक्रोशेऽवन्योर्ग्रहः	३।३।४५	घञ्	अवग्राहः
६. अवेग्रहोवर्षप्रतिबन्धे	३।३।५१	विकल्पेन घञ्	अवग्राहः, अवग्रहः
७. अवे तृस्त्रोर्घञ्	३।३।१२०	घञ्	अवतारः, अवस्तारः
८. अवसमन्धेभ्यस्तमसः	५।४।७९	समासान्तः अच्	अवतमसम्
९. अन्ववतप्ताद्रहसः	५।४।८१	समासान्तः अच्	अवरहसम्
१०.अवाच्चालम्बनाविदूर्ययोः	८।३।६८	स्तन्भेः सकारस्यषकारः	अवष्टभ्य आस्ते, अवष्टब्धा सेना
११. अवात्कुटारच्च	५।२।३०	कुटारच् कटच् प्रत्ययौ	अवकुटारम्, अवकटम्

(७ निस्)

१. निसस्तपतावनासेवने	८।३।१०२	षत्वम्	निष्टपति
२. अभिनिसः स्तनः शब्दसंज्ञायाम्		वा षकारः अभिनिसः परस्य	अभिनिष्टानः, अभिनिस्तानः

(८ निर्)

१. अलंकृञ् निराकृञ् प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्	३।२।३६	इष्णुच् प्रत्ययः	निराकरिष्णुः
२. निरः कुषः	७।२।४६	वा इडागमः	निष्कोषिता निष्कोष्टा
३. स्फुरतिस्फुलत्योर्निर्नि विभ्यः	८।३।७६	वा षकारः	निष्फुरति–निस्फुरति

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
४. सुविनिर्दुर्भ्यः सुपिसूति समाः		सस्य षकारः	दुःषुप्तः, दुःषूतिः, दुःषमः
५. प्रनिरन्तः शरेक्षुप्लक्षाम्र-कार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि	८।४।५	णत्वम्	निर्वणम्

(९ दुस्)

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
१. ईषद्दुःसुषुकृच्छ्राकृच्छ्रा-र्थेषु खल्	३।३।१२६	खल् प्रत्ययः	दुष्करः
२. नञ्दुःसुभ्योहलिसक्थ्यो-रन्यतरस्याम्	५।४।१२१	बहुव्रीहौ अच्	दुर्हलः दुर्हलिः

(१० दुर्)

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
१. न सुदुर्भ्यां केवलाभ्याम्	७।१।६८	लभेर्नुमून खल्घञोः	दुर्लभम्, दुर्लभः
२. सुविनिर्दुर्भ्यः सुपिसूति समाः	८।३।८८	षकारः	दुःषुप्तः, दुःषूतिः, दुःषमः

(११ वि)

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
१. परिव्यवेभ्यः क्रियः	१।३।१८	आत्मनेपदम्	विक्रीणीते
२. विपराभ्यां जेः	१।३।१९	आत्मनेपदम्	विजयते
३. समवप्रविभ्यः स्थः	१।३।२२	आत्मनेपदम्	वितिष्ठते
४. उद्विभ्यां तपः	१।३।२७	आत्मनेपदम्	वितपते
५. निसमुपविभ्योह्वः	१।३।३०	आत्मनेपदम्	विह्वयते
६. वेः शब्दकर्मणः	१।३।३४	कृञः आत्मनेपदम्	विकुर्वते सैन्धवाः
७. वेः पादविहरणे	१।३।४१	क्रमेः आत्मनेपदम्	सुष्ठु विक्रमते वाजी
८. व्याङ्परिभ्यो रमः	१।३।८३	परस्मैपदम्	विरमति
९. वौकषलसकत्थस्रम्भः	३।२।१४३	घिनुण्	विलाषी
१०. विप्रसम्भ्योड्वसंज्ञायाम्	३।२।१८०	भूधातोः डुप्रत्ययः	विभुः
११. वौक्षुश्रुवः	३।३।२५	घञ्	विक्षावः, विश्रावः
१२. व्युपयोः शेतेः पर्याये	३।३।३९	घञ्	विशायः
१३. यमः समुपनिविषु च	३।३।६३	वा अप् स्यात्	वियमः, वियामः
१४. ह्वः सम्प्रसारणं च न्यभ्युपविषु	३।३।७२	सम्प्रसारणम्, अप्प्रत्ययश्च	विहवः

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
१५. करणेऽयोविद्रुषु	३।३।८२	हन्धातोः अप् घनादेशश्च	विघनः
१६. उद्विभ्यां काकुदस्य	५।४।१४८	बहुव्रीहौ काकुदान्त्यस्य लोपः	विकाकुत्
१७. संख्याविसायपूर्वस्याह्न-स्याहनन्यतरस्यां ङौ	६।३।११०	संख्यादिपूर्वस्याह्नस्य अहन्	व्यहनि, व्यह्नि, व्यह्ने
१८. अर्देः सन्निविभ्यः	७।२।२४	निष्ठायामिडागमो न	व्यर्णः
१९. वेश्चस्वनोभोजने	८।३।६९	सकारस्य षकारः	विष्वणति
२०. परिनिविभ्यः सेवसितसय सिवुसहसुट्स्तुस्वञ्जाम्	८।३।७०	सकारस्य षत्वम्	विषेवते
२१. अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु	८।३।७२	वा सकारस्य षकारः	विष्यन्दते, विस्यन्दते
२२. वेः स्कन्देरनिष्ठायाम्	८।३।७३	सकारस्य वा षकारः	विष्कन्ता, विस्कन्ता
२३. स्फुरति स्फुलत्योर्निर्नि-विभ्यः	८।३।७६	सकारस्य वा षकारः	विष्फुरति–विस्फुरति, विष्फुलति-विस्फुलति
२४. वेः स्कम्नातेर्नित्यम्	८।३।७७	सकारस्य षकारः	विष्कम्नाति
२५. सुविनिर्दुर्भ्यः सुपिसूति समाः	८।३।८८	सकारस्य षकारः	विषुप्तिः,विषूतिः, विषमम्
२६. विकुशमिपरिभ्यः स्थलम्	८।३।९६	सकारस्य षकारः	विष्ठलम्
२७. निव्यभिभ्योड्व्यवायेवा छन्दसि	८।३।११९	वेदे सस्य षो वा	व्यषीदत्–व्यसीदत्
२८. विनञ्भ्यांनानाञौ न सह	५।२।२७	नाप्रत्ययः	विना
२९. वेः शालच्छंकटचौ	५।२।२८	शालच्, शंकटच् प्रत्ययौ	विशालम्, विशङ्कटम्
३०. न निविभ्याम्	६।२।१८१	अन्तःशब्दः नानुदात्तः	व्यन्तः

(१२ आङ)

१. आङोदोऽनास्य विहरणे	१।३।२०	दाधातोः आत्मनेपदम्	आदत्ते
२. आङोयमहनः	१।३।२८	आत्मनेपदम्	आयच्छते, आहते
३. स्पर्धायामाङः	१।३।३१	ह्वयतेः आत्मनेपदम्	आह्वयते
४. आङउद्गमने	१।३।४०	आत्मनेपदं क्रमधातोः	आक्रमते
५. प्रत्याङ्भ्यां श्रुवः	१।३।५९	शृणोतेः सन्नन्तादात्मनेपदम् न भवति	आशुश्रूषति
६. समुदाङ्भ्योयमोऽग्रन्थे	१।३।७५	आत्मनेपदम्	आयच्छते
७. व्याङ्परिभ्यो रमः	१।३।८३	परस्मैपदम्	आरमति
८. प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता	१।४।४०	कारकं सम्प्रदानं स्यात्	देवदत्ताय गाम् आशृणोति

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
९. उपन्वध्याङ्वसः	१।४।४८	वसतेराधारः कर्म	ग्रामम् आवसति
१०. आङि्ताच्छील्ये	३।२।११	हरतेः अच् प्रत्ययः	फलाहरः
११. विभाषाङि रुप्लुवोः	३।३।५०	वाघञ्	आरावः, आरवः
१२. आङि युद्धे	३।३।७३	सम्प्रसारणम् अप् प्रत्ययश्च	आहवः
१३. आङ्माङोश्च	६।१।७४	छेपरे तुगागमः	आच्छादयति
१४. आङोयि	७।१।६५	लभेर्नुम्	आलम्भ्यो गौः
१५. अट्कुप्वाङ्नुम्व्यवायेऽपि	८।४।२	रेफषकाराभ्याम् आङ्व्यवधाने नस्यणः	पर्याणद्धम्
१६. आङ् मर्यादावचने	१।४।८९	कर्मप्रवचनीयः	आमुक्तेः संसारः
१७. आङ्मर्यादाभिविध्योः	२।१।१३	पञ्चम्यन्तेन वा समस्यते	आपाटलिपुत्रम् आपाटलिपुत्रात्
१८. पञ्चम्यपाङ्परिभिः	२।३।१०	कर्मप्रवचनीयैर्योगे पञ्चमी	आपाटलिपुत्रात्
१९. आङोनुनासिकश्छन्दसि	६।१।१२६	अनुनासिकादेशः प्रकृत्या	अभ्र आँ अपः

(१३ नि)

१. नेर्विशः	१।३।१७	आत्मनेपदम्	निविशते
२. निसमुपविभ्यो ह्वः	१।३।३०	आत्मनेपदम्	निह्वयते
३. अभिनिविशश्च	१।४।४७	आधारः कर्म	अभिनिविशते ग्रामम्
४. उन्न्योग्रः	३।३।२९	घञ्	निगारः
५. आक्रोशेऽवन्योर्ग्रहः	३।३।४५	घञ्	निग्राहः
६. नौ वृ धान्ये		घञ्	नीवाराः
७. नौणच	३।३।६०	अदेः णः, अप्च	न्यादः, निघसः
८. यमः समुपनिविषु च	३।३।६३	वा अप्	नियमः, नियामः
९. नौ गदनदपठस्वनः	३।३।६४	वा अप्	निगदः, निगादः आदि
१०. ह्वः सम्प्रसारणंच न्यभ्युपविषु	३।३।७२	सम्प्रसरणम् अप् च	निहवः
११. न्यधीच	६।२।५३	प्रकृतिस्वरः	न्यङ्
१२. अर्देः संनिविभ्यः	७।२।२४	इडागमो न	न्यर्णः
१३. परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्	८।३।७०	षत्वम्	निषेवते
१४. अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु	८।३।७२	षत्वम् वा	निष्यन्दते-निस्यन्दते

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
१५. स्फुरतिस्फुलत्योर्निर्नि-विभ्यः	८।३।७६	वाषत्वम्	निष्फुरति–निस्फुरति
१६. निनदीभ्यां स्नातेः कौशले	८।३।८९	षत्वम्	निष्णातः
१७. निव्यभिभ्योऽड्व्यवाये वा छन्दसि	८।३।११९	वा षकारः छन्दसि	न्यषीदत्–न्यसीदत्
१८. नेर्गदनदपतपदघुमास्यति हन्तियातिवातिद्रातिप्साति-वपतिवहतिशाम्यति-चिनोतिदेग्धिषु च	८।४।१७	नकारस्य णकारः	प्रणिगदति इत्यादि
१९. नेर्बिडज्बिरीसचौ	५।२।३२	बिडच्, बिरीसच्, प्रत्ययौ	निबिडम्, निबिरीसम्
२०. ननिविभ्याम्		नान्तोदात्तः	न्यन्तः
२१. नेरनिधाने		उत्तरपदमन्तोदात्तम्	नितृणम्

(१४ अधि)

१. अधेः प्रसहने	१।३।३३	कृञः आत्मनेपदम्	शत्रुम् अधिकुरुते
२. उपान्वध्याङ्वसः	१।४।४८	आधारः कर्म	ग्रामम् अधिवसति
३. अधिपरी अनर्थकौ	१।४।९३	कर्मप्रवचनीयौः	कुतोऽध्यागच्छति
४. अधिरीश्वरे	१।४।९७	कर्मप्रवचनीयः	अधिभुविरामः, अधि-रामेभूः
५. उपाधिभ्यांत्यकन्नासन्ना-रूढयोः	५।२।३४	स्वार्थेत्यकन्	अधित्यका
६. अषडक्षाशितंङ्ग्वलं कर्मालंपुरुषाध्युत्तर-पदात्खः	५।४।७	खः	राजाधीनः
७. न्यधीच	६।२।५३	न्यधीप्रकृतिस्वरौ भवतः	अध्यङ्
८. अधेरुपरिस्थम्	६।२।११८	अन्तोदात्तम्	अधिदन्तः
९. उपर्यध्यधसः सामीप्ये	८।१।७	सामीप्येद्वित्वम्	अध्यधिलोकम्

(१५ अपि)

१. प्रत्यपिभ्यां ग्रहेश्छन्दसि	३।१।११८	छन्दसि ग्रहेः क्यप्	प्रतिगृह्यम्

(१६ अति)

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
१. अभिप्रत्यतिभ्यः क्षिपः	१।३।८०	परस्मैपदम्	अतिक्षिपति
२. अतिरतिक्रमणे च	१।४।९५	कर्मप्रवचनीयः	अतिस्तुतमेव
३. अतेः शुनः	५।४।९६	समासान्तःटच्	अतिश्वः
४. अतेरकृत्पदे	६।२।१९१	अन्तोदात्तः	अतिकशः, अतिपदा शक्वरी

(१७ सु)

१. सुकर्मपापमन्त्रपुण्येषुकृञः	३।२।८९	क्विप्	सुकृत्
२. सुयजोर्ङ्वनिप्	३।२।१०३	ङ्वनिप्	सुत्वा
३. ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषु खल्	३।३।१२६	खल्	सुकरः
४. नसुदुर्भ्यां केवलाभ्याम्	७।१।६८	खल्घञो, परतः नुम् न	सुलभम्-सुलभः
५. सुविनिर्दुर्भ्यःसुपिसूतिसमाः	८।३।८८	षत्वम्	सुषुप्तः, सुषूतिः, सुषमः
६. सुः पूजायाम्	१।४।९४	कर्मप्रवचनीयः	सुसिक्तं भवता
७. नञ्दुःसुभ्योहलिसक्थ्योरन्यतरस्याम्	५।४।१२१	वासमासान्तः अच्	सुहलः सुहलिः
८. जम्भासुहरिततृणसोमेभ्यः	५।४।१२५	समासे जम्भाइति निपात्यते	सुजम्भा
९. गन्धस्येदुत्पूतिसुसुरभिभ्यः	५।४।१३५	समासान्त इकारादेशः	सुगन्धिः
१०. सावेकाचस्तृतीयादिर्विभक्तिः	६।१।१६८	विभक्तिरुदात्ता	वाचा
११. नञ्सुभ्याम्	६।२।१७२	समासे अन्तोदात्तः	सुव्रीहिः
१२. अभेर्मुखम्	६।२।१८५	अन्तोदात्तः	अभिमुखः
१३. सुसर्वार्द्धाज्जनपदस्य	७।३।१२	उत्तरपदस्याद्यचोवृद्धिः	सुपाञ्चालकः

(१८ उद्)

१. उदोनूर्ध्वकर्मणि	१।३।२४	आत्मनेपदम्	उत्तिष्ठते
२. उद्विभ्यां तपः	१।३।२७	आत्मनेपदम्	उत्तपते
३. उदश्चरः सकर्मकात्	१।३।५३	आत्मनेपदम्	उच्चरते
४. समुदाङ्भ्यो यमोऽग्रन्थे	१।३।७५	आत्मनेपरम्	उद्गच्छते

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
५. उदि कूले रुजिवहोः	३।२।३१	खश्प्रत्ययः	कुलमुद्रुजः
६. अवोदोर्नियः	३।३।२६	घञ्	उन्नायः
७. उदिग्रहः	३।३।३५	घञ्	उद्ग्राहः
८. उदि श्रयति यौतिपूद्रुवः	३।३।४९	घञ्	उच्छ्रायः, उद्यावः, उत्पावः
९. समुदोरजः पशुषु	३।३।६९	अप्	उदजः पशूनाम्
१० उद ईत्	६।४।१३९	उदउत्तरस्याच्च ईकारः	उदीचः
११. उदः स्थास्तम्भोः पूर्वस्य	८।४।६१	पूर्वसवर्णः	उत्थानम्, उत्तम्भनम्
१२. सम्प्रोदश्च कटच्	५। ।२९	कटच्	उत्कटम्
१३. उद्विभ्यां काकुदस्य	५। ।१४८	काकुदान्त्यस्य लोपः	उत्काकुत्
१४. प्रसमुपोदः पादपूरणे	८।१।६	द्विर्वचनम्	किं नोदुदु हर्षसे दातवा

(१९ अभि)

१. अभिप्रत्यतिभ्यः क्षिपः	१।३।८०	परस्मैपदम्	अभिक्षिपति
२. अभिनिविशश्च	१।४।४७	आधारः कर्म	ग्राममभिनिविशते
३. निरभ्योः पूल्वोः		यथासंख्यंघञ्	अभिलावः
४. ह्वः सम्प्रसारणं च न्यभ्युपविषु	३।३।७२	सम्प्रसारणमप्प्रत्ययश्च	अभिहवः
५. विभाषाभ्यवपूर्वस्य	६।१।२६	विकल्पेन सम्प्रसारणम्	अभिशीनम्, अभिश्यानम्
६. अभेश्चाविदूर्ये	७।२।२५	इडागमो न	अभ्यर्णा सेना
७. अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु	८।३।७२	सकारस्य वा षकारः	अभिष्यन्दते–अभिस्यन्दते
८. निव्यभिभ्योऽड्व्यवाये वा छन्दसि	८।३।११९	वा षकारः	अभ्यषीदत्, अभ्यसीद
९. अभिरभागे	१।४।९१	कर्मप्रवचनीयः	वृक्षमभि इत्यादि
१०, लक्षणेनाभिप्रती आभिमुख्ये	२।१।१४	अव्ययीभावः	अभ्यग्नि, अग्निमभि
११. पर्यभिभ्यां च	५।३।९	तसिल्	अभितः
१२. अभेर्मुखम्	६।२।१८५	अन्तोदात्तः	अभिमुखः

(२० प्रति)

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
१. सम्प्रतिभ्यामनाध्याने	१।३।४६	जानातेः आत्मनेपदम्	शतं प्रतिजानीते
२. प्रत्याङ्भ्यां श्रुवः	१।३।५९	शृणोतेः सन्नन्तादात्मनेपदम्	प्रतिशुश्रूषते
३. अभिप्रत्यतिभ्यः क्षिपः	१।३।८०	परस्मैपदम्	प्रतिक्षिपति
४. प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता	१।४।४०	कारकं सम्प्रदानम्	विप्राय गां प्रतिशृणोति
५. प्रत्यभिभ्यां ग्रहेश्छन्दसि	३।१।११८	छन्दसि क्यप्	प्रतिगृह्यम्
६. लक्षणेत्थंभूताख्यान-भागवीप्सासुप्रतिपर्यनवः	१।४।९०	कर्मप्रवचनीयः	वृक्षं प्रति आदि
७. लक्षणेनाभिप्रती आभि-मुख्ये	२।१।१४	अव्ययीभावः	प्रत्यग्नि, अग्निं प्रति
८. तत्प्रत्यनुपूर्वमीपलोम-कूलम्	४।४।२८	ठक् तद्धितः	प्रातीपिकः
९. अच् प्रत्यन्वपूर्वात्सा-मलोम्नः	५।४।७५	अच् समासान्तः	प्रतिसामम्, प्रतिलोमम्
१०. परिप्रत्युपापावर्ज्यमाना-होरात्रावयवेषु	६।२।३३	प्रकृतिस्वरः	प्रतिपूर्वाह्णम्

(२१ परि)

१. परिव्यवेभ्यः क्रियः	१।३।१८	आत्मनेपदम्	परिक्रीणीते
२. क्रीडोनुसम्परिभ्यश्च	१।३।२१	आत्मनेपदम्	परिक्रीडते
३. परेर्मृषः	१।३।८२	परस्मैपदम्	परिमृष्यति
४. व्याङ्परिभ्यो रमः	१।३।८३	परस्मैपदम्	परिरमति
५. परिन्योर्नीणोर्द्यूताभ्रेषयोः	३।३।३७	घञ्	परिणायः
६. परावनुपात्यय इणः	३।३।३८	घञ्	पर्यायः

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
७. परौ यज्ञे	३।३।४७	घञ्	उत्तरपरिग्राहः
८. परौभुवोऽवज्ञाने	३।३।५५	वा घञ्	परिभावः। परिभवः
९. परौघः	३।३।८४	हन्तेः अप् घरचादेशः	परिघः
१०. विभाषा परेः	६।१।४४	व्येञः ल्यपि वा सम्प्रसारणम्	परिवीय, परिव्याय
११. संपर्युपेभ्यः करोतौभूषणे	६।१।१३३	सुट्	परिष्करोति
१२. परेश्च घाङ्कयोः	८।२।२२	रेफस्य लकारो वा	पलिघः, परिघः
१३. परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्	८।३।७०	षत्वम्	परिषेवते इत्यादि
१४. अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु	८।३।७२	सकारस्य वा षकारः	परिष्यन्दते परिस्यन्दते
१५. परेश्च	८।३।४७	स्कन्देः वा षत्वम्	परिष्कन्ता–परिस्कन्ता
१६. विकुशमिपरिभ्यः स्थलम्	८।३।९६	सकारस्य षकारः	परिष्ठलम्
१७. अपपरी वर्जने	१।४।८८	कर्मप्रवचनीयौ	परि त्रिगर्तेभ्यः
१८. लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः	१।४।९०	कर्मप्रवचनीयाः	वृक्षं परि
१९. अधिपरी अनर्थकौ	१।४।९३	कर्मप्रवचनीयौ	कुतः पर्यागच्छति
२०. अक्षशलाकासंख्याः परिणा	२।१।१०	अव्ययीभावः	अक्षपरि, शलाकापरि, एकपरि
२१. अपपरिबहिरञ्चवः पञ्चम्या	२।१।१२	अव्ययीभावः	परिहरेः संसारः
२२. पञ्चम्यपाङ्परिभिः	२।३।१०	पञ्चमी विभक्तिः	परिपरि त्रिगर्तेभ्यः
२३. ग्रामात्पर्यनुपूर्वात्	४।३।६१	ठञ् तद्धितः	पारिग्रामिकः
२४. पर्यभिभ्यांच	५।३।९	तसिल्	परितः

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
२५. परिप्रत्युपापावर्ज्यमाना-होरात्रावयवेषु	६।२।३३	प्रकृतिस्वरः	परिसौवीरम्
२६. परेरभितोभाविमण्डलम्	६।२।१८२	अन्तोदान्तः	परिकूलम्
२७. परेर्वर्जने	८।१।५	द्वित्वम्	परि–परि त्रिगर्तेभ्यः
२८. पञ्चम्याः परावध्यर्थे	८।१।५१	सकारादेशः	दिवसरि

(२२ उप)

१. उपान्मन्त्रकरणे	१।३।२५	स्थाधातोरात्मनेपदम्	ऐन्द्रयागार्हपत्यमुपतिष्ठते
२. निसमुपविभ्योह्वः	१।३।३०	आत्मनेपदम्	उपह्वयते
३. उपपराभ्याम्	१।३।३९	क्रमेः आत्मनेपदम्	उपक्रमते
४. प्रोपाभ्यां समर्थाभ्याम्	१।३।४२	क्रमेः आत्मनेपदम्	उपक्रमते
५. उपाद्यमः स्वकरणे	१।३।५६	यमः आत्मनेपदम्	भार्यामुपयच्छते
६. प्रोपाभ्यां युजेरयज्ञपात्रेषु	१।३।६४	आत्मनेपदम्	उपयुङ्क्ते
७. उपाच्च	१।३।८४	रमः परस्मैपदम्	देवदत्तमुपरमति
८. उपान्वध्याङ्वसः	१।४।४८	आधारः कर्मसंज्ञः	उपवसति वैकुण्ठं हरिः
९. विजुपे छन्दसि	३।३।७३	विच्	उपयट्
१०. सप्तम्यांचोपपीडरुधकर्षः	३।४।४९	णमुल्	पार्श्वोपपीडं शेते इत्यादि
११. संपर्युपेभ्यः करोतौ भूषणे	६।१।१३७	सुट्	उपस्कर्ता
१२. उपात्प्रतियत्नवैकृत-वाक्याध्याहारेषु	६।१।१३९	सुट्	उपस्कुरुते
१३. उपात्प्रशंसायाम्	७।१।६६	लभेः नुम्	उपलम्भ्यः
१४. उपोधिके च	१।४।८७	कर्मप्रवचनीयः	उपहरिं सुराः

क्रमाङ्कः सूत्रम्	अध्यायपाद सूत्राङ्काः	सूत्रार्थः	उदाहरणम्
१५. उपाधिभ्यां त्यकन्नासन्ना-रूढयोः	५।२।३४	त्यकन्	उपत्यका
१६. परिप्रत्युपापावर्ज्यमाना-होरात्रावयवेषु	६।२।३३	प्रकृतिस्वरः	उपपूर्वाह्णम्
१७. उपाद् द्व्यजजिनमगौ-रादयः	६।२।१९४	अन्तोदात्तः	उपसोमः
१८. प्रसमुपोदः पादपूरणे	८।१।६	द्वित्वम्	उपोप मे परामृश

श्रीपाणिनीयोपसर्गगतिरत्र निर्दशिता ।
प्रेरको लेखकोऽध्येता सुखी भूयात् प्रकाशकः ॥

॥ इति शम् ॥

काव्यपुरुष

श्रीरामनिहाल शर्मा

राजशेखर ने अपनी **काव्यमीमांसा** में[1] एक अत्यन्त रोचक तथा महत्वपूर्ण वृत्तान्त का वर्णन किया है। रोचकता लाने का श्रेय राजशेखर की भाषा और शैली को है। यह वृत्तान्त है काव्य के जन्म एवं छन्दोमयी वाणी की उत्पत्ति का। प्रायः विद्वानों ने लिखा है कि यह राजशेखर की सर्वथा नवीन कल्पना है। तथापि ये, अधिक छान बीन करने के कारण, जितनी मात्रा में इसे मौलिक मानते है उतनी है नहीं; क्योंकि इस कथा के मूल स्रोतों के इस निबन्ध में प्रस्तुत किये गये विवरण को देख लेने पर वह धारणा शिथिल हो जाती है। किन्तु इसके साथ-साथ इस कथा की गम्भीरता और गौरव भी प्रकाशित होते हैं। यह तो मानना ही पड़ेगा कि यह वर्णन पूर्णता की दृष्टि से सर्वथा नवीन है। इस में राजशेखर ने जो दृष्टि अपनायी है वह किसी भी जिज्ञासु, को आकृष्ट करने वाली है। यह दृष्टि है अनुसन्धानात्मक। इसके लिये उन्होंने पौराणिक शैली अपनायी है। अनुसन्धान के महत्व पर उनका मत इस प्रकार है—

अनुसन्धानशून्यस्य भूषणं दूषणायते।
सावधानस्य च कवेर्दूषणं भूषणायते॥

[अनुसन्धन-शून्य (कवि) का भूषण भी दूषण की तरह हो जाता है और (रचना में) सावधान रहने वाले कवि का दोष भी भूषण की तरह हो जाता है।]

प्रतिपाद्य विषय—राजशेखर ने काव्यपुरुष का विस्तृत वर्णन किया है। इसी प्रसङ्ग में इन्होंने आदि-कवि-काव्यपुरुष के कवित्व लाभ के पश्चात् शुक्राचार्य, वाल्मीकि एवम् वेदव्यास को कवित्व की प्राप्ति कैसे हुई इसका भी वर्णन किया है[2]। इसके साथ-साथ अन्य आनुषङ्गिक तथ्यों पर भी प्रकाश डाला गया है। काव्यपुरुष और साहित्यविद्या-वधू का कवि के मानसपटल पर निवास, यह भी अवान्तर वर्णनीय विषय है। इस विवरण से स्पष्ट है कि विभिन्न विषयों पर किये गये संकेत साहित्यशास्त्र के लिए कितने महत्व-पूर्ण हैं।

'काव्यपुरुष' का अर्थ—काव्यपुरुष की कथा में वर्णित काव्यपुरुष का वास्तविक नाम 'सारस्वतेय' है किन्तु प्रस्तुत कथा में ये दोनों नाम समानरूप से व्यवहृत हुए हैं।[3]

---

१. काव्यमीमांसा, बडौदा का तृतीय संस्करण।

२. वही, प्रथम-अध्याय का उपसंहार।

३. तेषु सारस्वतेयो वृन्दीयसामपि वन्द्यः काव्यपुरुष आसीत्। वही, अध्यया १

लाक्षणिकरूप से सारस्वतेय को काव्यपुरुष कहा गया हैं।[1] वस्तुतः सारस्वतेय नामक पौराणिक पात्र को ही काव्य का प्रतीक बनाया गया है। यहाँ काव्यपुरुष को इन्होंने शब्द-ब्रह्मका विवर्त कहा है। इसीलिए काव्य पर पुरुष का आरोप किया गया है। अतः इसका तात्पर्य हुआ काव्यरूपी पुरुष। यहाँ इस रूपक का अंगों सहित वर्णन किया गया है। इससे काव्यांगों के निश्चित क्रम को समझने में सहायता होती है। अभिप्राय यह है कि पौराणिक शैली का आलम्बन करके आचार्य ने काव्य का ही वर्णन किया है।[2]

यहाँ 'पुरुष' शब्द भी सामान्य अर्थ में प्रयुक्त नहीं है। इसका विशिष्ट अर्थ है। यह शब्द परमेश्वर के लिए वैदिक काल से ही प्रयुक्त होता आ रहा है और सामान्य व्यवहार में भी चलता ही है। वायुपुराणका उल्लेख इस प्रसंग में आवश्यक है; क्योंकि बाणभट्ट की तरह राजशेखर पर भी वायुपुराण का प्रभाव परिलक्षित होता है। वायुपुराण में आदिपुरुष, प्रजापतिपुरुष, महापुरुष, परमपुरुष, पुरुषसूक्त तथा प्रकृतिपुरुष की अनेक चर्चायें हैं और पुरुष का स्वरूप भी इस प्रकार बतलाया गया है—

> 'वायु जिस प्रकार सब भूतों में विचरणशील है, उसी प्रकार सभी भूतों के हृदयाकाश रूपी पुर में शयन करने के कारण ही परमात्मा को पुरुष कहा जाता है।'[3]

इस प्रकार राजशेखर की दृष्टि में इस शब्द का विशेष महत्त्व था। इसीलिए इसे प्रयोग में लाया गया। साथ ही पुरुष शब्द का सामान्य अर्थ लेकर अंग-प्रत्यंगों का पुरुष-शरीर की तरह वर्णन किया गया है और साहित्य-विद्या-वधू के पति के रूप में भी।

काव्यमीमांसा में 'काव्यपुरुष' की जन्म कथा—गुरुओं से ऐसी पुरातन पुण्यवाणी सुनते थे कि शिष्य जनों से प्रश्न किए जाने पर एक- बार बृहस्पति ने उन्हें सारस्वतेय-काव्यपुरुष का स्वरूप इस प्रकार बतलाया—

प्राचीनकाल में पुत्र-प्राप्ति की अभिलाषा से सरस्वती देवी हिमालय पर तब तक तपस्या करती रहीं जब-तक विधाता ने 'पुत्रं ते सृजामि' कहकर पुत्र-लाभ का वरदान न दे दिया। सरस्वती को पुत्र की प्राप्ति हुई और नवजात शिशु ने चरणस्पर्श करके इस प्रकार प्रौढ व्यक्ति की तरह छन्दोमयी वाणी का उच्चारण किया—

यदेतद्वाङ्मयं विश्वम्, अर्थमूर्त्या विवर्तते।
सोऽस्मि काव्यपुमान् अम्ब ! पादौ वन्देय तावकौ।

[मा ! यह जो समस्त वाङ्मय अर्थ के रूप में विवर्तित (प्रतिभासित) हो रहा है, मैं वही काव्यपुरुष तुम्हारे चरण-युगल की वन्दना करता हूं।]

---

१. काव्यैकरूपत्वाच्च सारस्वतेयेऽपि काव्यपुरुष इति भक्त्याप्रयुञ्जते।
वही, तृतीय अध्याय

२. वही

३. वायुपुराण, अध्याय ७-८

विवर्तवाद—उक्त श्लोक में काव्यपुरुष को विवर्त से अभिन्न कहा गया है। ऐसा जान पड़ता है कि यहाँ उन्होंने भवभूति से प्रेरणा पायी है। वैसे यह सिद्धान्त वाक्यपदीय में विस्तृत-रूप से प्रतिपादित है। विवर्त भ्रान्तिजन्य सत्ता है, जैसे रस्सी में सर्प का प्रतिभासित होना। इस दृष्टि का उपयोग शब्द के सम्बन्ध में भर्तृहरि ने वाक्यपदीय में किया है। शब्द ब्रह्म अनादि और अनन्त है और सारा अर्थ-जाल विवर्त ही है जिससे लोकयात्रा प्रवर्तित होती है—

अनादि निधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थ भावेन प्रक्रिया जगतो यतः॥

भवभूति ने भी अनेक बार शब्द ब्रह्म और उसके विवर्त का संकेत किया है।[1]

